सं स्कृ त प्र ति भा

SAMSKRITA PRATIBHA

सप्तम उन्मेषः
द्वितीयो विलासः
१९६८

साहित्य अकादेमी, नवदेहली

सं स्कृ त प्र ति भा

SAMSKRITA PRATIBHA

सप्तम उन्मेषः
द्वितीयो विलासः
१९६८

साहित्य अकादेमी, नवदेहली

संस्कृतप्रतिभा सप्तम उन्मेषः, द्वितीयो विलासः
१९६८
साहित्य-अकादेमी, नवदेहली

विषयानुक्रमणिका—

सम्पादकीयम्
आनन्दवर्धापनम्- चि. द्वा. देशमुखः

खण्डकाव्यानि—

१. कविः-म. म. लक्ष्मीनारायण द्विवेदी १२५
२. गोपिकागीतम्-नारायणकविः १३२
३. आपद्दीपः-पि. एस्. सुब्बरामपट्टर् १४०
४. सुभाषितानि-रतिनाथ झा १४५
५. कालिदासः-विश्वनाथ भट्टाचार्यः १४७
६. मुकुलगीता-बोम्मकण्टि श्रीनिवासाचार्यः १४८
७. संसारचित्रम्-अ. वि. काणे १४९
८. पुरुसिकन्दरीयम्-दिनेश प्रसाद पाण्डेयः १५०

गद्यबन्धः—

९. "देवविकटम्"-सुब्रह्मण्यभारती- एन. बालसुब्रह्मण्यः १५५

रूपकम्—

१०. विद्यानाथविडम्बनापरनामा प्रतापरुद्रविजयः
-डा० वे. राघवः १६०

अनुवादाः—

११. मनोबोधः-श्रीसमर्थरामदासस्वामिविरचितः
अनु० विश्वनाथ केशव छत्रे १९०
१२. श्रीमदान्ध्रनायकशतकम्-श्री. ति. गु. वरदाचार्यः १९७
१३. दया-न. च. वे. नरसिंहः २२२
१४. मधुसञ्चयः-शैलेन्द्रनाथ सिद्धनाथ पाठकः २२३

निकषोपलः—(पुस्तकविमर्शः)—

वर्णोच्चारणदीपिका, शौनकशिक्षा (के. एन्. एस्. दिवाकर द्विजेन्द्रः); ऋग्वेदीयं शमानलक्षणम्, उपलेखसूत्रं च (दशग्रन्थि-वेङ्कटरामशास्त्री); सर्वानुक्रमणी-नावायोगपाठः (कुम्मणि भवदासन् नम्पूतिरि); सामवेदसंहिता आङ्ग्लानुवादसहिता (धर्मदेव विद्यामार्तण्डः); अद्वैतामृतसारः (श्रीद्विजेन्द्रलालशर्मा पुरकायस्थः); तत्त्वसन्दर्भः श्रीजीवगोस्वामिकृतः (डा० सीतानाथ-गोस्वामी); रामायणसमीक्षा (श्रीवेङ्कटेश्वरविश्वविद्यालयीयसंस्कृतविभागः); मेघदूत-विलासः, अमरुशतकलीला (वाक-कंबे); हरिशतकम् (गोपालदास गुप्त); कालिदाससुभाषितानि (कृ. त. पाण्डरङ्गि); नीतिशास्त्रम् (कृष्णमूर्तिः); अलकामिलनम् (द्विजेन्द्रलालशर्मा); ललिताञ्जलिः (अयिरूर सी. माधवन् पिल्लै); मुक्तकमञ्जूषा (दि. द. बहुलीकर); ललितगीतालहरी (प० ओगेटि परीक्षित् शर्मा); भूमिदानयज्ञोपनिषद्, जवहरगङ्गालहरी च (कार्शीनाथ रघुनाथ वैशम्पायनः); श्रीगुरुगोविन्दसिंहभगवत्पादाः (डा० श्रुतिकान्तशर्मा); विरहलहरी (श्री. भि. वेलणकरः); गणपतिसम्भवम् (म० म० प० प्रभुदत्तशास्त्री); शिवा-सम्बन्धः (प० रामावधमिश्रः); कर्णार्जुनीयं महाकाव्यम् (विन्ध्येश्वरी प्रसादशास्त्री); वीरोत्साह-वर्धनम (सुरेशचन्द्र त्रिपाठी); राष्ट्रपथप्रदर्शनम (दुर्गादत्तशास्त्री); जवाहरजीवनम् (रामशरणशास्त्री); जवाहरज्योतिः (प० राजारामशुक्लः); सीताचरितं महाकाव्यम् (रेवाप्रसाद द्विवेदी) रवीन्द्रप्रतिभा (दिनेशचन्द्रदत्तः); गल्पकल्पलतिका (गिरिराज-शर्मा); पार्वतीपरमेश्वरीयम्, रामवनगमनम, पाददण्डः (डा० श्रीमती वनमाला भवालकर्); गणाभ्युदयम (हरिहरत्रिवेदी); प्रतिज्ञाकौटिल्यम् (जग्गु वकुलभूषणः); नारीजागरणम् (श्री गोपालशास्त्री); पद्मावती (कोलाचलं यज्ञनारायणदीक्षितः); उपनिषद्-रूपकाणि (के. टि. पाण्डुरङ्गि); मेघदूतोत्तरम् (श्री. भि. वेलणकरः); भूपो भिषक्त्वं गतः (प० गणेशशास्त्री); श्रीगणेशसुप्रभातम्, श्रीशृङ्गारवेलायुध-स्तोत्रम्, श्री-अभिरामनायिकास्तोत्रम् (श्रीस्वामिशास्त्री); अष्टलक्ष्मीगीतम्, स्तुतित्रयम् (श्रीसुन्दरेशशर्मा); सुवर्णलक्ष्मीनक्षत्रमाला (प० श्रीहरिशास्त्री); श्रीरामायणस्तोत्रमाला (के. अन्नपूर्णा देवी); केतीशनाथसुप्रभातम् (ति. कि. सीतारामशास्त्री); श्रीरामशतकम (ति. न. रामचन्द्रः); स्तुतिमांणमालिका (न. च. रघुनाथाचार्यः); श्रीमहागणपतिरञ्चश्लोकीस्तवः, श्रीगजाननशरणागतिश्च (कृष्णहरिहरशर्मा); भगवच्चरणोत्प्रेक्षा (श्री. प० मथुराप्रसाददीक्षितः); पुष्पाञ्जलिः (प० विष्णुदत्तमिश्रः); सौन्दर्यलहरी, हस्तामलकस्तोत्रम, अन्नपूर्णाविश्वनाथस्तोत्रम्, चन्द्रशेखराष्टकस्तोत्रम् (श्रीशङ्कराचार्यकृतानि) (पि. कृष्णमूर्तिः); केतकीकौमुदी

(अनुवादकः-मनोरञ्जनशास्त्री); अथातो ज्ञानदेवोऽभूत् (अनुवादकः-डा० ग. बा. पळसुले); तदात्मानं सृजाम्यहम्, सम्मानकर्णिकम् (अनुवादकः-माधव देशपाण्डे); कलापूर्णोदयः, त्रिवेणी (श्रीसन्निधानं सूर्यनारायणशास्त्री); काव्यतरङ्गिणी-द्वितीयस्तरङ्गः (सि. जि. पुरुषोत्तमः) पुरन्दरवाणी (प्र. कृ. त. पाण्डुरङ्गि); तद्धितान्ताः केचन शब्दाः (डा० भगीरथप्रसाद त्रिपाठी); संस्कृतव्याकरणम् (डा० कपिलदेव द्विवेदी); गोलनवाङ्कुरः (मल्लीनाथचौमालः); चित्रद्वारा संस्कृतशिक्षा-प्रश्नोत्तरावलिः (कपिलदेवशास्त्री); संस्कृतसौरभम् (चारुदेवशास्त्री); सरलसंस्कृतशिक्षणोपायः (दुर्गादत्तशास्त्री); संस्कृतोदयः (राष्ट्रीयशैक्षणिक-अनुसन्धानप्रशिक्षापरिषद्) संस्कृतपरिचयः (Introducing Sanskrit) (प्राचार्य एस्. के. रामचन्द्रराव्); जनशिक्षा ओ संस्कृत् (श्रीध्यानेशनारायणचक्रवर्ती); संस्कृतपत्रिकाणामितिहासः (कृ. त. पाण्डुरङ्गि); मङ्गला (सी. ए. टि. स्काम); सामवेदीया षष्ट्यब्दपूर्तिशान्तिः (धर्मज्ञ-मायूरं रामनाथशास्त्री); सुभाषगौरवम्, वङ्गविभावरी, भारतगाथा (दत्तदीनेशचन्द्रः); छन्दस्सन्दोहः (दत्तदीनेशचन्द्रः)

श्री. दा. सातवलेकरमहाभागाः

सम्पादकीयम्—

१९६८ आगस्ट्-मासे २४-दिने डा० सुनीतिकुमार चाटर्जि-महाशयैः कल्कत्ताविश्वविद्यालये दीक्षान्तानुशासनं निर्वर्तितम । स्वीये अनुशासने संस्कृतायोगाध्यक्ष्यस्थानं पूर्वमूढवद्भिरेतैः भारतीयभाषाकोविदाग्रेसरैः शिक्षाविषये भाषाप्रश्नो विचारितः । भाषाशिक्षायोजनायां संस्कृतस्य यथाकथञ्चिदन्तर्भावमिच्छन्तः एवमवदन्-"प्रायः सर्वा आधुनिकभारतीयभाषा इतोऽपि गाढतया नैकट्यमानेतुं तासां या संस्कृतं नाम सामान्या पीठभूमिः सा दृढीकर्तव्या । सा च भाषा अनिवार्यत्वेन कथमपि सर्वैः छात्रैः अध्येतव्या ।" इति । अत्र प्रमथचौधुरिनामकैः प्रासिद्धैः वङ्गसाहित्याभिवर्धकैः यदघोषि तदपि सुनीतिकुमारमहाशयैरुद्धृतम् । चौधुरीमहाभागैरुक्तम्—'सर्वदैवास्माभिः संस्कृतं पूर्णं सम्यक् चाध्येतव्यमेव' इति । चाटर्जि-महाशयैरुपरि संस्कृताध्ययनमन्तरेण यदुल्लिखितं तदपि अवधार्यम् । "केन्द्रीयशिक्षामन्त्रालये केन्द्रीयसंस्कृतसमितिद्वारा यः संस्कृतोपकारः कोऽपि एकेन हस्तेन दीयते, स अपेरण हस्तेन भाषात्रयविधानरूपेण अपहियते" इति । रूसदेशे वि. वि. इवनोव्, वि. एन्. तोपरोव्-नामकाभ्यां पण्डिताभ्यां संस्कृतस्य ऐक्यसम्पादनशक्तिमधिकृत्य अस्मिन्नेव वर्षे यल्लिखितं, तदपि चाटर्जिमहाशयैरुदाहृतम्—'संस्कृतं विना भारतदेश इति भावनैव दुर्विभाव्या । बहुवर्षसहस्रसंमिते कालप्रवाहे भारतीयसंस्कृतिचरित्रयोः यदैक्यमासीत्, तस्यैक्यस्य संस्कृतमेव प्रतीकः, सामग्रीसम्पादकशक्तिरपि चासीत्' इति ॥

* * *

मद्रनगरे वर्तमानवत्सरारम्भे महत् द्रमिडसंमेलनमभूत् । तत्र वाचिते स्वप्रबन्धे एत एव भाषाविद्वद्वरेष्ठागरिष्ठा चाटर्जिमहाशया उदघोषयन् आर्यद्रमिडयोरुभयोरपि भाषासंप्रदाययोर्विजयं समृद्धिं च । किन्तु एतादृशेषु प्रवचनेषु तत्तत्पक्षपातिभिः प्रायः अर्धजरतीयमेव क्रियते । अस्ति कापि लोककथा द्रमिडदेशे प्रथिता—मुमूर्षुरासीत्कश्चिद्गृहपतिः । तं परिवार्य गृहिणीतनयादयो य आसन्, तैर्निर्बन्धेन पृष्टः केन केन अधमर्णेन गृहीतं कौटुम्बिकं धनं

प्रत्यर्पयितव्यमिति तेषां नामानि प्रत्यर्पयितव्यधनस्य इयत्तां च स निरदिशत्। तत्सर्वं क्रमशः गृहिणीतनयादयः समोदं पत्रे अलिखन् । समनन्तरमेव गृहपतिरवोचत्—'अद्य मया परतो गृहीतस्य ऋणजातस्य विशेषा वक्ष्यन्ते, तत्प्रत्यर्पणार्थं च इमे उत्तमर्णाः, तत्तदृणपरिमाणं च विलिख्यन्ताम्' इति । एतच्छ्रुत्वा सद्य एव गृहिणीतनयादयश्चुक्रुशुः-'अविहा, अविहा; मुमूर्षुः अथवा मृत एवायं, नष्टचेतनः यत्किञ्चित् प्रलपति' इति । तथोच्चैस्समेत्य आक्रन्दितादि अकुर्वन् यथा न किञ्चिदपि तत्र मुमूर्षुणा वक्तुमन्यैर्वा श्रोतुं पारितम् ॥

* * *

एतद्वर्षारम्भात्प्रभृति मद्रप्रान्ते पाठशालासु भाषाद्वययोजना प्रवर्तिता शासकमण्डलेन; यामनुसृत्य द्रविड-आङ्ग्लातिरेकेण अन्या भाषाः पाठशालातः निष्कासिताः । पाठशालासु ये संस्कृतशिक्षका वर्तन्ते ते कमपि सामान्यमवरं व्यापारं स्थानान्तरेषु कार्यान्तरनियोगं च दत्वा स्वकीयात्संस्कृतशिक्षणाधिकारादवरोपिताः । मध्ये वयसि, परिणतप्रायायां वा वृत्तौ वर्तमाना एते संस्कृताध्यापकाः किं वा कुर्वन्तु? शिल्पाभ्यासार्थं पाठक्रमे कतिचन होरा निसृष्टाः प्रायो व्यर्थीक्रियमाणाः छात्रैः उपाध्यायैश्च वर्तन्ते, तासु होरासु संस्कृतस्य अवकाशो देय इति मद्रप्रदेशशिक्षामन्त्री प्रार्थितः, संमतिमाविश्चकारेति च श्रूयते । किन्तु अनुष्ठाने संमतिमनुमतिं वैनां सार्थकीकर्तुं पाठशालानिर्वाहका बिभ्यति, यत एतद्विषये शासकीयं प्रकटं निवेदनं किमपि न निसृष्टम् ॥

* * *

विषय एष केन्द्रीयावधानकोटौ स्पष्टमापतति । यतः संस्कृतं सर्वभारतसामान्यभाषा, ततः केन्द्रीयाधिकारिभिरेव तदध्ययनप्रचारविषये निखिलभारतावगाहिनी योजना आसूत्रयितव्या । इतो महत्तरः प्रश्नः केन्द्रीयसंस्कृतसमितेस्समाधानाय नास्ति ॥

* * *

रूसभाषायां बोरिस् स्मिर्नोव्-नाम्ना पण्डितेन अनूदितस्य महाभारतस्य नव भागाः प्रकाशं नीताः। इतिहासोत्तमेऽस्मिन् ये सन्दर्भाः वेदान्तपराः तेषामपि भागद्वयात्मकोऽनुवादः स्मिर्नोव्-महाशयेन कृतः नचिरात् प्रकाशमेष्यति। अद्य कीर्तिशेषतां गतैरेतैः स्मिर्नोव्-महाशयैः कृत एष अनुवादः पद्यरूपः, महाभारतस्य संग्रहरूपेण, तत्र तत्र कांश्चन भागानेवादाय प्रवृत्तः। किन्तु अन्योऽपि रूसीयोऽनुवादो महाभारतस्य कृतः, लेनिन्ग्राड्-विश्वविद्यालये संस्कृतप्राचार्यपदवीमधितिष्ठद्भिः कल्याणाव्-महाशयैः, स तु यथामूलं रचितः। देशान्तरवैकटिकानां दृष्ट्या यदस्माकमनर्घं रत्नं तदहो वासनाविपर्यासपटलप्ररोहेण प्रायोऽन्धीभवतामस्माकं दृष्टीनां केवलाश्मतां गतम्॥

* * *

पूर्वं तत्र तत्र भारते विदेशेषु च प्राध्यापकीभूय स्वीयैरनेकैः भारतीयाध्यात्मदर्शनव्याख्यानैः, अनन्तरं उपराष्ट्रपतिराष्ट्रपतिस्थानमलङ्कृतवद्भिः तैस्तैः सांस्कृतिकाभिवृद्धिकार्यक्रमैः भारतीयां संस्कृतिं, साहित्यं, विशिष्य संस्कृतभाषां, साहित्य-अकादेमीनाम्नीं परिषदं च महान्तं परिपोषं नीतवद्भिः डा० सर्वेपल्लि राधाकृष्णमहाभागैः विंशतिवर्षात्मकेऽस्मिन् भारतीयस्वातन्त्र्ययुगस्य प्रभातभूते काले किं किं नाकरि, कस्य वा सत्कार्यस्य कृते न वयं तेभ्यः कृतज्ञा अधमर्णाश्च न भवामः? ज० नेहरूमहाशया एकतः, इमे राधाकृष्णमहाशयाश्चापरतः स्वतन्त्रभारतव्योम्नि सूर्याचन्द्रमसाविव अद्योतन्त। विशिष्य साहित्य-अकादेमीपरिषदः श्रीराधाकृष्णमहाशया जीवातुभूता आसन्। राष्ट्रपतिपदवीतः, अकादेमी-परिषदध्यक्षपदवीतश्च एतेषां विश्रान्तेः परं परिषदा अनया स्वकार्तथ्यमभिनन्दनं चाविश्चिकीर्षन्त्या परिषदः सदस्यमहत्तरत्वं (Fellowship) नाम गौरवमेतेभ्यः समर्पणीयमिति निश्चित्य तदर्थं समारोहः कश्चन मद्रनगर्यां श्रीमतां राधाकृष्णमहाशयानां गृह एव १९६८ सेप्टम्बर् मासे १०-दिने आयोजितः, यदा संप्रतितनराष्ट्रपतयः

सा. अ. परिषदध्यक्षा डा० ज़ाकिर् हुसैन्महाभागाः संमानमेतत् ताम्रपत्र उट्टङ्कितं समार्पयन् । अर्धहोरापरिमितोऽप्येष कार्यक्रमः कामपि उदारां शोभामधत्त । परिमितेषु अतिथिषु सा. अ. परिषदभ्यन्तराङ्गभूताः कार्य-निर्वाहकाश्च आसन्-कार्यदर्शी श्रीमान् कृष्णकृपालनीमहाशयः, गूर्जर-विश्वविद्यालयोपकुलपतिः विख्यातगूर्जरकविः उमाशङ्करजोषी, सं. प्रतिभा-सम्पादकश्च । प्रथमं सं. प्रतिभासम्पादकेन सन्दर्भमेतमधिकृत्य रचितः श्लोकः विश्रुतया सङ्गीतविदुष्या श्रीमत्या म. ष. सुब्बुलक्ष्म्या उषःकालोचित-रागमालया गीतः । अयं स श्लोकः—

जीयाद् भारतमार्षदर्शनतपोदीप्तात्मविद्योज्ज्वलं
माता संस्कृतभारती च जयतादध्यात्मसन्देशदा ।
तं सन्देशमुदारवश्यवचसो व्याख्यन् य एतेऽद्भुतं
राधाकृष्णबुधा जयन्तु शरदामीशप्रसादाच्छतम् ॥

अनन्तरं कृपालनीमहाशयेन परिषदो निर्णयो वाचितः । ततः सं. प्रतिभासम्पादकेन ताम्रपत्रे संस्कृतभाषया उट्टङ्कितमिदं पठितम्—

"सर्वेपल्लि राधाकृष्णन्"

भारतीयदर्शनस्य तथा विश्वमानवत्वसंप्रदायस्य च
तेन कृतमत्युत्तमं परिपोषमभिनन्द्य
साहित्य-अकादेमी-परिषदः
प्रथमसदस्य-महत्तरत्वेन निर्धारितः ।

ज़ाकिर् हुसैन्
अध्यक्षः, साहित्य-अकादेमी



भूतपूर्वराष्ट्रपतिभ्यः भूतपूर्व सा. अ. परिषदध्यक्षेभ्य:

श्री डा० स. राधाकृष्णमहाशयेभ्यः

राष्ट्रपतिभिः सा. अ. अध्यक्षैः

ज़ाकिर् हुसैन् महाशयैः

सा. अ. सदस्यमहत्तरत्वरूपं संमानं ताम्रपट्टोल्लिखितं समर्पितम्

पश्चाद्राष्ट्रपतिभिः श्रीमतः राधाकृष्णमहाभागानभिनन्द्य स्ववाङ्मयेन सह तेभ्यः ताम्रपत्रं वितीर्णम् । ज़ाकिर् हुसैन्-महाभागा अवदन्-"यद् भवद्भिः साधितं, तद् बहुमुखं श्रेष्ठं च भासते । भवतां सत्कारेण सा. अकादेमी-परिषद् आत्मानमेव सत्करोति । अध्यात्ममार्गे यद् भारतीय-संप्रदायसर्वस्वं, तस्य जगति सर्वत्र ज्ञानं भवद्भिः विस्तारितं, तस्य गभीरता च आपादिता । असाधारण्या दृष्ट्या भवद्भिः दुर्लक्षः बुद्धिप्रतिभयोः, तथा तत्त्वज्ञानभगवदुपासनामार्गयोः सूक्ष्मः सम्बन्धः विचारितः ; यत्र च सर्वमतानां मेलनं भवितुं शक्यं, तदपि उद्दीपितम् । साहित्य-अकादेमी-परिषदः उपक्रमादेव भवन्तस्तस्या मार्गनिर्देष्टारः स्वरूपनिर्मातारश्चासन्" इति ॥

संमानमेतदङ्गीकुर्वन्तः डा० राधाकृष्णमहानुभावा अवोचन्—

"प्राच्यां प्रतीच्यां च दिशि बह्वीनां परिषदां सदस्यत्वरूपः सत्कारो मया लब्धः । किन्तु सा. अ. परिषत् कस्यापि विशिष्टस्य प्रेम्णो मे आस्पदं भवति, यतोऽहमनया सह १९५४-वर्षे तदारम्भात्प्रभृत्येव समन्वितः । जीवितस्य अध्यात्मोन्मुखतामङ्गीकृत्य अकादेमीपरिषदङ्गभूतैस्सर्वैरन्तरात्मोत्कर्षाय प्रयतितव्यम् । अधुना प्रपञ्चेऽस्माभिः आध्यात्मिकानि लक्ष्याणि तिरस्कृतानि, येन विज्ञाने प्रभावे च महतीं सिद्धिं यातैर्देशैः लोक एष विनाशोपकण्ठमानीत इति शङ्क्यते । मनुष्यस्य महत्त्वं तु न ज्ञाने न वा शक्तौ वर्तते, परन्तु शुद्ध-अव्याज-निर्हेतुक-भावनापुरस्सरे लोकानुरागे वर्तते । तथाविधं ज्ञानमस्माभिः परिचेयम् । मनुष्येणोपलब्धेषु भागधेयेषु वाक्शक्तिरेव अर्घ्यतमा, वाचश्च अत्युत्कृष्ट आविर्भावः साहित्ये लक्ष्यते । साहित्यं त्रिविधं वरीवर्ति-ज्ञानात्मकं, शक्त्यात्मकम्, आध्यात्मिकं च । पूर्वे द्वे करणभूते ; अन्त्येनैव मार्गः प्रदर्शयितव्यः । हृदयनिष्ठं यद् ज्ञानं तदेव ज्ञानान्तरेभ्यो वरीयः । तदेव ज्ञानमस्माभिः परिचेयं, यतः तदेव जाति-मत-दर्शनादिसीमातिलङ्घि भवति । विश्वसांमनस्यार्थं शान्तिसिद्ध्यर्थं सामुदायिकधर्मतया यद्यदनुष्ठेयं तत्र सर्वैरेव जनैः धृतव्रतैर्भाव्यम्" इति ॥

एवं डा० राधाकृष्णमहाशयानां भाषणानन्तरं श्रीमत्या सुब्बुलक्ष्म्या विविध भारतीयभाषासु प्रसिद्धानि कीर्तनानि गीतानि ॥

श्रीमता उमाशङ्करजोषीमहाशयेन सन्दर्भेऽस्मिन् डा० राधाकृष्ण-महाशयान् अधिकृत्य लिखिताः काव्यपङ्क्तय एताः तेभ्यः समर्पिताः—

"चिन्तामपरिमेयान्तामाश्रितः सौमनस्यवत् ।
स्वस्थाश्वस्तः कथं लोकः भवेदिति विमर्शिनः ॥

भुवनमङ्गलैकाग्रधीमतः
जयतु तेऽधिकं जन्मना जगत् ॥"

डा० वे. राघवं प्रति षष्टयब्दपूर्ति निमित्तम्

आनन्दवर्धापनम्*

श्री चि. द्वा. देशमुखः

षष्टयब्दपूर्तिसमयेऽसुमयेऽनघेऽस्मिन्
दिष्टया विदग्धकुलमण्डन राघव त्वम् ।
वर्धस्व, वत्सरसरः सरसोऽस्तु दीर्घ-
स्ते नैजकार्यगुरुतानिरताशयस्य ॥ १ ॥

लोके विदामुरुतमे कतमे विदग्धा
यैरर्जिता ह्यमरतामरवाग्विताने ।
तत्रापि निर्मितिकलं कविकोकिलत्वं
हस्ताङ्गुलिप्रमितसंख्यजनैरवापि ॥ २ ॥

नैतावता न्ववसितापचितिः कलायाः
सङ्गीतविश्वरसिक त्वरसे रसायाम् ।
निस्तन्द्रता तव सखेऽनुगखेदहेतु-
र्नश्चोदयेन्न च कथं गुणिशिष्यसंघम् ॥ ३ ॥

विद्यालयश्च यमलं समलङ्करोषि
प्राचार्यकार्यनिपुणो विपुलानुसन्धः ।
सान्द्राभिमानसहमानसमित्रवर्गः
प्रीयेत नो कुलपतिश्च कथं सुखात्ते ॥ ४ ॥

आयोगतश्चलतु विश्वविदालयाना-
मध्यापनप्रगतकेन्द्रमभीष्टमद्धा ।
गैर्वाणवागुपनिषन्नवगौरवाढया
यस्मिन्ददातु भवते ह्युचितावकाशम् ॥ ५ ॥

---

* चेन्नपुर्यां (मद्रास्-नगरे) २२-८-६८ दिवसे प्रवृत्तस्य उत्सवस्य अध्यक्षपदमलङ्कृतवद्भिः श्रीदेशमुखमहाशयैः स्वीयाध्यक्षभाषणान्ते पठित्वा राघवार्येभ्यः समर्पिता इमे श्लोकाः ।

अद्यानवद्यचरितस्य तवोत्सवोऽयं
भाराग्रभूस्तु कुरुताद्गुरुतां सुषद्याम् ।
किं नो चिरस्य कथितं कविसत्तमेन
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ ६ ॥

उत्तीर्णसप्ततिशतं स्तिमितं जगत्ते
स्तौति प्रकाण्डविदुषां वर निर्मितीनाम् ।
प्रज्ञावदान्य तुलनां तव कोविदोऽन्यः
सारस्वतार्थिविनुतस्तनुते न कश्चित् ॥ ७ ॥

त्वं सामवेदिगगने भगणेश्वरोऽसि
ध्वंसोन्मुखामरगिराममरत्वदोऽपि ।
संसारसंस्कृतिजुषां विदुषां धुरीणः
कं सारवन्तमधिकं नतिभिः स्तुवीमः ॥ ८ ॥

शुद्धं शतं च शरदां शरदभ्रशुभ्रं
शेषायुषः क्रमविधौ शितशेमुषी ते :
शोभा शुभा शशिकलेव च शुक्लपक्षे
शान्तः शिवश्च भवतात्तव शारदाध्वा ॥ ९ ॥

कविः

म. म. लक्ष्मीनारायण द्विवेदी

आदावाद्यस्य मुखतो निःसृतां श्रीमहाप्रभोः ।
अनन्तरमृषीन्प्राप्तां वन्दे कामदुघां गिरम् ॥ १ ॥

यामाराध्य जगद्वन्द्या यशसा वपुषात्मना ।
इहामुत्र च दीव्यन्ति कवयो ह्यमरश्रियः ॥ २ ॥

कविः स्वयंभूर्जयति कविर्जयति भार्गवः ।
कविर्जयति वाल्मीकिर्येनाप्तं वाङ्मयं महः ॥ ३ ॥

जयन्ति कवयः परे परमतत्त्वविद्योतनात्
स्फुरन्नवनवोज्ज्वलद्विमलवाङ्मयाभीषवः ।
हृदम्बुजविकासनां निरवरोधमञ्चच्छ्रिया
सतां विदधतः सदा शमिततापतृष्णाश्रमाः ॥ ४ ॥

सृजन् रससरस्वतीं सागरातिनिम्नां लसद्-
गभीरगुणसंपदां वैभवैः प्रभावोच्छ्रयैः ।
धराधरवरानधःकुर्वतीं जगद्व्यापिनीं
प्रसन्नमधुरामहो कैर्न नाम नन्द्यः कविः ॥ ५ ॥

शृङ्गारे मधुसौधे वीरे रौद्रेऽपि कटुगहने ।
प्रतिभाप्रभाप्रसारी स जयति कविताकलाधरः कोऽपि ॥ ६ ॥

कान्तायाः कमनीयसंगमरसव्यासक्तसर्वात्मना
रूढिं येन मनोभवस्य जयिनी लीला समानीयते ।
शत्रूणामनिशप्रमाथनिपुणः स्थेयान् युगान्तोदय-
स्तस्यैव प्रतिवीक्ष्यते समरसो वीरस्य कोऽप्याग्रहः ॥ ७ ॥

तथैव हि—

मृद्वीकामधुहारिणी सहृदयस्वान्तेषु संवादिनी
वाणी कौसुमधन्वनो विलसितैरानन्दनिष्यन्दिनी ।
आस्ये यस्य विलासमञ्चति यथा तद्वत्परत्रापि चेत्
दीव्यन्ती प्रसरेद् रसेषु कवितानर्मानुकोऽसौ कविः ॥ ८ ॥

लोकालोचनदक्षतामुभयथा नीत्योर्मतेः स्वच्छता-
मात्मन्यूर्जितसारतामपि कलाकौशल्यसच्छीलताम् ।
सङ्गीतेष्वधिगन्तृतां व्यसनिताव्यासङ्गनिःसङ्गतां
धत्ते काव्यवसुन्धराधिपतिता, सौभाग्यशाली कविः ॥ ९ ॥

सालङ्कारा सगुणा सरसा वाचां परिस्पन्दैः ।
आर्या सौभाग्यवती कविता यस्यास्त्यसौ धन्यः ॥ १० ॥

ध्वनयन्त्यन्तर्बहिरपि, नूपुरमुखरेव कामिनी मधुरम् ।
मदयन्ती मृदुलापा वाणी यस्यास्त्यसौ धन्यः ॥ ११ ॥

नवललनाननसरसिजसमुदितमकरन्दसन्दोहैः ।
सौभाग्ये सविवादा वाणी कस्यापि कोमला सुकवेः ॥ १२ ॥

अतिमधुरा मृदुमृद्वी पदावली यत्र रसभविला ।
अर्थं क्षरति मनोज्ञं स्वयमिव धेनुः पयः कृताह्लादा ॥ १३ ॥

अपि च—

मधुमदतरलितनयना स्मितजितशारदनिशाधिनाथश्रीः ।
कमनीयवक्रवचना कान्ता कस्यापि जायते जगति ॥ १४ ॥

ततोऽपि मधु वर्षन्ती स्वयमपि पीतेव विशदपदरचना ।
वक्रोक्तिरीतिचित्रा भणितिः कस्यापि राजते सुकवेः ॥ १५ ॥

सा गम्भीररसादिध्वनिरमणीयार्थसारकमनीया ।
अनर्गलप्रतिभाभरविसृमरशोभाऽतिभारसंभारा ॥ १६ ॥

किञ्च—

अथ शिथिलितबालमतिर्नववयसाऽऽनीतमधुरलावण्या ।
मदनस्यापि दरविदल-नयनतरङ्गैः कृतोन्मादा ॥ १७ ॥

प्रत्यङ्गफलितमुक्ताफलरुचिपरिपीतकोकनदनवकान्तिः ।
कृतवक्रवचनवान्तिः कान्ता धन्यस्य निर्जितस्मरतान्तिः ॥ १८ ॥

इति शिथिलसौकुमार्या तरुणितवैचित्र्यपथरुचिरा ।
सहजाहार्यविकस्वरसुषमालङ्कारबन्धनिर्बन्धा ॥ १९ ॥

माधुर्यमार्दवसवक्रिमसोद्यदोजो-
वैदग्ध्यचित्रपदताकृतचारिमा या ।
आपानकोचितरसाभिनयं दधाना
वाणी मुखाद्गलति यस्य कविः स धन्यः ॥ २० ॥

माधवीव रजनी हिमरश्मि-
श्रीसमेधितरती रसिकानाम् ।
स्मेरसौरभतरङ्गसमीरा
पुष्पितव्रततिहासवनान्ता ॥ २१ ॥

एवमञ्जितरसा हृदयान्तः
शब्दसञ्चयनचारुपथा चेत् ।
अर्थसारसुरभिः सुकवेर्गीः
सर्वलोकवशकृन्ननु विद्या ॥ २२ ॥

युग्मम्—

साहित्यसारार्थविवेचनोर्जितो-
च्छ्रयद्यशःकेतनविश्रुतात्मनाम् ।
मनीषिणां मुग्धतरात्मनां तथा
प्रविश्य चेतांसि कवीन्द्रशेमुषी ॥ २३ ॥

समर्पयन्ती रससिद्धसूक्तिभि-
र्लोकोत्तरं किञ्चन सर्वमोहनम् ।
ध्रुवं प्रवृत्तीर्मनसामथान्यथा
प्रकुर्वती नूतनतां नयेज्जगत् ॥ २४ ॥

छन्दांसि मार्गं ददति स्वयं कवे-
र्गिरां प्रसाराय न रुन्धति क्वचित् ।
पदावलीं व्याकरणानि सादरं
कोशाः सरन्त्यन्वनु शब्द-रत्न-दाः ॥ २५ ॥

तन्न्याय्यं कविवृन्दवन्द्यचरणाम्भोजोऽभिधत्ते हि यत्
मीमांसा न तनोति तस्य विमुखं व्याख्याविताने पुनः ।
तर्कः कर्कशचातुरीं क्वचिदपि प्रस्थाप्य कोणं दिशां
तस्यैवानुचरायते कविगिरां पाणौ जगन्नृत्यति ॥ २६ ॥

नूनं कवेरस्ति रवेर्विलक्षणा
गतिस्ततोऽयं द्युनिवासिनामपि ।
आविश्य हृत्सद्मनि गीर्विलासिनी-
मालिङ्गयन्नृत्यति नन्दनोत्तरे ॥ २७ ॥

कवेरहो समुत्तालतरङ्गशतसङ्कुला ।
समुत्पतन्ती गीर्गङ्गा स्वर्लोकमधिरोहति ॥ २८ ॥

सोऽयं कविश्चेद्विहरेदुपेक्षिता
वर्गे चतुर्णां प्रथमं तथान्तिमम् ।
जनोऽर्थकामात्मतया स्वतन्त्रतां
विन्दन् व्रजेन्नास्तिकसेव्यपद्धतिम् ॥ २९ ॥

पूर्वं निरस्येद् यदि तद्गतं जगत्
परं निरस्येत् प्रकरोति तामसम् ।
भ्रान्तश्च पूर्वे निजदुष्टकल्पना-
प्रपञ्चनैस्तथ्यपथात् प्रवञ्चयेत् ॥ ३० ॥

तस्मात्सदाचाररतो विवेकी
स्वधर्मसिद्धान्तपथानुवर्ती ।
निवर्तयन् दुष्पथसंप्रवृत्ते-
र्मान्यो महद्भिः कविचक्रवर्ती ॥ ३१ ॥

ततोऽर्थकामैकपरायणेन
दुःस्वार्थबुद्ध्या जनरञ्जकेन ।
सद्वृत्तसंरक्षणवञ्चकेन
मा नाम भाव्यं कविना कदापि ॥ ३२ ॥

सन्मार्गतश्चेद्विचलेत्स्वयं कवि-
र्नात्मानमेवापनयेत्सतां नयात् ।
निपातयन्स्वं तु सहायशोवशं
निपातयेदुन्नतिमार्गतो जनम् ॥ ३३ ॥

विजानता तेन जगद्धितस्य
विप्लावनीया वचसां न देवी ।
यतो दुरर्थेषु कवेः प्रयुक्ता
विनाशयेल्लोकमिमं परं च ॥ ३४ ॥

किं कोऽपि वन्योद्धुरसिन्धुरस्य
गत्युद्धती संश्रयतोऽपशङ्कम् ।
कवीश्वरस्याङ्कुशदानदक्षो
भूतो भवेदस्ति च वा न जाने ॥ ३५ ॥

ततः स्वकर्तव्यविचारदक्षः
सरस्वतीं सत्सु नियोजयेत ।
यतः प्रसन्ना ननु कामदोग्ध्री
कवेरनायासफलप्रदास्ते ॥ ३६ ॥

यामेष वाचं विशदार्थसार-
संस्कारसंधारणसाधितात्मा ।
मुखाम्बुजादुद्गमयेत् सुवृत्तः
सा सत्यसिद्धिं दिशति स्फुरन्तीम् ॥ ३७ ॥

वागस्ति वज्रं कुपितप्रयुक्ता
सर्वानुपायान् विफलान् विधाय ।
द्वेष्यस्य घातं बत सान्वयस्य
कृत्वैव शाम्येदिति लोकसिद्धम् ॥ ३८ ॥

सा वाक् प्रसन्नेन हृदा सुसंस्कृता
समीरिता स्यात् कविना हितेच्छुना ।
कामान् प्रसूते सुतरामचिन्तिता-
नपीह कल्पद्रुमवल्लिसंनिभा ॥ ३९ ॥

ततो हि—

विचक्षणो लोकमनांसि मुष्णन्
समीक्षमाणः किल देशकालान् ।
शृङ्गारधारामतिवेलयेद्वा
कुर्वीत वा वीररसोर्जितानि ॥ ४० ॥

शास्त्रोचितां न मर्यादां कदाचिदवहेलयेत् ।
न काव्यमदिरां पीत्वा जन उच्छृङ्खलो भवेत् ॥ ४१ ॥

क्वचिद्वास्यासक्तः क्वचन करुणासारसरसः
क्वचिद्रुद्राकारो भयभरघटां वापि घटयन् ।
घृणाघूर्णत्स्वान्तः क्वचिदपि नयन् विस्मयपदं
क्वचिच्छान्तात्मा सन् जगति कविराजो विजयते ॥ ४२ ॥

संचारिणी नवस्वपि सुप्रतिभान्ती रसेषु वाग् यस्य ।
आसक्त्यमुषितमनसो विलसति यदि कविमहेश्वरः सोऽसौ ॥ ४३ ॥

कविर्भोगी कवियोगी वियोगी कान्तया कविः ।
कविर्भक्तिरसोन्मत्तः कवेः सर्वं हि शोभते ॥ ४४ ॥

मतो नरेन्द्रोऽपि रसाधिकारवान्
मतः कवीन्द्रोऽपि रसाधिकारवान् ।
राज्ञोऽपि हृत्तामरसाधिकारवान्
कवीट् मतः सर्वरसाधिकारवान् ॥ ४५ ॥

स्वकीयपादाम्बुजरेणुरञ्जना-
राज्योत्सवं यन्निटिले सरस्वती ।
तनोत्यसौ निर्जरराजसंपदा-
मपि प्रभुत्वं न तृणाय मन्यते ॥ ४६ ॥

अशेषसारामपि सागराम्बरां
कवेर्ददन्नानृणतां व्रजेन्नृपः ।
समर्पयन्सद्वचनामृतं कविः
समस्तलोकस्य ददाति जीवनम् ॥ ४७ ॥

तं मानयन् भूमिपतिः समादरात्
प्रवर्धयत्यात्मन एव माननाम् ।
कविर्वसेद् यस्य हिते मतः सतां
स भाग्यवान् कीर्तिमतां श्रयेद् धुरम् ॥ ४८ ॥

सम्पन्मदग्रस्तविवेकदृक्तया
करोति चेत्कोऽपि कवेर्विमाननाम् ।
स सान्वयो नातिचिरेण निन्द्यता-
मुपैति राज्यादपि चापहीयते ॥ ४९ ॥

इयं नृपस्यैव न वाच्यता न यत्
कविर्भजेद् यस्य विजानतः खिदाम् ।
कविर्वनान्तेऽपि वसन् महीयते
सरस्वतीपादवनेरुहश्रिया ॥ ५० ॥

आराधितापि कविना गुरुभाविता सा
लोकोत्तरापि रसराजकृताधिवासा ।
सा वारुणीप्रमदवर्धनदक्षरूपा
काव्यस्य दिग् जयति कापि हि दक्षिणैव ॥ ५१ ॥

तस्याः कविः प्रणयिनां धुरि कीर्तनीयो
यो नर्मदा मलयसाररसोपभोगी ।
सापत्न्यदोषमतिगत्य दिशोऽनुरक्ताः
श्लिष्यन्ति यं विमलभावकृताभिसाराः ॥ ५२ ॥

केतकीगर्भजातेन श्रीभोलानाथसूनुना ।
लक्ष्मीनारायणेनात्र कवे रूपं प्रदर्शितम् ॥

गोपिकागीतम्

नारायण कविः

श्रीवल्लभे कलितकैतवगोपवेषे
वृन्दावने चरति पालितधेनुवृन्दे ।
उत्कण्ठिता व्रजगता किल कापि गोपी
स्वैरं निजामिदमुवाच वचो वयस्याम् ॥ १ ॥

कालाम्बुवाहकमनीयतराङ्गकान्ति
कञ्जेक्षणं कचविलासिकलापिपिञ्छम् ।
कान्तं कलिन्दतनयातटखेलनोत्कं
कृष्णं मनः श्रयति मे सततं सतृष्णम् ॥ २ ॥

कल्ये गवां कुलमयं कलयन्स्वकीयं
शृङ्गारवेण मृदुना मिलितात्ममित्रः ।
गत्याऽपहृत्य करिपोतगभीरयैव
हन्तागमन्मम मनो ननु नन्दसूनुः ॥ ३ ॥

अंसे समर्प्य करपद्ममनुव्रतस्य
कर्णान्तिके कथयतो विविधां कथां स्वाम् ।
मञ्जुस्मितस्य सखि नन्दतनूभवस्य
मन्दं गतं ननु चिरान्न गतं हृदो मे ॥ ४ ॥

द्वारं गताः प्रतिगृहं नवनीतहस्ता
एह्येहि देहि मुदमित्यसकृद्गिरन्तीः ।
संप्रेक्ष्य वेगपरिवर्तितवेषभूषाः
स्मेराननो हृदि विभाति स घोषयोषाः ॥ ५ ॥

वीरो गिरीशविजयी विदितातिमायो
गौरीकृपाधिगतकान्ततरात्मकायः ।
मन्ये जगत्स्ववपुषैव विजेतुकामो
नन्दात्मजातवपुषाऽऽगत एष कामः ॥ ६ ॥

नन्दात्मजस्य करपल्लवलालितां तां
मन्ये जगत्सु मुरलीं सखि धन्यधन्याम् ।
निःश्वासमाननसरोजभवं सुगन्धि-
माकण्ठमापिबति याऽधरबिम्बसक्ता ॥ ७ ॥

वंशेऽभवत्स्वयमियं विपुलेऽपि वंशी
जाताऽथ नन्दजकरग्रहमाप्य धन्या ।
चुम्बन्मुखेन ननु यां चिरमम्बुजाक्षो
बिम्बाधरेण सखि पूरयतीह कामम् ॥ ८ ॥

वन्यं तदप्यहह धन्यमतीव शृङ्गं
जातं तदीयकरपङ्कजमाप्य तुङ्गम् ।
यच्चुम्बितं यदुवरस्य मुखाम्बुजेन
मन्दस्मितेन मधुरं सखि सीत्करोति ॥ ९ ॥

वेत्रं कराङ्गुलिवशं भ्रमयन्सलीलं
नेत्रं निमेषविधुरं रमयन्वधूनाम् ।
गात्रं दधत्पशुखुरोत्थपरागधूम्रं
गोत्रानुगो मम जहार मतिं मुकुन्दः ॥ १० ॥

प्रातःसरोजमिव भानुकरानुषङ्गात्
फुल्लं मरन्दरसलोभमिलन्मिलिन्दम् ।
अध्वश्रमाम्बुकणिकाञ्चितमस्य कान्तं
वक्त्रं विभाति हृदि मेऽद्य चलालकान्तम् ॥ ११ ॥

आपीनपीनभरमन्थरमञ्जुचारं
वत्साननाकलननिःसृतदुग्धधारम् ।
पश्यन्गवां कुलमयं मुदितो वयस्यै-
र्मन्दं विशन्विपिनमस्ति दृशोः पुरो मे ॥ १२ ॥

गन्धर्वलोककलितातुलसाधुवादै-
रुत्कर्णतर्णककुलैरपि पीयमानैः ।
मुग्धस्मितो मुरारिपुर्मुरलीनिनादै-
र्विश्वं विमोह्य विपिने विहृतिं विधत्ते ॥ १३ ॥

वाचा सुधारसमुचा सुहृदां समाज-
मानन्दयन्ननुकलं सकलं सहासम् ।
पुण्ये परं सखि वने पुलिने तटिन्याः
पुन्नागभूरुहतलेऽस्ति पुमान्पुराणः ॥ १४ ॥

वर्षाम्बुवाहनिभया निजयाङ्गकान्त्या
तर्वन्तरेष्वपि तमालतुलां वितन्वन् ।
कृष्णः कठोरकिरणेऽप्यरुणे निजानां
तापं हरेत्सखि सुधासदृशा दृशाऽयम् ॥ १५ ॥

शाखाभुजा धृतघनच्छदनातपत्र-
स्तापं विनीय सफलः शरणं द्विजानाम् ।
पुन्नागतां भजति सत्यमयं नगेन्द्रो
यत्पादमूलमयते पुरुषोत्तमोऽपि ॥ १६ ॥

अङ्गारवर्षमतुलं विकिरत्यभीक्ष्णं
तुङ्गान्प्रसार्य परितोऽपि करान्खरांशौ ।
गीतामृतेन मुरलीमुखनिःसृतेन
शीतां भुवं वितनुतेऽद्य स कृष्णमेघः ॥ १७ ॥

भङ्गत्रयातिरुचिरस्य शुचिस्मितस्य
व्यत्यस्य तस्य चरणाम्बुरुहं स्थितस्य ।
लोलाङ्गुलीतरलिता मुरली मुखेन
नादाभिधानमधरामृतमेव सूते ॥ १८ ॥

नृत्यन्ति केकिनिवहा निभृताः शकुन्ताः
सारङ्गयूथमपचापलनिश्चलाङ्गम् ।
गीतेन वंशकलितेन जितामृतेन
तस्यातिपीनतनवो ननु धेनवोऽपि ॥ १९ ॥

मन्ये वने मधुरवल्लवपोतवंशी-
नादावधानवशतो निभृतान्तरङ्गाः ।
अन्यां दशां वनभुवो दधते मुनीन्द्र-
तुल्यामवाङ्मनसगोचरमोदधन्याम् ॥ २० ॥

माधुर्यमस्य महितं वदने चकास्ति
शैतल्यमप्यकलुषं करुणारसेऽस्ति ।
सौन्दर्यभूम्नि यदि मूर्च्छति मोहशक्तिः
वंशीरवे तदखिलं वचसामभूमौ ॥ २१ ॥

राजत्यतीत्य वदनं रजनीशबिम्बं
तस्याधरः परिहसत्यपि पक्वबिम्बम् ।
नेत्रं रुचा जयति शोणसरोजशोभां
कम्रः करः पदतले कुरुते प्रवालम् ॥ २२ ॥

बर्हेण मौलिविधृतेन कृतेन्द्रचाप-
गर्हेण मन्दमरुता चलितेन मन्दम् ।
मन्दस्मितो मदनकोटिमदापहारी
मायी विमोहयति मानिनि माधवो माम् ॥ २३ ॥

चित्राङ्गुलीयरुचिकल्पितशक्रचापः
पीताम्बराप्ततरलेतरविद्युदाभः ।
संप्राप्य मूलमिह तुङ्गनगस्य चित्रं
कर्णेषु वर्षति सुधां सखि कृष्णमेघः ॥ २४ ॥

कारुण्यपूरमिषपूरितशीतलापः
कान्तो दृशैव निजयाऽपहृतातितापः ।
कम्राङ्गुलीयकरुचा कलितेन्द्रचापः
कृष्णाम्बुदः सखि पुराघकृतां दुरापः ॥ २५ ॥

तुङ्गामवाप जनिमेष नगेषु तुङ्गः
भृङ्गावलीकलरवाकलितस्तुतिर्यः ।
पश्यत्यमुं विनिमिषेण कलापिपिञ्छ-
विस्तीर्णचन्द्रकमिषेण विलोचनेन ॥ २६ ॥

मन्दानिलाकलितपल्लवतल्लजाभा-
संदानिताङ्गुलिगणोऽधरबिम्बरक्ताम् ।
नन्दात्मजः स सखि मामिव मोदवल्ली-
कन्दायितोऽद्य मुरलीं तरलीकरोति ॥ २७ ॥

शिञ्जत्पदाब्जमणिनू पुरक्लृप्तताले
श्लिष्यत्कलिन्दतनयोर्मिमृदङ्गनादम् ।
लोलद्दलाङ्गुलिलताहतलास्यरम्यं
कृष्णस्य गीतमयते सखि केन साम्यम् ॥ २८ ॥

गन्धर्वराजवनिता गतिमाप्य गुर्वीं
गीतस्य तस्य मुरलीमुखनिःसृतस्य ।
गण्डार्पिताङ्गुलिदला गगनान्तरेऽद्य
चित्रभ्रमं विदधतेऽपि वने कवीनाम् ॥ २९ ॥

विद्याधरेन्द्रवनिताश्च विमानभाजो
विस्तारितेक्षणगलत्प्रमदाश्रुपूराः ।
नृत्यत्पदाब्जमणिनू पुरमञ्जुनादै-
र्मुग्धाः परं मुखरयन्ति दिशां मुखानि ॥ ३० ॥

मोदाकुलेन मुनिना मुरलीमुखोत्थ-
नादाहृतेन सखि नारदनामभाजा ।
मत्तेन मुग्धवदकारि चिराय नृत्तं
यत्तेन किं न विदितस्तव गीतभूमा ॥ ३१ ॥

मुक्ताफलाश्रिततुलैः श्रमवारिलेशै-
र्व्याप्तं तदाननमुदीक्ष्य हृदा द्रुतेन ।
सद्यो हृतैः सहृदयाः सरसैः सखायः
संवीजयन्ति सहसाऽद्य सरोजपत्रैः ॥ ३२ ॥

लास्योपदेशचतुरः सुमनोलताना-
मम्भोजिनीपरिचयाधिगतातिजाड्यः ।
खेदेन कान्तमधुना मधुना यथाब्जं
तस्याम्ब चुम्बति घनं वदनं समीरः ॥ ३३ ॥

उत्कण्ठितेन नववारिधरभ्रमेण
बर्हं वितत्य विपुलं विटपाग्रभाजा ।
श्रान्तं समीक्ष्य सुचिरं किल नन्दपुत्रं
कान्तं धृतं सुकृतिना शिखिनाऽऽतपत्रम् ॥ ३४ ॥

गीतामृतं श्रुतिपुटैः सुखिता निपीय
वीताः शुचा सखि कृतज्ञतयास्य गावः ।
तान्तं परं तरणितप्तमिवाप्य पद्मं
रम्यं पदं रसनया निजया लिहन्ति ॥ ३५ ॥

कृष्णेन वत्सलतमेन विमुक्तबन्धाः
गीतामृताकलनतोऽप्यपनीतशोकाः ।
गावोऽतिविस्तृतरसज्ञतया तदीयं
पादाब्जमाप्य न जहत्यमृताग्निहेतुम् ॥ ३६ ॥

मोदाश्रुपूरशिशिरं सुरभिं प्रसूना-
सारं विकीर्य मुदिता वनदेवतास्तम् ।
दृष्ट्वा चिरं स्मरसमं सखि संस्तुवन्ति
भाग्यं परं निजदृशामनिमेषहेतुम् ॥ ३७ ॥

भाग्येन पूर्वभवकोटिभवेन हित्वा
कारागृहानिव गृहान्सखि निर्गतानाम् ।
कृष्णात्मनां चरणपल्लवमम्ब कुर्या
वन्द्यं वतंसमिव वल्लवकन्यकानाम् ॥ ३८ ॥

कोपाकुलाः प्रसभमेव गतासु गेहाद्
गोपाः कुलानुचितमार्गमितासु यासु ।
कृष्णस्य वीक्ष्य पुरतः कलितस्मितास्ताः
धृत्वा करेण ननृतुः स्ववधूः प्रशस्य ॥ ३९ ॥

अद्योल्लसत्तनुतरङ्गकराग्रसंज्ञां
कृत्वा कलिन्दतनयाजलखेलनाय ।
कृष्णं तमाह्वयति हृष्टसरोजवक्त्रा
मुष्णन्तमम्बुदमदं महसा निजेन ॥ ४० ॥

कृष्णा निजान्तिकजुषः कुरुते सपर्यां
कृष्णस्य सा कुसुमपूर्णतरङ्गहस्ता ।
कान्तां कथां कलविहङ्गरवैरुदीर्य
मन्दानिलेन मधुपूरभृताम्बुजानाम् ॥ ४१ ॥

विस्तीर्णलोलतरशीततरङ्गहस्ता
संश्लिष्य तुल्यरुचिमद्य कलिन्दकन्या ।
कृष्णं रसान्तरनिमीलितमीननेत्रा
धन्या परं वितनुतेऽतनुतापहानिम् ॥ ४२ ॥

संघर्षतः सखि कुलेन समं सखीनां
पूरे पुमान्स हि परः प्लवते तटिन्याः ।
सर्वाङ्गसङ्गमुदितास्य पदाग्रलग्नां
भागीरथीं हसति सा किल फेनभूम्ना ॥ ४३ ॥

कल्लोलकैतवचलाचलडोलया तं
कान्तं विनोदयति कान्तमियं नितान्तम् ।
स्रोतोहृतेन सुमनोनिचयेन चैनं
संसज्जितेन समलंकुरुतेऽतिवेलम् ॥ ४४ ॥

अस्मादृशा सुकृतिदुर्लभमङ्गसङ्ग-
मस्याप्य तातकरकल्पितयोपकृत्या ।
फेनैर्जडा परमियं परिहस्य सा नः
सत्यं सरित्सरति मन्दमहो मदेन ॥ ४५ ॥

मूले द्रुमस्य सखि दिव्यतरूपमस्य
शीतं शिलातलमवाप्य मुदोपविष्टः ।
पादाम्बुजाकुलितनिर्झरवारिपूरो
दामोदरो भजति दाधिकमन्नमद्य ॥ ४६ ॥

शोणाम्बुजातरुचिरेऽम्ब विधाय वामे
पाणावतुल्यरुचि तद्दधिसिक्तभक्तम् ।
पश्यन्निजान्परिहसन्पुरुषः पुराणो
रस्यं रसालकलितं भजते चिराय ॥ ४७ ॥

निश्चित्य निर्मलधियोऽप्यमृताधिकं तं
विश्वेश्वरस्य विघसं ननु लब्धुकामाः ।
नाकालयैः सममसी मुनयो महान्तः
काकादिरूपमधिगत्य चरन्त्यदूरे ॥ ४८ ॥

बालैः पुराजनिषु किं सुकृतं कृतं तै-
रेकान्तदास्यमहितैर्यदुवंशकेतोः ।
योगीश्वरैरपि यतैः सुचिरं यदीयं
संचिन्त्यते परममम्ब परं पदाब्जम् ॥ ४९ ॥

शीतीकरोति सुकृती तरुमूलमेकः
सज्जीकरोति कुसुमैः शयनीयमन्यः ।
ऊरू परोऽप्युपहरत्युपधानभावे
संवाहयत्यपि परश्चरणौ चिराय ॥ ५० ॥

(अनुवर्त्ति)

आपद्दीपः

पि. एस्. सुब्बरामपट्टर्

निळानदीतोयपवित्रितेषु
श्रीलास्यरङ्गेषु मनोहरेषु ।
पुरातनेऽनेहसि केरलेषु
वृत्ता कथा वृद्धमुखाच्छ्रुतेयम् ॥ १ ॥

शैलाब्धिनाथस्य[1] विशालकीर्ते-
रारोग्यसंरक्षणजागरूकः ।
भिषग्वरो भूमिसुरः पुराऽभूत्
वार्तान् वितन्वन् निजविद्विषोऽपि ॥ २ ॥

चिरप्रसन्नेन कुतोऽपि हेतो-
र्निष्कासितो भूपतिना स्वगेहात् ।
विदूनचेताः स विहाय हीनान्
दारान् सुतां चापि दिवंगतोऽभूत् ॥ ३ ॥

प्रवासदण्डादथ लोकवाद-
श्रुतात्परित्रस्तनिजान्तरङ्गा ।
वैद्यस्य जायापि विमुच्य वेश्म
देशान्तरं गन्तुमियेष गूढम् ॥ ४ ॥

दास्या स्वया बालिकया दुहित्रा
श्वश्र्वा जरद्धावजुषा च साकम् ।
दिनान्तदेवालयशङ्खनादं
श्रुत्वा गृहात् प्रास्थित वैद्यपत्नी ॥ ५ ॥

किरातमूर्तेः कुलदैवतस्य
संपूजिता या प्रतिमा स्वगेहे ।
तामेव सर्वं वसु मन्यमाना
वैद्यस्य जाया जगृहे स्वहस्ते ॥ ६ ॥

---

1. सामूतिरिः (Zamorin) इति ख्यातस्य कुक्कुटक्रोड (Calicut) नृपतेः ।

'सर्वत्र गोपायतु सङ्कटेभ्यो
दयानिधिर्दिव्यकिरातमूर्तिः ।'
इत्यर्थयित्वा निशि निःसहाया
सा दक्षिणं देशमभिप्रतस्थे ॥ ७ ॥

उत्तीर्य सह्याद्रिसुतां निळां ताः
जवेन जानुद्वयसप्रवाहाम् ।
निर्दिष्टमार्गाः पथि सस्यसेक-
विधायिभिर्दक्षिणतीरमापुः ॥ ८ ॥

ता बालचन्द्रस्य करैः स्वमार्ग-
मालक्ष्य खिन्नेन पदा चरन्त्यः ।
विसृज्य राज्यं कुपितस्य राज्ञः
पदं न्यधुः सीमनि माटभूमेः[1] ॥ ९ ॥

निशाकरे चास्तमिते समन्ता-
द्दिशान्तराले तमसावृते ताः ।
निशीथिनीं यापयितुं द्विजानां
निशान्तमन्वेष्टुमुपाक्रमन्त ॥ १० ॥

तस्मिन् क्षणे कोऽपि नरोऽविदूरा-
दायान् समालक्ष्यत दीपहस्तः ।
उत्पादयन् प्रत्ययमाशु तासा-
मसौ बभाषे द्विजयोषितस्ताः ॥ ११ ॥

'निशीथवेलासु सहायहीना
विपद्गताः संचरथेह नूनम् ।
अनेन दासेन किमस्ति किंचित्
साहाय्यमाधेयमतन्द्रितेन ॥ १२ ॥

विलोक्य पुंसो विनयप्रकर्षं
श्रुत्वानुकम्पामसृणां च वाणीम् ।
प्रकाशलाभेन विवृद्धतोषा
योषाः सविश्वासमवादिषुस्तम् ॥ १३ ॥

---

1. इदानीं 'कोचि' इति विदितस्य देशस्य ।

'पलायिता राजभयेन तान्ता-
स्तृषा क्षुधा चाध्वपरिश्रमेण ।
नीत्वाऽशु विप्रालयमन्तिकस्थं
संत्रातुमर्हस्यबला दयालो ॥' १४ ॥

अभ्यर्थितोऽसौ महिलाभिरेवं
तासां पुरो न्यस्य निजं प्रदीपम् ।
क्षणात्समानीय ददौ फलानि
केराणि च स्वादुजलानि ताभ्यः ॥ १५ ॥

हृद्यानि भुक्त्वा कदलीफलानि
पीत्वा च केरस्य जलं सुशीतम् ।
पुनः प्ररूढेन बलेन सर्वाः
सहायमाकस्मिकमन्वगच्छन् ॥ १६ ॥

वने विविक्ते चरतो जनस्य
विपत्सु साहायकमादधानम् ।
आत्मानमावेदयदप्रजानां
कृताश्रयं वेश्मसु दीपवाहः ॥ १७ ॥

कथाः स चित्राः कथयन् नराणां
स्वरक्षितानां पथि भीतिभाजाम् ।
आश्वासयामास वधूजनं तं
विषादिनं साध्वसलुप्तधैर्यम् ॥ १८ ॥

विस्रम्भपात्रस्य नरस्य चासां
मिथः स्ववार्ताविनिवेदनं यत् ।
तदेव विस्मारयति स्म दैर्घ्यं
कालाध्वनोः क्लेशकरं प्रयाणे ॥ १९ ॥

न ग्लानिरासीन्निशि पादचारात्
न चापि निद्रालसता यदासाम् ।
अभूतपूर्वं तममंस्त वृद्धा
प्रसादमीशस्य किरातमूर्तेः ॥ २० ॥

अत्रान्तरेऽजायत कापि वात्या
प्रदीपनिर्वापणदक्षवेगा ।
तथापि तद्दीपशिखामकम्पां
दृष्ट्वा परं विस्मयमापुरेताः ॥ २१ ॥

इत्थं व्रजन् पान्थगणस्तुरीये
यामे रजन्याः सुखमाससाद ।
श्रीमद्वृषाद्रीशपुरस्य पूर्व-
भागे गृहं शून्यजनप्रचारम् ॥ २२ ॥

अपावृणोदर्गलितौ कवाटौ
तद्गेहवासीव स दीपवाहः ।
विन्यस्य दीपं च गृहान्तरेऽसौ
विज्ञापयामास विनीतभावः ॥ २३ ॥

विप्रस्य कस्यापि विधेः प्रभावात्
विनष्टवंशस्य निकेतनेऽस्मिन् ।
वसन्तु भद्राः! सततं भवत्यो
निरस्तभूपालभयाः स्वतन्त्राः ॥ २४ ॥

यावद् गृहारामगते तटाके
स्नानं भवत्यः सुखमाचरन्ति ।
तावत् त्वदाहारविधानयोग्यं
पदार्थजातं प्रहिणोमि सर्वम् ॥ २५ ॥

अहं च भोक्तुं स्वयमागतः स्या-
महन्यहन्यत्र भवत्सकाशम् ।
इति ब्रुवाणोऽयमगादगारा-
द्विपन्नसंत्राणविवृद्धहर्षः ॥ २६ ॥

यदृच्छयाऽऽपद्गतरक्षणेन
प्रदर्शितौदार्यमहिम्नि पुंसि ।
अन्तर्हिते गेहदिदृक्षया सा
वैद्यस्य पत्नी त्वरते स्म कामम् ॥ २७ ॥

गृहाण दीपं तमिति स्वपुत्री-
मादिश्य देवं हृदि भावयन्ती ।
प्रावेशयत्तां प्रथमं गृहान्तः
साध्वी स्वयं विस्मृतसर्वखेदा ॥ २८ ॥

परं तु बाला तनया प्रवृत्ता
यावत् समादातुममुं प्रदीपम् ।
अदृश्यतासौ भुवि हन्त ! ताव-
न्निखातवन्निश्चलतामुपेतः ॥ २९ ॥

दृष्ट्वा तदत्यद्भुतमभ्यजान-
न्नीशस्य लीलेयमिति प्रहृष्टाः ।
स्मृत्वा निशावृत्तमदभ्रभक्त्या
सर्वाश्च बद्धाञ्जलयो बभूवुः ॥ ३० ॥

भिषक्तमं यं श्रुतिराह देवं
गोपायिता तेन कुमारिका सा ।
विप्रेण केनापि भिषग्वरेण
पाणौ कृता वंशकरी बभूव ॥ ३१ ॥

एवं स्वभक्तानुजिघृक्षया यो
दधार देवो विपदि प्रदीपम् ।
अद्यापि नैवेद्यसमर्पणाद्यैः
स पूज्यते वैद्यगृहे सतीभिः ॥ ३२ ॥

भयचकितमनाथं वैद्यवंशं विषण्णं
स्वविषयमुपयातं माटभूपोऽपि शक्तः[1] ।
विविधविभवदानैः पोषयामास पश्चा-
दिति ह वदति वार्ताकोविदो वृद्धलोकः ॥ ३३ ॥

---

1. शक्तः इत्यौपाधिकेन नाम्ना प्रथितः ।

सुभाषितानि

रतिनाथ झा

भ्रातर्नाविक! दुस्तरामतितरां कल्लोलिनीं लङ्घितुं
श्लाघ्यानेव जनान् सतामभिमतान्नावि त्वमारोहयेः।
चेदेकोऽपि दुरन्तपातककुलानुष्ठाननिष्ठो जनो
दैवादत्र समेति हन्त! सुजनैः सार्धं तरिं मज्जयेत् ॥ १ ॥

माकन्द! त्वदुदारतामिव महाशाखां विशालां श्रयन्
दिग्भ्योऽभ्येत्य खगः परस्परमतिप्रेमाङ्कुरं वर्धयन्।
कीर्त्तिं ते सकलासु दिक्षु वितरंस्त्वत्कोटरस्थायिना
सर्पेण प्रतिहन्यते यदि ततः कीदृग् यशस्ते भवेत् ॥ २ ॥

उत्फुल्लैः कमलैर्मरन्दमुदिरैर्गुञ्जद्भिरेवालिभि-
र्हंसैः सारसमण्डलैर्मुखरितैः सच्चक्रवाकैर्द्विजैः।
लक्ष्मीं कामपि बिभ्रदुज्ज्वलजलै रम्यं समृद्धं सरो
दुर्भाग्यायतनं करोति नितरामेकोऽपि भेको वसन् ॥ ३ ॥

नीचाः सन्ति सहस्रशोऽधिभुवनं किन्तु क्षमाक्षामता-
हेतुः श्येन! भवादृशो न विदितो बन्धून् मुधा मारयन्।
नो रक्तासवपानपीनपरमोत्कण्ठा न मांसाशन-
प्रीतिस्फीतरुचिश्च तेऽस्ति तदपि क्षीणान्निहंसि द्विजान् ॥ ४ ॥

स्तम्भे निःसारतैवानिलमिलनवशाद्दीर्यते ते सुपत्रं
वन्ध्यत्वं जीवनस्य प्रकटयति फलोत्पत्तिराद्यैव सद्यः।
नो छाया नापि शाखा न खलु सुमनसः सौरभं लोभनीयं
रम्भे, किं गर्वगन्धं भजसि निजमनस्याशु नश्यद्विभूत्या ॥ ५ ॥

कीर्त्तिः का तव का च सिद्धिरतुला विश्वस्य सम्प्रीणने
काये का सुषमा सुदुर्लभतरा का लोककाम्या स्थितिः।
लक्ष्मीः का वनदेवतास्तुतपदा का माधवाराधिता
शोभा तेऽस्ति पिकेति पृच्छति मुहुः काकाध्वनिर्वायसः ॥ ६ ॥

सच्छायद्रुमकृन्तनाय परशुर्दग्धोऽपि वैश्वानरे
भूयश्चायसपिण्डताडनसहस्तीक्ष्णो भवन् भ्राजताम् ।
तावन्नैव भयं ततो न लभते यावत्स तक्ष्णः करं
दुष्टः किन्तु परापकारकरणे ह्येकोऽप्यनीकायते ॥ ७ ॥

ये स्वार्थप्रतिपत्तये प्रतिपलं नव्यानभव्यानपि
प्रह्वीभूय महाप्रभूननुनयन्त्युच्चावचैः कर्मभिः ।
निन्द्यास्तेऽपि परन्तु हन्त सुजनोत्कर्षासहिष्णुः खलो
व्यर्थं सर्वहितक्षयाय विचरन् गर्हास्पदं जीवति ॥ ८ ॥

प्रीतिर्मास्तु परानुरक्तहृदये दाक्ष्यानभिज्ञप्रभो-
र्मा सेवावसरोऽस्तु दैन्यविनतिः नैवास्त्वदातुः पुरः ।
श्रद्धा दम्भिनि मास्तु मास्त्वरसिके काव्यामृतप्रापणं
वैमुख्यं परमेश्वरान्न भवतु ब्रह्मन्निति प्रार्थये ॥ ९ ॥

वन्यं स्वादुतृणं न लभ्यमधुना ग्रासो न घासस्य ते
प्राप्यं नैव कडङ्गरं न सुरभे पेयं जलं शीतलम् ।
नो पूजा न समादरो न परमा सेवा न रक्षात्रतं
चित्ते नैव विचिन्त्यतां शुनि यतो रक्तः प्रभुः साम्प्रतम् ॥ १० ॥

कालिदासः

विश्वनाथ भट्टाचार्यः

भारतीवरपुत्रस्त्वं त्वां नमामो महाकवे !
ज्योतिस्तेऽद्यापि विमलं चित्तं पुलकयत्यलम् ।
न जानीमः कदा कुत्र गृहीत्वा त्वं निजां जनिम्
अद्राक्षीर्धरणीमेनां दुःखविच्छेदविह्वलाम्—

सा दृष्टिस्ते निरुपमा परमप्रेमपूरिता
भासयामास मधुरं कृत्स्नं मानवजीवनम् ।
—कुत्र का कन्यका श्लाघ्यं पतिमाप्तुं तपस्यति
गान्धर्वविधिनोढा का पत्या रूढं विसर्जिता ॥

राजानः के शौर्यवीर्यदयाधर्मसमुज्ज्वलाः
मातृभूमिं समुद्धृत्य शीर्षस्थाने व्यतिष्ठिपन्
कश्च यक्षः पराधीनः प्रियाविरहकातरो
विलपन् याचते मेघं गिरा मर्मस्पृशा पुनः—

एवं ते भारती साऽस्मानानन्दह्रतवेदनान् ।
धन्यीकरोति नित्यं भोस्तेन तुभ्यं नमो नमः ॥

मुकुलगीता

बोम्मकण्टि श्रीनिवासाचार्यः

अपचिनु मुकुलं नवोत्थमेत-
न्न खलु विभो तव संशयोऽत्र कार्यः ।
ननु मुकुलमिदं त्वयैव सृष्टं
भवतु तदीश पुनस्तवैव भोग्यम् ॥ १ ॥

विकसनविभवे न कामना मे
विकसितवत्यपि सौरभेण लोकान् ।
जितवति च विभो प्रसीद मह्यं
कथय फलिष्यति किं कथावसाने ॥ २ ॥

क्षणविभवमुपेत्य सर्वमुर्व्यां
विगलितमेव सुमं ध्रुवं प्रणश्यम् ।
मम परिमल इत्यहं मतिर्मे
न भवतु नाथ मदल्पजीवनेऽस्मिन् ॥ ३ ॥

विरचनसमये त्वदङ्गुलीषु
क्षणसुखमापि यदद्य न स्मरामि ।
अपचयसमयेऽपि सौख्यमेत-
त्तव नखपीडनजं विभो लभेय ॥ ४ ॥

संसारचित्रम्

अ. वि. काणे

प्रवक्ष्यामि त्वां मे कठिनतरदुःखं हृदि गतं
यदेतन्मे नूनं सखि दहति चेतः प्रतिदिनम् ।
प्रणष्टं मे सौख्यं कविकरगतायां मयि चिरं
कवित्वं भर्तुर्मे भवसुखविनाशाय भवति ॥ १ ॥

वरं जातो भर्ता कृषिविषयपारङ्गतयुवा
वरं व्योकारो वा श्रमजनितघर्मार्द्रिततनुः ।
वरं हट्टोरो वा हयरथसुवाहः प्रियकरो
वरं निर्माता वा बहुविधघटानां न तु कविः ॥ २ ॥

प्रियं किंचित् स्वप्ने न कृतमपि तेनापि खलु मे
न योग्या तस्यैव 'प्रियकर'सुसंज्ञेति सुभगे ।
अनर्हा पत्युर्मे 'रमण' इति नामोच्चसरणिः
स्वजायायां नैकक्षणमपि हि यो जातु रमते ॥ ३ ॥

निशा या भूतानां तदपि मम भर्तुर्दिनमिव
तमिस्रा सा पत्युर्यदपि सकलानामथ दिनम् ।
तदीयं चारित्र्यं भगिनि विपरीतं स्मृतमिदं
किमर्थं सृष्टाऽसौ कथय कविजातिर्हि विधिना ॥ ४ ॥

असौ स्थाने स्थाने नगरविशिखायां नृपगृहे
श्मशाने वोद्याने विपिनगहने देवसदने ।
नदीतीरे किं वा सखि जलधितीरे मम पति-
र्व्रजत्युच्चैर्गर्जन् स्वकृतकविता हन्त विकिरन् ॥ ५ ॥

क्वचित् पुष्पासक्तः क्वचिदपि लताकुञ्जनिरतः
क्वचिद् भुङ्क्ते रम्यं हरिततृणसंदर्शनसुखम् ।
अजापुत्रे किं वा क्वचिदपि खरस्यापि तनये
स सद्भावासक्तो भवति मयि तु प्रेमरहितः ॥ ६ ॥

विना कान्तां गेहं यदपि घनकान्तारसदृशं
गृहं मे सञ्जातं यदपि सकलत्रं वनमिव ।
मदीया भो ब्रह्मंस्तवचरणपद्मे नतिरियं
क्वचिन्मा कन्यायाः शिरसि लिख भर्ता कविरिति ॥ ७ ॥

*पुरुसिकन्दरीयम्

दिनेश प्रसाद पाण्डेयः

सरन् सिकन्दरश्चैव पर्वतीयपथेन सः ।
सिन्धुतीरमनुप्राप्तः भारतस्य जिगीषया ॥ १ ॥

नदीपारं ततो यातुं समस्थानेऽटलान्तिके ।
स्वसैन्यबलयोगेन सेतुमेकमकारयत् ॥ २ ॥

पारं नागतवान् यावत् सिन्धोरङ्गीचकार वै ।
तावदेवास्य स्वामित्वमाम्भी तक्षशिलाधिपः ॥ ३ ॥

प्राप्ते सिकन्दरे तत्र सम्राट्सदृशमुत्तमम् ।
मानं धनं च सौविध्यमाम्भी तस्मै न्यवेदयत् ॥ ४ ॥

एतेनोत्साहितो ग्रेक्को वर्द्धमानः सिकन्दरः ।
तदाधिपत्यं स्वीकर्तुं सन्देशं प्राहिणोत्पुरुम् ॥ ५ ॥

पुरुर्निर्भय एवास्मै सन्देशं प्रत्यवतर्यत् ।
मुखताडोत्तरं यच्छन्युद्धार्थं च समाह्वयत् ॥ ६ ॥

क्षत्रियोऽहं न भीतोऽस्मि निर्बलो न च कातरः ।
युद्धस्थले मिलिष्यामि नाहं कुम्मणपुष्पजः ॥ ७ ॥

क्षत्रिया युध्यमानाः स्वप्राणैः कण्ठगतैरपि ।
पलायन्ते न, पृष्ठं स्वं दर्शयित्वाऽहवस्थले ॥ ८ ॥

रसनेत्रभवाक्ष्यब्दे (३२६ ई० पू०) पुरेशाद् स सिकन्दरः ।
वितस्तातटमभ्येत्य तस्थौ तत्र बलैस्सह ॥ ९ ॥

प्रतीक्षमाणं तत्रासौ पुरुं दृष्ट्वा तटान्तरे ।
चतुरङ्गबलोपेतं विस्मितः स्तम्भितोऽभवत् ॥ १० ॥

विभीता शङ्किताऽतिष्ठत् सेना यूनानिनां चिरम् ।
परं नावसरं लेभे कर्तुमाक्रमणं पुरः ॥ ११ ॥

---

* रचयितुः भारतवर्षेतिहासनाम्नो महतः प्रबन्धादुद्धृतोंऽशः ।

यूनानिसैनिका नद्या उपर्यंशे च कुत्रचित् ।
पारमज्ञातरूपेण ससमारम्भमागताः ॥ १२ ॥

भयमापेदिरे दृष्ट्वा सहसा तान् समागतान् ।
सीमाप्रहरिणः शूरा भारतीयाः विचम्पिताः ॥ १३ ॥

वितस्तायुद्धमारब्धमुभयैस्सैनिकैर्महत् ।
अयुद्धयन्त महोत्साहाः भारतीयाः पदातयः ॥ १४ ॥

असिभल्लैर्धनुर्भिश्च षड्हस्तमितसायकैः ।
तोमरैर्भिन्दिपालैश्च सन्नद्धा विविधायुधैः ॥ १५ ॥

दक्षाः शरप्रयोगेषु सफलाः लक्ष्यभेदिनः ।
विभिद्य कवचं बाणा रिपूणां प्राविशन् वपुः ॥ १६ ॥

गजवाजिरथानीकैः सज्जितास्तु पदातयः ।
विविधायुधयुक्तैश्च समवेताः समन्ततः ॥ १७ ॥

दर्शयन्तो महत् शौर्यं रणे पौरवसैनिकाः ।
अयुद्धयन्तान्तिमं यावत् क्षणमन्ते पराजिताः ॥ १८ ॥

सिकन्दरस्य सेनायाः योद्धारश्छलमाश्रिताः ।
पुरुसेनां समाविश्याचरन् कर्म विनिन्दितम् ॥ १९ ॥

पदानि हस्तिनां खड्गैः बाणैश्चक्षूंषि निर्भयम् ।
छिन्नानि च विभिन्नानि उन्मत्ता हस्तिनोऽभवन् ॥ २० ॥

इतस्ततः प्रधावन्तो मर्दयन्तः स्वसैनिकान् ।
घोरः कोलाहलो जातः येन सर्वे पलायिताः ॥ २१ ॥

परमेकः पुरुस्तत्राचलस्तिष्ठन् निजासने ।
युद्धयमानो दृढो बाणैः स्वपौरुषमदर्शयत् ॥ २२ ॥

चिरं युध्वा महान्वीरः एकाक्येव रणाङ्गणे ॥
पपात मूर्च्छितो भूमौ हत्वानेकारिसैनिकान् ॥ २३ ॥

अस्यामेव दशायां स बन्दी जातोऽरिसैनिकैः ।
आनीतः पुरतस्तत्र यत्रासीत्स सिकन्दरः ॥ २४ ॥

पुरो दृष्ट्वा पुरुं वीरं स जहर्ष जहास च ।
अहङ्कारविमूढात्मा प्रोत्फुल्लो विजयी नृपः ॥ २५ ॥

पप्रच्छ नरशार्दूलं विहसन्तं पुरुं सुखम् ।
वदेदानीं त्वया साकं वर्तितव्यं कथं मया ॥ २६ ॥

पप्रच्छ विहसन् सम्राट् निगृहीतं पुरः पुरुम् ।
त्वया सह विधेयोऽस्ति कीदृशो न्याय उत्तमः ॥ २७ ॥

त्वमेव वद दण्डार्हः कीदृशं दण्डमर्हसि ।
साम्प्रतं निगृहीतोऽसि वशे मे त्वं स्थितोऽधुना ॥ २८ ॥

उवाच निर्भयो राजा मितसस्मितवाचया ।
भगवन् किं मया वाच्यं कुरु यादृक् समीहसे ॥ २९ ॥

मम दण्डो मया वाच्यः इत्येव महती कृपा ।
निर्धारयतु तद्दण्डं यथा न्यायोचितं भवेत् ॥ ३० ॥

परमेतन्मया वाच्यं यदि मां पृच्छसि प्रभो ।
क्षत्रियोऽहं न भीतोऽस्मि यद्वा तद्वा भवेन्नु किम् ॥ ३१ ॥

क्षत्रियो न विभीतोऽस्ति प्राणैः कण्ठगतैरपि ।
क्षमां न याचते राजन् न वा युद्धात्पलायते ॥ ३२ ॥

शूरश्च कृतविद्यश्च निष्णातः स्वेषु कर्मसु ।
क्षमां न याचते राजन्न वा भीतः पलायते ॥ ३३ ॥

सुखं वा यदि वा दुःखम् आयाति विधिनेरितम् ।
धैर्येण सहते सर्वं वैक्लव्यं न प्रकाशते ॥ ३४ ॥

राष्ट्ररक्षार्थमेवाहं युद्धयमानो रणाजिरे ।
निगृहीतोऽस्मि भो राजन् कपटैस्तव सैनिकैः ॥ ३५ ॥

अन्ते न्यवेदयद् राजा कुरु राजन् यथेप्सितम् ।
यथा व्यवहरेद् राजा राजानं प्रति मां तथा ॥ ३६ ॥

एतेन साहसमयेनोत्तरेण सिकन्दरः ।
प्रसन्नः सुमुखो भूत्वा जगाद मधुरं वचः ॥ ३७ ॥

पुरो ! तेऽहं प्रसन्नोऽस्मि निर्भीकेणोत्तरेण ते ।
भवन्ति निर्भया एवं जगत्यां विरला नृपाः ॥ ३८ ॥

प्रतिगृह्णीष्व राज्यं स्वं न मे किंचित्प्रयोजनम् ।
ममोद्देश्यं न राज्याप्तिः भुङ्क्ष्व राज्यं यथासुखम् ॥ ३९ ॥

राज्याद् राज्यं जयन्नित्यं विजयोन्मादपूरितः ।
समस्तं भारतं जेतुं ग्रेक्कराडुपचक्रमे ॥ ४० ॥

गत्वा चीनाब्नदीपारं जित्वा भ्रातृसुतं पुरोः ।
कनिष्ठं पौरवं शीघ्रं पुरवे तन्न्यवेदयत् ॥ ४१ ॥

ग्लाउसाई विराज्यं च एवमेव सिकन्दरः ।
जित्वा समस्तं तद् राज्यं पुरुराज्ये न्यमेलयत् ॥ ४२ ॥

रावीचीनाबयोः पारं विनाऽऽयासं विना श्रमम् ।
यूनानिनः समागत्य युयुधुः बहुभिर्नृपैः ॥ ४३ ॥

तेषु मुख्यं कठं राज्यं प्रतिरक्षादृढव्रतम् ।
शौर्यवीर्यसमायुक्तं दृष्ट्वा क्रुद्धः सिकन्दरः ॥ ४४ ॥

कठस्य संगलं प्रीतम् तोडयित्वातिदुर्गमम् ।
भूमिसात्कृतवान् दुर्गं शुभ्रं चातिपुरातनम् ॥ ४५ ॥

कठाः पराजिताः जाता दुर्गं चापि विनाशितम् ।
परं तेषां बलैः वीर्यैः श्रान्ता यूनानिनः कृताः ॥ ४६ ॥

हतोत्साहाश्च निःसाराः कृता युद्धपराङ्मुखाः ।
इत्थं क्लान्ता निरुत्साहाः शस्त्रास्त्राणि प्रचिक्षिपुः ॥ ४७ ॥

ततोऽग्रे विजिगीषार्थं पुरो गन्तुं न तत्पराः ।
पुरो गन्तुं नृपादेशं न स्वीचक्रुः समन्विताः ॥ ४८ ॥

ओजस्विभाषणं कृत्वा सोत्साहान् निजसैनिकान् ।
कर्तुं स्तुवंश्च तच्छौर्यमव्यवस्यत् सिकन्दरः ॥ ४९ ॥

परं प्रभावो नो जातः सैनिकेषु मनागपि ।
श्रुतमप्यश्रुतं कृत्वा आचेरुर्जडवद्यथा ॥ ५० ॥

निखिलान् विफलान्वीक्ष्य तेषूपायांश्च तान्भटान् ।
सिकन्दरः परिश्रान्तः स्वदेशाय समादिशत् ॥ ५१ ॥

"देवविकटम्"*

सुब्रह्मण्यभारती - अनु० एन्. बालसुब्रह्मण्यः

नारदः कैलासमाजगाम। नन्दिकेशस्तं वीक्ष्य, "नारद, भोः, नायमवसरो भगवद्दर्शनस्य । अन्तःपुरे भगवान् देवी च संल्लापव्यग्रौ । यामादूर्ध्वमेव द्रष्टुं शक्ष्यते । तावत्पर्यन्तमत्रैवास्यतां, कमपि वार्तालापं करवाव" इत्यभिदधौ । तथैव नारदो दक्षिणेन निषसाद । तत्र तदा गणेशोऽप्याययौ । पार्श्वस्थं भूतगणेष्वेकं विलोक्य नन्दी आज्ञापयामास "त्रिंशच्छकटेषु मोदकजातं, त्रिंशतकुम्भपूर्णं पायसं, शकटेनैकेन सपूगं ताम्बूलं चानीयताम्" इति ।

निमेषमात्राद्भूतगणस्स भक्षणादीन्समुपानिनाय । गणेश ईषच्छ्रम-परिहारं चक्रे । नारदस्तु एकं मोदकं भक्षयित्वा चषकार्धं जलं पपौ । नन्दिकेश्वरः पार्श्वस्थं गोणीद्वयमात्रं कार्पासबीजं, गोणीद्वयमितं चणकं तथैव गोणीद्वयमितं माषं, द्वित्राणि घासकूर्चानि च एकतृणवन्निगीर्य स्वल्पमुदकं चाजहार ।

तदनन्तरं वार्तालापः प्रचक्रमे ।

गणेशः—पप्रच्छ "किं भो नारद! समीपकाले क्वापि इतेरतरकर्ण-जापः कृतो भवता? कुत्रापि कलहः प्रवर्तितो वा?"

नारदो वक्ति—"न तावत् भगवन्। तादृशं व्यापारमेव उज्झितास्मि। अद्यत्वे देवासुराणामन्तरा कलहेन्धनोद्योगादहं विरतकल्पः । मनुष्येष्वेव किञ्चित् कुर्वन्नस्मि ।

गणेशः—नचिराद्वृत्तं किमप्याख्याहि ।

नारद आख्याति—

---

* द्रमिडभाषायां स्वातन्त्र्यकविरिति सुप्रसिद्धस्य सुब्रह्मण्यभारतीनाम्नः कवेः गद्यरचनास्वन्यतमोऽयं प्रहसनप्रायः काल्पनिकः कथानिबन्धः । 'विकटम्' इत्यस्य संस्कृतशब्दस्य द्रमिडभाषायां हास्यप्रायः वाङ्मयो विनोद इत्यर्थः । 'बिकटकवि' रिति विदूषक उच्यते ।

विष्णुपुरे कोऽपि श्रेष्ठी, स महालोभी। तञ्जापुरीयः कोऽपि 'शास्त्री' (पौरोहित्योपजीवी विप्रः), स अतीव गर्वी ।

श्रेष्ठिनो धनव्ययस्य गुरूकरणं ब्रह्मबन्धोर्दर्पस्य लघूकरणं यथा स्यात्तथा कर्तव्यमिति मतिर्मेऽजायत । षण्मासेभ्यः पूर्वं परिगृहीतेयं योजना, ह्य एव समाप्तिं गता ।

प्रथमं तावत्तं ब्राह्मणकं विष्णुपुरमानाययम् ।

गणपतिः—कथमिव ?

नारदः—श्रेष्ठिनः स्वप्ने प्रादुर्भूय "तञ्जापुरे अमुकवीथ्यां अमुकनामा पुरोहितो वसति; तं वृणीष्व, स ते बहुविधानां दोषानां शान्तीर्निर्वर्त्य, पुत्रोत्पत्तिं विधास्यति" इति अब्रवम् । तथैव "श्रेष्ठिनमाश्रय, तव धनसमृद्धेः कीर्तिप्ररोहस्य च मार्गोऽस्ति" इति ब्राह्मणस्य स्वप्नेऽवोचम् । यावता श्रेष्ठिहस्ताल्लेखो न प्राप्तः तावतैव ब्राह्मणकः विष्णुपुरे श्रेष्ठिगृहमागतः । श्रेष्ठी पुत्राकामेष्टिं कर्तुमारेभे । ब्राह्मणेन भूयसा दक्षिणा प्रार्थिता । श्रेष्ठी होमं मध्य एव विहाय ब्राह्मणं 'गच्छ, गच्छ स्वगेहम्' इति प्रत्यादिश्य विससर्ज ।

एवंभूते व्यतिकरे, वीथ्यन्तरे कस्मिंश्चिद्भवने संवत्सरमेकं स्थित्वा भगवद्गीताप्रवचनं प्रवर्तयितुं शास्त्रिणं तद्गृहपतिर्धनी निमन्त्रयामास । अस्य धनिनः श्रेष्ठिनश्च मिथः प्रागेव वैमनस्यमवर्तत । तथा हि—श्रेष्ठी स्वस्मै त्रिंशत्सहस्रनिष्कम् ऋणं धारयतीति धनिकेन न्यायस्थले व्यवहारः प्रवर्तित आसीत् । श्रेष्ठी तु, 'सर्वं मया प्रत्यर्पितं, केवलं विश्वासात् प्रत्यर्पितमिति स्वहस्तलेखः ऋणपत्रे न स्वीकृतः, न किंचिदपरं वक्तव्यमस्तीति उत्तरमवादीत् । न्यायस्थले, श्रेष्ठिनो वादस्य युक्तं प्रमाणं न दृश्यत इति, तस्माच्छ्रेष्ठिना यद् धनिकाय व्यपदिष्टं सुवर्णं तद् व्यवहारव्ययेन साकं दातव्यमिति च निरणायि ।

श्रेष्ठिनः कृषिगोरक्षोपजीवकभृत्यवर्गेषु अन्यतमः मद्यपानार्थं किंचिद्धनेच्छुः अमुष्य सकाशमागत्य "श्रेष्ठिनः प्रति कोऽपि ब्राह्मणः "शून्यं"*

* द्रमिडभाषायां व्यवहारे 'शून्य' शब्दः अभिचारप्रयोगे वर्तते ।

प्रयोजयति" इति महामारीदेवताविष्टेन स्वकलत्रेण कथितमिति जगाद । श्रेष्ठिना च सुदृढं चिन्तितं यत् 'स तञ्जापुरीयब्राह्मण एव स्वविरोधिनो गृहे स्थित्वा 'शून्य' - मन्त्रप्रयोगं करोति, तस्मादेव व्यवहारे प्रतिपक्षस्य जयः आत्मनश्च अपजयः" इति । विरोधिगृहे स प्रतिपक्षः, स शास्त्री च मिथः किं भाषमाणौ स्त इति ज्ञातुं मनुष्यमेकं चारकर्मणि न्ययोजयत् । तस्मै निष्कत्रयमदात् । यदायं वेषान्तरचारी मनुष्यः तत्र गत्वा उपश्रृणोति, तदा तौ, शास्त्री गृहपतिश्च, वेदान्तविचारव्यग्रौ आस्ताम् ।

"ब्रह्मैव सत्यम्, इतरत्सर्वं शून्यम्"

इति शास्त्री व्याहरति स्म । उपश्रुत्यैतत्स प्रतिष्कसः श्रेष्ठिसकाशं प्रतिनिवृत्य, "विपक्षं प्रति 'शून्यं' प्रयोक्तव्यम् इति तौ आलपतः" इति कथां कथयामास । "किं शपेथा एतत्सत्यमिति?" इति श्रेष्ठी पप्रच्छ । "आम्, नियतं शपथं करिष्यामि, मदीयश्रोत्राभ्यामेव शास्त्रिमुखान्निःसृतं 'शून्यम्' इति शब्दमश्रृणवम् । शपे च, यदि मे कथितं वितथं, तर्हि मत्कलत्रोपात्तं सर्वमपि ऋणं उन्नतवीथीस्थो देवो विनायकः प्रतिदातुमर्हति" इति स चारः शेपे ।

एवं कथयति नारदे गणेशः सापहासं "अरे! दुष्टहतक! एतस्य कलत्रस्य ऋणानि मया नु किं प्रतिदेयानि! भवतु । उचितं प्रबन्धमेतद्विषये करिष्ये" इत्यमिदधौ ।

उपरि नारदः कथयति—चारगदितं निशम्य श्रेष्ठी स्वविरोधिनः तत्सहायभूतस्य तस्य तञ्जापुरीयशास्त्रिणश्च अतिमात्रं धननाशं मानभङ्गं च आपादयितुं सधैर्यं सङ्कल्पमाददे। जातिस्तेनं कमपि आहूय स्वविपक्षगृहे लुण्टनं कर्तुं तस्य शास्त्रिणः शिखां उत्कृत्य आनेतुं च नियोज्य, कोशलिकरूपेण शतं निष्कानि तस्मै ददौ । एतावत्कालपर्यन्तं श्रेष्ठिनः मलीमसं वेशं मुखभङ्गांश्च दृष्ट्वा तं दरिद्रं मन्वानः स्तेनः, निष्कशते तेन दत्ते, 'सुवर्णनिधि-

रस्यास्ति' इति अधिजगाम । अन्येद्युरेव निशि चतुरश्चोराञ्श्रेष्ठिभवने नियोज्य तत्रस्थं सुवर्णसञ्चयं कृत्स्नमपहारयामास ।

श्रेष्ठिसकाशाल्लब्धस्य अर्थस्य प्रतिकारार्थं किमपि तस्मै प्रतिदातुमनाः स्तेनः तस्यादेशमेवानुसरन् शाङ्खिणः शिखामुत्कृत्य तद्धस्ते समर्पयांचकार । लुण्टनशून्यायां सुवर्णपेटिकायामेव श्रेष्ठी इमं शिखाकलापम् अन्तर्निधाय कुञ्चिकया आघट्ट्य संररक्ष । ब्राह्मणः संशान्तगर्वः तञ्जापुरं प्रतिजगाम । ह्य एव सायं स स्ववेश्मनि उपासीनः "भगवन्! न मया कस्यापि जन्तोः खलीकरणं मनसापि चिन्तितम्! तत्किमुचितोऽयं मे मानभङ्गः?" इति चिन्तयन् प्रलपंश्चासीत् । तदाऽहं भिक्षुकवेषधारी वीथ्यामेवं गायन् प्राचरम्—

"ज्ञानसागरपारगोऽहमिति त्वया बत गर्वितम् ।
मन्दधीरिति सज्जनेऽपि च रूक्षवृत्तिरुपाश्रिता" ॥

इत्थं नारदेन कथिते, नन्दिकेश्वरस्तम्, "अपि एषा कथा तत्त्वतः संवृत्ता, आहोस्वित्कल्पनोद्भूता?" इति पप्रच्छ । "कल्पनैव! कोऽत्र सन्देहः?" इति नारदः प्रत्युवाच । कुपितो गणेशः "किं भोः! तथ्यमिव ननु सर्वमाख्यातवान् भवान्! सत्यमिति मत्वा खलु एतावत्पर्यन्तं कर्णमदाम् । किमेतत्सर्वं विषमा भवतः केलिः?" इति बभाषे ।

"न विषमा केलिः । सकारणमेवाहं मिथ्याख्यानमकथयम्" इति नारद उवाच ।

"किमिति?" इत्याह गणेशः ।

तत्राह नारदः—"नन्दिकेशः कालक्षेपार्थं कामपि कथामाख्यातुमन्वयुङ्क्त । आख्यातवानहम् । भवदनुयोगमपि तत्रान्वयोजयम्" इत्याह ।

"किं, मदनुयोगं प्रहेलिकीकृत्य भवान्नन्दिनमतोषयत्? किमिदं नन्दिन्? कतर आवयोः स्वामिपुत्रः—अहम्, आहो त्वम्?" इति गणेशश्चुकोप ।

नन्दिकेश्वरः सभ्रूभङ्गमवादीत्" गणेश, कियन्मोदकं तुभ्यं दत्तवानहम, सर्वं तन्ननु नैव स्मर्यते त्वया! द्वारपालनं नाम मत्कर्म । यदि तव

कर्तव्यं किमपि नास्ति, कालश्च दुःक्षेपो भवति, तत्स्वनियोगस्थान्किमुपद्रवसि? भगवान् स्कन्दो नैवमाचरति। तस्मिन्नेव मातुर्विशिष्य प्रेम। अपसर त्वमितः। न चेन्मातरं विज्ञापयिष्यामि" इति।

तदा नारदः सहासं "देवेषु कलहोद्दीपनं नाहमद्यापि पूर्णतयोज्झितवान्" इति व्याजहार।

गणेशो नन्दिकेशश्च व्रीडितौ, नारदशिरसि सखेलं मृदु मुष्टिकुट्टनं द्विरकुरुताम्।

नारदस्तदा सहासं व्याचष्टे—ह्यः प्रातरेव बृहस्पतिना सह सँल्लापे प्रवृत्ते स ग्रहचारं दृष्ट्वा मामावेदयामास, यदद्य मज्जन्मराशौ स्वग्रहस्य (बृहस्पतेः) प्रवेशो भविष्यति, तत्फलं किमिति चेत् नन्दिगणेशाभ्यां मुष्टिकुट्टनप्राप्तिरिति। तदाहमवोचं 'न भवद्ग्रहचारा मयि सिध्यन्ती'ति। मिथ आवयोः पणबन्धः संवृत्तः। यदि युवाभ्यां मुष्टिकुट्टनं प्राप्नुयां, तर्हि तस्य बृहस्पतेर्हस्तादशसहस्रपञ्चाङ्गपुस्तकानि मूल्याय क्रेष्यामीति मया ऊरीकृतम्। अथ तस्य वाङ् न फलति, तर्हि मह्यं सुरलोकेऽस्मिन् अस्मिन्नेव मासे षट् संगीतगोष्ठीः सज्जीकरिष्यामीति तेन प्रतिजज्ञे। पश्यतम्, तत्पक्षे जयः! हन्त अयुतं पञ्चाङ्गानि नाम क्रेयाणि मया।"

सानुतापं गणेशोऽप्राक्षीत्—"अयुतं पञ्चाङ्गानि किंमूल्यकानि?

नारद आह "द्व्ययुतनिष्काणि" इति।

सद्य एव गणेशो भूतगणेष्वन्यतममाहूय नारदाय अयुतद्वयनिष्काणि दापयितुमाज्ञापयत्। तथैव तद्भूतं राजस्वकोशपेटिकातः सुवर्णान्यादाय नारदाय दत्त्वा "गणेशकृतो धार्मिको व्ययः" इति आयव्ययपुस्तके लिलेख।

अतः परं गणेशो नारदं पप्रच्छ—"अपि किमियं पणबन्धकथा तावत्तथ्या, उत किमावश्यकं? मिथ्यैव?" इति।

"मिथ्यैव; कः सन्देहः?" इत्युक्त्वा सुवर्णमधः क्षिप्त्वा नारदस्ततो द्रुतं पलायितः॥

विद्यानाथविडम्बनापरनामा प्रतापरुद्रविजयः

डा० वे. राघवः

[नान्द्यन्ते ततः प्रविशति सूत्रधारः]

सूत्रधारः—चलत्कर्णतालस्वनैर्वैनतेया-
वतारोरुशङ्कात्रसत्तातनागैः ।
बिलाभस्वनाभिप्रविष्टैः स खिन्नो
हसद्भातृरुष्टो गणेशोऽस्तु हृष्टयै ॥ १ ॥

अये! सीदत्कर्दमाः प्रसीदत्पुष्कराः, आसीदद्राजहंसाः अवसीदन्मण्डूक-कटुरटनाः, उत्सीदद्दर्दिनान्धकाराः, प्राप्ता एव मानसोन्मादपल्लवयितारः शरत्समयारम्भाः ।

सन्ध्यानृत्तप्रणयिपशुपत्युत्तमाङ्गोल्लसन्त्याः
स्वर्वाहिन्या विधुतपयसां तारकाश्रीकराभाः ।
किं वाद्येन्दोरपि च रुचिभिः फुल्लकाशव्रजानां
दुग्धाम्भोधीभवति भुवनं जैत्रकीर्त्या च राज्ञाम् ॥ २ ॥

अहो! विसरदिव विभिद्यदिव विशालीभवदिव नस्स्वान्तं समन्ततः स्त्यायमानविशदिमविलासीनि दिगन्तरालान्यवलोकयताम्। हसन्निवायमखिलोऽपि लोकः । तदद्य शरत्समयेन, जैत्रयात्राप्रस्तावेन, हासप्रसङ्गचिन्तया च स्मारितोऽस्मि कञ्चित् अस्मत्सुहृदस्सन्दर्भविशेषम् ।

[सम्भ्रमेण प्रविशति अपरः ।]

अपरः—सखे! किमत्र यत्किमप्यन्तरा उत्सुकित इव ध्यायन्निव शून्यः प्रमाद्यसि । किं न पश्यसि पुरतः संमिलितान् सदसि सामाजिकसत्तमान् । आदिष्टा वयं निरूपणाय समित्या—

अनश्लीलहसद्वाणि निसर्गरसबन्धनम् ।
नवं लघु च यत्किंचित् विनोदाय निरूप्यताम् ॥ ३ ॥ इति ॥

सूत्र०—[पराङ्मुखमेव] वयस्य! भवतु, अलमावेगेन। संबद्धमेवान्तरा चिन्तापरोऽस्मि। [सहसा परावृत्य, तमभिवीक्ष्य] अप्यासादितं त्वया यत्किमपि रूपणीयम्।

अपरः—नहि, ननु भवानेव विषयजातविज्ञः।

सूत्र०—हस्तगतमद्य मनोरथमिव नो मूर्तं अस्मत्सवयोवाग्विलसितं किमपि।

अपरः—साधु। ही ही! को वायं प्रणेता? किन्नामायं प्रबन्धः?

सूत्र०—[उपहस्य] मुग्ध! किन्नामादिग्रहणेन?

पुरुषविशेषज्ञानात् पामरसमजेन कीर्त्यते श्लाघा।
रसिकसमाजस्य परं श्लाघाया उज्ज्वलो गुणो हेतुः॥ ४॥

तथापि श्रूयताम्—कविरयमस्मत्सुहृन्मणिः

राघवो नाम यःकश्चित् सन्दर्भणकुतूहली।
स्वाचार्यपादकारुण्यकणिकोञ्छेन वर्तयन्॥ ५॥

स च कदाचिदेवं वर्णयामास स्वस्मिन्भारतीसमवतारवैभवम्—

(कविः)—मातर्भारति! वीररुद्रनृपतिस्तोत्रोत्सुकं मे मनः
नन्वेतादृशनायकस्तवववशात् कीर्तिर्ममैवैधते।
तन्मय्यम्ब दयस्व

(भारती)—

वत्सक! वचस्ते पूर्णमासीसुधा-
भानूत्तालितफेनिलाब्धिलहरीकोलाहलं जृम्भताम्॥ ६॥

अपरः—तत्किमद्य वीररुद्राश्रितं वस्तु प्रयुज्यते! सुष्ठु, सुष्ठु।

सूत्र०—आम्, आम् (इत्यर्धोक्ते नेपथ्ये महान् कलकलः।)

अपरः—आर्य! श्रूयताम्। किमेष उन्मुद्रः समुद्रः? नहि नहि। कथं वा पुरानुभूतवीरजनकोपः, पुनरपि स पारावारः सति अतिरामभद्रे रुद्रे आत्मनो दुरवलेपं दर्शयेत्। अथवा

कल्पज्ञज्ञोच्छलन्मूर्च्छत्स्फूर्जथुस्फोटिदिक्तटाः।
अभ्रे भ्राम्यन्ति किन्वभ्राः पुष्करावर्तकादयः॥ ७॥

सूत्र०—सखे, किमपरं स्यात्। उक्तचरमेव मया वीररुद्राश्रितं रूपकं प्रयोक्ष्यते इति। विजयप्रस्थानमारभ्य आसाम्राज्याभिषेकं कथावस्तु। तत्संप्रति समाप्तनेपथ्यविधानाः प्रविष्टा एव रङ्गं नटाः।

युवराजस्य वीरस्य जैत्रयात्रा विजृम्भते।
भूतेश्वरप्रतीतेरप्यसहिष्णुः पुरद्विषः॥ ८॥
तदेहि वयमपसरावः॥

[इति निष्क्रान्तौ।]

॥ प्रस्तावना॥

॥ अथ प्रथमोऽङ्कः॥

(ततः प्रविशतः एकशिलानगरवास्तव्यौ पौरौ)

प्रथमः—आर्य, चिरात्खल्वद्योपस्थितमतिकुतूहलप्रतिपालितमस्मदन्ध्रभूपतिविजययात्राप्रस्थानम्। अपि चतुरोऽस्यनुमितौ? कथय, किमर्थमाबाल्यादपि कवचहरे युवराजे वीररुद्रे, किं कारणमपेक्ष्य न प्रस्थापितो महाराजेन कुमारो विजयाय?

द्वितीयः—लोकातीतकल्पनानल्पसामर्थ्यो भवान्। तत्कथय मन्दशक्तये मह्यम्।

प्रथमः—यद्रुद्रस्स्वभटान्सदा निधुवनासक्तानुदास्ते गृहे
तन्नात्यन्तमसत्तयात्र भुवने प्रत्यर्थिनां केवलम्।
प्रस्थानोत्थितकेतुपट्टपटलैः क्षोणीरजोभी रवौ
सञ्छन्ने द्विजधर्मकर्मविलयाद्भीतोऽस्त्यसौ धार्मिकः॥ ९॥

आर्य, पश्य पश्य, पुरतः स्फुरत्सहस्रकरप्रभासन्ताडितविमल-कलधौतत्सरुसमुत्थितरोचिर्भिः सृजन्निव कोटिशः प्रतिद्युतिनिधीन्, समुज्जृम्भमाणभेरीपटहदुन्दुभ्यादिवाद्यघोषश्रवणसमनन्तरमेव स्वहस्ताद् अचिरादपगमिष्यन्तीं भूमिं असह्यतयेव नखाग्रैः विलिखन्तः कुर्वन्नखिलानपि क्षोणीपतीन्, चरन्निव कुलपर्वतसङ्घः, क्षुभित इव कल्पपारावारः, रथगजतुरगपदातभारेण 'क्लेशानुभवं विना न साध्यं वीररुद्रप्रणयसर्वस्वम्' इतीव पीडयन् मेदिनीं, प्रचलति जिष्णुरितो नगरात् वीररुद्रसेनासङ्घातः ॥

द्वितीयः—(निरूप्य) आर्य! क्रान्तं नगरद्वारं सैन्येन। तनूभवति सर्वं नयनस्य। केवलं घोष एव तुमुल आकर्ण्यते। अपि च पश्य, लसत्यप्यनन्यसाधारणतेजोराशौ रुद्रनृपतौ सावष्टम्भमुच्चैः स्थितवन्तं भास्करं स्थगितवत्यो धूलयः सर्वलोकसमक्षं तच्छ्रियं विलुप्य मालिन्यं च तं प्रापयन्ति।

प्रथमः—आर्य! किमुच्यते अस्मत्प्रभोर्जयशीलतां प्रति। पश्योपरि

गन्धानेकपनाथयूथविगलद्दानाम्बुसेकार्द्रिताः
धावत्प्रोद्धतघोटिकाखुरपुटोत्खातोर्व्युदग्रोत्थिताः।
एताश्छादितकेतुपट्टपटला रुद्धारुणा धूलयः
सामन्तं द्युपतिं विधातुमुदयन्त्यूर्ध्वं नृपाग्रेसराः ॥ १० ॥

द्वितीयः—हन्त! भूमिरेव दिवमारोहतीव। सम्यक्च्छादितसूर्यतया द्राङ्निष्पन्नप्रदोषमिव भुवनमाभाति। पश्य पश्य, परितोऽपि नासीरपांसुजृम्भणापादितप्रदोषस्य लोकस्य तांस्तान् नियमविकारान् ॥ तथा हि—

श्यामाप्राप्तिमपेक्ष्य सम्भ्रमकृतालङ्काररागांशुकाः
जालेष्वाननपङ्कजानि दयितप्राप्त्युत्सुकास्तन्वते।
ता वेश्या वरवर्णिनीश्च नगरीरथ्याचराः कामुकाः
वीक्ष्य श्वासमुचस्स्वकीयगृहमुद्दिश्य त्वरन्तेऽधुना ॥ ११ ॥

प्रथमः—(अन्यतो दृष्ट्वा) आर्य, इतो वामतो नयनं देहि । न केवलं वयःकुलानि नीडाभिमुखीभवन्ति, जरद्गृहवृक्षतः प्रसृताः कर्णारुन्तुदनादं कुर्वाणाः कौशिकाः तमश्शकला इव इतस्ततो डयन्ते । अजिनपत्राश्च सहस्रसंख्यया परितोऽपि प्रचरितुमारभन्ते ।

द्वितीयः—किं भणति भवान्? कुतोऽत्र एते अपशकुनाः शकुनयः? ते खलु अधुना समेत्य संभावयन्ति स्थिरवासेन वीररुद्रवैरिविमानान्तः-प्रदेशान् ।

लोकालोकमहीधरार्धमभवत् ध्वान्ताभिभूतं चिरात्
तस्मिन्नुन्मिषदन्धभूपतिमहातेजोभिरुद्दीपिते ।
विस्रब्धात्रसथप्रचालितगिरित्विक्पत्रसङ्घा द्रुताः
सोलूका मथितारियूथभवनान्यापूरयन्ति द्रुतम् ॥ १२ ॥

पश्य, पश्य (इत्यन्यतः दृष्टिमावर्जयन्) मार्जारांश्चेतः कपटाकुञ्चितपादान् मन्दमन्दं क्रममाणान् । बहिस्सरति च महती मूषिकपरम्परा । आर्य! पश्य—

किमिति कथयाम्याखुस्त्रीणां गृहेऽन्धपतेः श्रियं
विपुलविवराभ्यन्तर्गोणीशताहिततण्डुलान् ।
गुडघृतघटान् मार्जारेशास्समीक्ष्य पलायिताः
अनुमितिरसास्स्वान्रक्षन्तस्तुवन्ति च पायसम् ॥ १३ ॥

[नेपथ्ये उदेति घण्टारवः ।]

प्रथमः—(श्रवणमभिनीय) अपि शृणोत्यार्यो घण्टारवं, बुभुक्षापीडितो देवपूजकोऽसौ शीघ्रायातप्रदोषमभिनन्दमानः निवेदनान्नलोलुपतया शिवायतने पूजां त्वरया निर्वर्तयति ।

द्वितीयः—(उपहसन्) वीक्षतामार्य एतानाकुलान् इह श्रोत्रियान् ।

अलिन्देष्वद्यैव श्रमपरिजिहीर्षात्तशयनाः
वहन्तस्संभुक्तं जठरपिठरे नो परिणतम् ।
मृशन्तस्तुन्दाग्रान् अनभिलषितोद्घाटितदृशोऽ-
परां सन्ध्यामुद्यन्त्यलसमलसं सेवितुममी ॥ १४ ॥

अपि च अद्याहमेवं मन्ये भवति भाषणं दिवि मिथः शचीदेवराजयोः—

किं ते पौलोमि दुःखं? प्रिय किमिति परं म्लायते कल्पवृक्षैः;
मा भूदस्माद्विषादः कुवलयसरसीमेहि संभावयावः ।
किं वा तत्राद्धि? मुग्धे विकसितसुषमैवाद्य सा चित्रमेतत्
चित्रं किं त्यागिवीरक्षितिपतियशसा प्लाव्यते सर्वलोकः ॥ १५ ॥

प्रथमः—(आकाशे लक्ष्यं बद्ध्वा) आर्य! आस्तामयमिह लौकिको विकारः । उपर्यालोकय—

नृत्ताय सन्नह्यति चन्द्रमौलिः हसत्यमुं वीक्ष्य नगेन्द्रकन्या ।
सायंविधेः प्राप्य महर्षयोऽपि मुह्यन्ति दृष्ट्वा द्युनदीं मृदक्ताम् ॥ १६ ॥

तदस्तु, यथा तथा वा उपरि स्वर्लोकवृत्तान्तः । एहि नगरीमेव सर्वां विपर्यस्तविधिविचित्राचारां विलोकयन्तौ आत्मानं विनोदयावः ॥

(निष्क्रान्तौ ।)

[इति शुद्धविष्कम्भकः]

[ततः प्रविशति नन्दनवनं महेन्द्रः पुलोमजया सार्धम्]

इन्द्रः—(शचीमाहूय)

कान्ते फुल्लमुखांबुजे कुसुमितां, नीलेक्षणे सालिकाम ,
आलोलायतकुन्तलेऽनिलसमाधूतप्रतानव्रजाम् ।
वक्षोभारनते फलावनमिताम्, आलिंग्य मामेह्यमुं
चूताश्लेषवतीं व्रजेव लतिकां शोभां तवाबिभ्रतीम् ॥ १७ ॥

[चूततले शिलापट्टके उभावप्युपविशतः]

(पतिकृतकण्ठग्रहा शची)

शची—नाथ! किमेतदद्य माध्याह्निकतापापनोदनाय धारागृहं गतवत्याः मे रभसा अज्ञातं कालोऽपयातः, भवदीयकरवल्लीसमाश्लेषदायी प्रियः प्रदोषश्च आपतितः शीघ्रमेवेति निर्भरानन्दा चित्रायितास्मि ।

इन्द्रः—प्रिये! ममाप्यस्मिन् विषये कश्चिदासीदेव वितर्कः । आकालिकसूर्यास्तमयमाकलयतः चिन्ता मे क्षणमाविरभूत् । तथापि किं चिन्तया, वर्तते सन्ध्यासमयः मदनाधिकारमनोहारीति त्वामेव, वरारोहे, स्मारितस्सन् नन्दनमागमम् ।

शची—आस्तामास्तां प्रियंवदक! किमद्य सत्यं सन्ध्या वर्तते? (समन्ततः उभौ निपुणं वीक्षेते) (शिलापट्टकादुत्थाय)

इन्द्रः—सत्यमाह भवती । इतः पश्य पांसूत्करजम्बालितविटपान् अनुत्फुल्लकुसुमान् वीक्ष्य वृक्षान् अनासादितहेतिसम्भारः विषीदन्निवो याति कुसुमायुधः ।

(शची नेत्रे कराभ्यां पीडयति । अश्रूणि च पटाञ्चलेन उन्मार्जयति ।)

इन्द्रः—(शचीं विलोक्य) हा प्रिये! किमापतितं ते नयनयोः! (इति विह्वलां तां गृह्णाति ।)

शची—हन्त! नाथ! हा प्रिय नाथ अक्ष्णोर्मे पांसूपरोधः ।

इन्द्रः—(स्वोत्तरीयेण बाष्पक्लिन्नं प्रियामुखं परिशोध्य स्वमुखानिलं च तन्नेत्रयोरर्पयन् किंचिदिव स्मितेन) अहो! दशावैषम्येऽपि लक्ष्मीपोषः—

उद्गलितनयनवारिप्लावितगण्डं शशिशिलामनोरम्यम् ।
अयमपि चपलचकोरः तृष्णालोलं बिभर्ति वदनाग्रम् ॥ १८ ॥

(इत्युन्मुखीभवति चुम्बनाय; महान् वाति वायुराकर्षन् रेणुपुञ्जम्, सहसा स्वयमपि महेन्द्रः उत्प्लवन् इतस्ततो धावति ।)

इन्द्रः—(परावृत्य) प्रिये! प्रिये! अहमपि पांसुभिः पीड्ये । हा! कथं मम नयनानि दूयन्ते । आः कष्टम्! (इति क्रन्दन् इतस्ततो धावति ।)

शची—हा प्राणनाथ! क्वासि, न पश्यामि भवन्तम् ।

इन्द्रः—इन्द्राणि! इतोऽस्मि मन्दभाग्यः । एतावत्कालं एकपद एव सर्वास्वपि दिक्षु लसन्तीः स्वर्वारवामेक्षणा अनुभूय सहस्रलोचनदानाय महर्षिं प्रतिपदं वन्दमानोऽभवम् । हा धिक्! कुटिलाशयान् मुनीन्! अद्य पश्यामि गौतमस्य दृष्टिकौटिल्यम् । अन्तःप्रविष्टरेणूनि अक्षीणि मे घुरुघुरायन्ते, हन्त घुरुघुरायन्ते । (इति भ्रान्तो धावति अमितः ।)

शची—हा कष्टम्! अब्रह्मण्यम्! न शक्नोमि चक्षुषी उन्मीलयितुम् । पातालमिव बहिर्वर्तते । हा प्राणनाथ! किमापतितं ते? कुत्रासि? (इति क्रन्दन्ती कुत्रचिद्धावति ।)

इन्द्रः—अरेरे उद्यानपालिकाः! शीघ्रं गच्छत । द्वाराधिकृतान्निवेद्य अश्विनीकुमारावानयत । हा हा न सहे न सहे । (इति हस्ताभ्यां नयनानि निष्पीडयन्नधिकीकरोति वेदनाम् ।) हा मत्पातकस्य फलमद्यैवानुभवामि । धिक् धिक् सहस्रलोचनतां मे । ओषधीपते! अमृतकिरण! क्वासि! प्रिये प्रिये! कुत्रासि? तुहिनज्योतिषमानय । (इति प्रधावन्नपक्रान्तः ।)

(शची च धावनवशात् तान्ता नष्टदृष्टितया भ्रमणे क्वचित्क्रीडासरसि पतति ।)

शची—(हन्तेति अक्षिणी उन्मृज्य जलेन) हन्त! किमेष अपूर्व उत्पातः चक्षुषां, यद्भुवनैकचक्षुरपि नालोक्यते । (इत्यर्धोक्ते परावृत्य पश्यति सरसि परिपतति धूलिजालम्) हा, कथं क्षणात् सरोऽपि चुलुकिताम्भः कर्दमप्रायं जातम् । अब्रह्मण्यम् अब्रह्मण्यम्! दृढीभवति पङ्कोत्करः । कथमुत्तिष्ठेयम् । प्राणनाथ! उद्यानपालकाः, नाकलोकवासिनः! हा

त्रिभुवनैकगुरो शङ्कर! (इति आवलग्नं भूम्यन्तःस्थिता हस्तौ विक्षिप्य क्रन्दन्ती मुह्यति ।)

॥ इति नासीरपांसुधाटी नाम प्रथमोऽङ्कः ॥

॥ अथ द्वितीयोऽङ्कः ॥

(कस्यचिदरिभूपतेर्नगरप्रान्ते अरण्यम् । तत्र च शरणं गतं राजकुलं वीररुद्रेण अपराष्ट्रीकृतम ; प्रविशति वनदेवता ।)

वनदेवता—(पर्याकुलाक्षी परितो वेपमाना) कुतो हुम्भाभिः ताम्यन्ति गावः? मृगकुलं च पर्याकुलं धावति? भिन्नसमाधयो योगिनोऽपि कन्दादीनलभमानाः जलेन वातेन च वर्त्तयन्ति । किमियमापदापतिता मे वनान्ते? (अन्यतः क्वचित् संभ्रमेण गत्वा सखीमाह्वयति ।)

(प्रविशति सखी)

सखि! किमेतत् अवस्थावैषम्यमिह?

सखी—हला अस्ति भूमौ कश्चिद्राजा ।

वनदे०—कुत एकः, बहवो वर्तन्ते... ।

सखी—बहव इति तत्पुरावृत्तम् ; अद्य एक एव ।

वनदे०—हुम! किं तस्य?

सखी—मा मा उपहस । केवलं राजेति मात्रं भणामि, यतः

तस्मिन् 'जहाल्यतिशयोक्तिरलङ्कृतित्वं
न्यूनोपमात्वमुपयात्युपमापि सर्वा' ।
वस्तुस्थितिप्रकलनं च न साध्यमेव
तस्मिन्नभूतचरतादृशचित्रभूमौ ॥ १ ॥

युवैवैष संप्रति विश्वजित्सत्रसमारम्भणकुतूहली पारमैश्वर्यप्रतिष्ठार्जनेन स्वं नाम रुद्र इति अन्वर्थं कर्तुमुद्यतः ।

वनदे०--(किंचिदिव कुपिता) तत्प्रवर्ततां नाम विश्वजिते, नाकजिते वा, किमनेन नः ?

सखी--तत्कृतैषा दुरवस्था नो वन्याः ?

वनदे०--(विस्मयविशालनेत्रा) कथं कथम् ?

सखी--तेन स्वस्थानतो भ्रंशिता राजानः, पश्य, अत्र वनभागममुं शरणं गताः ।

वनदे०--व्रजन्तु नाम शरणं, तत् कुतो वेयं पीडा वननित्य-वास्तव्यानाम् ।

सखी--मा कुप्य । मा मा प्रकटय एवमुच्छ्रायम् । उद्रिक्तं स्थावरमपि न सहते स महीपतिः । शृणु, एते नृपा अपपदा ह्यः केचन फलादिभिराहारमकुर्वन् । अन्ये केचन फलादीन्यलभमानाः सर्वमपि तृणं भुक्तवन्तः । अपरे केचित् तलोपरि किंचिदपि नासादयन्तः कन्दादिमृगयया भूमिमखनन् । पश्य ! पश्य ! अधस्तात् वराहकुलघोणोत्खाता इव गर्ताः तत्र तत्र विलोक्यन्ते ॥

अपि नास्त्येवंप्रभावस्य कापि कारा निजराजधान्यां अमून् बन्दिनः प्रक्षेप्तुम् ?

सखी--भगवति !

जिष्णुश्रीवीररुद्रप्रमथितधरणीपालबन्धङ्गनानां
भूरिश्वासोष्णवातैरधिकमभिहतेष्वुत्स्फुटद्भित्तिकेषु ।
कारावासेषु तत्तन्नवनवरचनाव्यग्रिता वेश्मकाराः
तान्ता हन्त स्ववृत्तिं विजहति च दिशो विद्रवन्त्यन्ध्रपुर्याम् ॥ २ ॥

(प्रविशति नन्दनवनदेवता)

नन्दन०--हला ! अपि कुशलं सख्याः ?

वनदे०—हला! ईदृशं मे कुशलम्! पश्य वीररुद्रो नाम राजा कश्चित्, जैत्रयात्राप्रचलितः किल। तत्कारितानर्थाकुलं वनं दृष्ट्वा अत्यन्तं रुग्णहृदयास्मि।

नन्दन०—हला! वृत्तान्तमेनमन्तरा ममाप्यस्त्येव भूयान् हृदय-परितापः। ह्यः मध्याह्ने सहसा पांसुनिकरपरिपाटलिता मे कल्पकादिपादपाः समालम्भिता जम्बालमालिन्यम्।

सखी—कथमद्याप्यमरवनिकायामङ्घ्रिपाः! चिरात् अपगतकल्पकानो-कहा अनेहसमेतावन्तं अतिशोचनीयास्ति कीर्णकान्तारोषरस्थलीवेति खलु श्रूयते।

वनदे०—किम्?

सखी—किमन्यत्?

तादृक्षस्य प्रभवमनिदंपूर्वविश्राणनश्री-
श्लाघस्यान्ध्रेशितुरिह भुवि श्रावितास्स्वर्द्रुमौघाः।
ये तत्सेवारुचिविरचितैकाश्रमवासास्तदीया
एधायन्ते विटपनिचयास्तत्पुरीपक्कणेषु ॥ ३ ॥

वनदे०—(नन्दनवनदेवतां प्रति) भवत्वियमतिभाषिणी प्रलपन्ती। हला! कथय कथय त्वं स्वर्लोकवृत्तान्तस्य। ततः—

नन्दन०—सहस्राक्षोऽपि धूलिभिः अतिमात्रं दूयमाननयनः, मत्तो निर्गतः, अश्विनीकुमाराभ्यां शतभिषङ्नाथेन च चिकित्सितः, पर्याकुलैः सर्वैरपि दिविषद्भिरुपास्यमानः, अतिकरुणदशायामद्य वर्तते। अद्यापि न निवृत्ता तत्पीडा। शोकविकलीभूतं सुरलोकं दुःखं वीक्षमाणा असह्यतया तदवस्थायाः, मनोविनोदार्थं त्वामुपागतोऽस्मि।

सखि! सर्वोऽप्ययं काकतीयविभोः तस्य विक्रमप्रक्रियाक्रमः।

वनदे०—हला ! कीदृशोऽयं प्रतापो वीररुद्रस्य ! कियान् विषादो महीपतीनामेतेषाम् ! (इति वदन्त्यामेव तस्यां सहसा मूर्च्छन्ति ज्वलनानिलाः।) सख्यौ ! कथं आनला अनिलाः प्रचरन्ति । (पुनश्च निरूप्य) अकाले तमश्च परिजृम्भते ।

सखी—किमन्यत् ?

प्रतापरुद्रोन्मथितारिभूमिपाः
तदीयविश्लिष्टनितंबिनीजनाः ।
समेऽद्य दुःखार्णवमज्जितास्ततः
तमांस्यमून्यूष्मलवायवोऽप्यमी ॥ ४ ॥

वनदे०—हन्त ! उद्गत्य पातालेन आव्रियत इव जीवलोकः । कथम् आत्रिदशालयमन्धतमसमलीमसमवलोक्यते—

कालाम्भोधरपटलैरिवावृतं खं
रक्षांसि प्रविचरितुं समारभन्ते ।
क्रन्दन्त्यभ्यधिकमपीह कौशिकौघाः
कीदृक्षा विपदियमुत्थिताऽधुना नः ॥ ५ ॥

तदेह्येहि, दृष्टिर्लुप्यते । ओषधिसन्निवेशस्थलीं गच्छामः ॥

सखी—यदि तत्रापि ज्योतिः स्यात् !

[निष्क्रान्ताः सर्वे ।]

(विष्कम्भकः)

(ततः प्रविशति शयानो महेन्द्रः पार्श्वोपविष्टैः अश्विनीकुमार-सुधांश्वादिभिः चिकित्स्यमानः, सपरिवारः ।)

काञ्चुकीयः—

सर्वत्राङ्गं पलितधवलं राजतद्योतमीक्षे
जीर्णं बद्धं वलिवलयकैः रज्जुभिर्दार्ढ्यहेतोः ।
एतत्काश्यं परिणतिकृतं लाघवं मन्यमानः
भोक्तुं योग्यं श्लथमपि वपुस्तर्कये तृष्णहिम्ना ॥ ६ ॥

हन्त ! अस्यापि महेन्द्रस्य एतादृशतृष्णामेव विपत्तेः कारणं पश्यामि । शापावासहस्रनयनानि सन्ध्यामुखपाटलानि अन्तः-क्काथतुन्नानि उच्छूनप्रान्तानि उन्मीलनासहानि अद्य बिभर्ति । अथ को वायं पांसुप्रचारः, येनायमन्धीकृत इति अद्यापि न ज्ञायते । असुरोपरोध-भीतिगृहीतमेरुगुहावासैरुज्झ्यमान इव सुरैः अद्य निष्प्रभोऽयं स्वर्गलोकः । पांसूत्पातसमये नष्टा देवस्य महिषी क्व वर्तत इति ज्ञातुं प्रेषिताः चरा अद्यापि न प्रत्यागताः । तदेष प्रियावियोगः प्रभोर्व्यसनमुद्वेलयति ।

(ससंभ्रमं प्रविश्य चरः)

चरः—निवेद्यतां निवेद्यतां नाकलोकनाथाय वार्ताहर उपायात इति ।

काञ्चु०—वाढम्, तथा । (इति महेन्द्रमुपसृत्य) स्वामिन्! चरः कश्चिदुपायातः ।

बृहस्पतिः—तदविलम्बं प्रवेशयैनम् ।

काञ्चु०—आर्य! तथा । (इति गत्वा चरं प्रवेश्य) अयं स्वामी, उपसर्पतु भवान् ।

चरः—जयतु महेन्द्रः ।

बृह०—जिष्णो ! पौलोमी-(इत्यर्धोक्ते)

इन्द्रः—आः ! प्रिये, आलिङ्ग माम् । हन्त ! कथं न पश्यामि ताम् ।

बृह०—शचीपते ! पौलोमीवार्ताहरः प्राप्त इति मया वक्तुमुपक्रान्तम् ।

इन्द्रः—का वार्ता, कथ्यताम् ।

चरः—तत्तत्कार्यं परित्यज्य स्वजनं च विस्मृत्य केवलं देवव्याधिचिकित्सापर्याकुले सत्यस्मिन्स्वर्गलोके, देवावरोधे च देवपादसपर्यार्थम् इतस्ततोऽत्रैव त्वरमाणे, पांसूत्पातदिने नन्दनवने पांसुपूरणदृढीकृतकर्दमे कस्मिंश्चित् क्रीडासरसि पतितायाः उत्थातुमक्षमाया राज्ञ्याः न कोऽप्यचिन्तयत् । अद्य परिजृम्भिते अन्धतमसे अञ्जनेन रोदसि परिलिप्ते, कदर्थितप्रभे मरीचिमालिन्यपि विषादापनयनाय कुहचित् कोणे विलीने, छिद्रान्वेषिभिरसुरैः संघीभूय सह रक्षोभिः अमरावतीस्थगनाय बहिरायातम् । मार्गे च नन्दनवने, वनदेवतयापि त्यक्ते, तैरालोकि सा विषमदशापन्ना अमरावतीमहिषी । ततस्तैः, 'भवतु इमामपवाह्य देवेन्द्रविजये पणं कुर्मः' इति पर्यालोच्य आक्षिप्यत पौलोमी ॥

(सर्वे विस्मयस्तब्धास्तिष्ठन्ति ।)

इन्द्रः—आः! कथम? अपवाहिता प्रिया दैत्यैः । हा हतोऽस्मि मन्दभागः ॥

बृह०—महेन्द्र! मा मा अधिकं सन्तप्य । मा मा भवानश्रुभिः व्यथाम् अधिकीकृत्य ॥

इन्द्रः—स्वामिन् सुरगुरो, पौलोमीप्रत्याहरणाय प्रयोगः क्रियताम् । दयितामुखचन्द्रालोकनेन, मन्ये, सुधाभिरालिप्तं नयनम् अपोपद्रवं भवेदिति ॥

चरः—गुरो! प्रयोग इति मनसा चिन्तयितुमपि नावकाशोऽद्य । बहिर्लोकः परितः प्रसरता तमसा व्याप्यते । अचिरेण स्वर्गलोकोऽपि पातालं भविष्यति । अपि च वान्त्यूष्मला वायवः । एतादृशे काले, को वा बहिर्जिगमिषति, गन्तुं वा ईष्टे ॥

बृह०—अथ कुत इदम् आकालिकं तमः, किंकृता अमी अनलतमीराः?

चरः—भगवन्! न ज्ञायते। भूमौ केनापि अद्भुतेन भवितव्यम्, यतः तत एव उपचीयमानमालोकितमिदं तमः ॥

(तमः प्रविशति।)

सर्वे—कथं प्रदोष इव दृश्यते! नास्तशिखरगतो भास्वान्, नापि भगवती शर्वरी उन्निद्रा।

(संभ्रमः। क्रमेण मन्दीकृते प्रकाशे सुधर्मा तमसि मज्जति ॥)

इन्द्रः—आचार्य! किमिति अक्ष्णां क्षेममिव प्रेक्षे। न दूये विवृतलोचनः ॥

बृह०—(हस्तौ प्रसारयन्) मघवन्, कुत्रासि? अपूर्वं किंचिदापतितम्। अश्रुतचरमिदं भौममद्भुतम्। अदैवतमिति विस्मितोऽस्मितराम् ॥

इन्द्रः—स्वामिन्, किमिव?

बृह०—आकालिकः प्रलय इव परितोऽपि वर्तते। न शक्नुमो वीक्षितुम्। उपहतानि चक्षूंषि। प्रसृमरश्च उष्णो वायुः ॥

इन्द्रः—गुरो! किं तमःप्रचयः! किंकुर्वाणाः प्रभानिधिप्रभृतयः?

चरः—प्रभो! प्रभानिधिरिति! चिरात्खलु तेन विलीनं मेरुकन्दरे। एवं सत्यां तत्कथायां, किमुच्यते ज्योतिरन्तराण्यन्तरा। सर्वथा नष्टा वयम्। समयश्च अनुकूलः प्राप्तो दानवहतकानाम्। निशाचरैः संभूय महता सैन्येन (इति वदत्येव तस्मिन् नेपथ्ये कलकलः) हा! हतास्स्मः। श्रूयतां श्रूयताम्—

उत्फीट्कारमुखैः गजेन्द्रनिकरैः कल्पाटवी भज्यते
हेषाघोषतरङ्गराजिभिरमी ध्माता दिगुल्लोचकाः।
भेरीडिण्डिमतूर्यशङ्खपटहध्वानैः श्रुतिस्स्थग्यते
मन्ये नूनमुपैति देवनगरीरोधाय सैन्यं द्विषाम् ॥ ७ ॥

बृह०—वज्रिन्! किं कुर्मोऽद्य? भवान् रुग्णः। लोकश्च तमसा हतः। परिचितं पलायनमपि दुःसाधं भाति। हन्त! अद्यप्रभृति सुधर्मायां शुक्रसनाथाः दैत्या विराजिष्यन्ते। अद्य पठिष्यते नः चरमश्लोकः॥

इन्द्रः—देवगुरो! अपि सत्यमभिद्रुग्धा वयमसुरैः इन्द्राण्यपवाहकैः? प्रतियोद्धुमपि न युक्तम् पौलोमीमङ्गलाशंसिभिरस्माभिः। सर्वथा सन्धिमेव समीचीनं पश्यामि॥

बृह०—मरुत्वन्! गतमस्मद्यशः। परितो नेदं तमः, किन्तु अस्मदपकीर्तिरेव। (इति वदत्येव सघोरघोषं दैत्यपतिः प्रविशति सुधर्माम्। सर्वे भयविह्वलाः तिष्ठन्ति।)॥

दैत्यपतिः—आः! क्वायं स देवेन्द्रहतकः। कुत्रास्ते स द्विजपाशः सुरगुरुः। आः! तिष्ठत जर्जरनिर्जरकीटाः!

सर्वे देवाः—हा! अब्रह्मण्यम्! अब्रह्मण्यम्!

(संभ्रमः, कोलाहलः।)

[निष्क्रान्ताः सर्वे]

॥ तमःप्रक्रम इति द्वितीयोऽङ्कः॥

॥ अथ तृतीयोऽङ्कः॥

मातलिः—हन्त! केयमनर्थपरम्परा त्रिविष्टपस्य। सत्यमभियुक्ता वदन्ति 'छिद्रेष्वनर्था बहुलीभवन्ति' इति। न जाने किमवस्थो देवसमूहोऽधुनेति। एतस्मिन्महातमसि कालमेघमेदुरं दैत्यारिम् आसादितुं न शक्यते। किं करोमि? (इति विचिन्त्य) भवतु, हिमाचलं गत्वा रुद्रं महाश्वेतमानयामि॥ (इति परिक्रमते।)

(ततः प्रविशति नारदः)

नारदः—मातले!

मा०—केनाहमाहूये?

ना०—देवसूत!

मा०—तामिस्रे न कमपि पश्यामि। अपि स्यात् काचित् नृशंस-दैत्यवञ्चना॥

ना०—(उपसृत्य अंसे मातलिं स्पृशति; मातलिरुत्कम्पते) अलं मातले संभ्रमेण, नारदोऽहमस्मि। अलमलं सन्देहेन॥

मा०—स्वामिन्! कल्याणकन्द! नमति महेन्द्रसारथिरयम्।

ना०—(तदक्षिणी प्रमार्ज्य दृष्टिमुत्पाद्य) वत्स! कल्याणं ते भूयात्। अलं कैलासयात्राश्रमेण। तत एवाहमागतोऽस्मि। कतिचिद्दिनानि तत्रैव मे जगदादिमिथुनमुपवीणयतो वास आसीत्। दृष्टं च मयेदमद्भुतोज्जृम्भणम्। तत्कारणं च भगवता स्पष्टीकृतमष्टमूर्तिना॥

मा०—कथमिव?

ना०—काले वो निवेदयिष्यति स एव भगवान् भवः। अद्य प्रस्तुतं चिन्तयावः। देवेन्द्रविपत्तिं समाधिनाऽऽकलयता पशुपतिना आदिष्टं "नास्त्यन्य उपायः। नारद! गच्छ, मातलिं भूलोकं प्रेष्य महीनाथं वीररुद्रं मद्भक्तमानय। मङ्गले सर्वं परिणमिष्यति" इति॥

मा०—आश्चर्यम्! महीनाथं, वीररुद्रम्! अथ कोऽयं महीनाथो वीररुद्रः?

ना०—मातले! अनभिज्ञोऽसि निर्माणवैचित्र्याणाम्। अस्ति भूमण्डललललामभूता न्यक्कृतादिविष्टपुरलक्ष्मीः, नगरी एकशिला नाम अन्ध्रेषु। तत्र विद्योतते संप्रति प्रतिपन्नदिग्विजययात्रः नाम्ना वीररुद्रः काकतीयकुलदुग्धाब्धिकौस्तुभः। यस्य च जन्मदिने—

देवो भूतपतिस्स्वयं गणयुतः पुत्रं कुमारं प्रियं
पार्वत्यश्रुभिरार्द्रितेषु हिमवत्प्रान्तेष्वमृग्यच्चिरम् ।
शून्योराश्च मृशन् रमापतिरगान्म्लानिं, विधातापि च
स्वास्यं वीक्ष्य सरस्वतीविरहितं जाड्यं समालम्बत ॥ ८ ॥

तत् स एवैकोऽद्य त्रिभुवनेऽपि, येन स्यात् देवोद्धारः । तत् त्वरस्व महेन्द्ररथेन ॥

मा०—जैत्रयात्राव्यापृत इति आख्यायि भवता । तत्क्व वा तं प्रेक्षे?

ना०—मातले ! आजलधिकल्लोलकोलाहलभरितवनकुञ्जान्मलयाद् आ च लोकालोकमहीधरमवनीमखिलामेव अवजित्य, गुरुगौरवादुपेक्षितकैलासो हिमवत्प्रान्तविरचितवासभूमिषु वसत्यद्य मानसोन्मादकाप्लवनापहृतप्रचरणखेदयोधः, प्रतिगजशङ्कास्थगितपर्वतेश्वरकटकसेनाकरीन्द्रः, विद्याधरमिथुनोद्गीतनिजनामोत्कर्षश्रवणकण्टकितलज्जितवदनः, गिरिगुहाविश्रान्तः पारीन्द्र इव ।

मा०—स्वामिन् ! विस्तृतास्ता हिमालयभूमयः । अदृष्टचरश्च राजा, शीघ्रं च गन्तव्यम् ॥

ना०—सत्यम, अनेन लक्ष्येण लक्षयेथाः । पर्वतभागो यत्र प्रतापोष्मा यशश्चन्द्रिकेत्युभयसंमेलनेन चित्रसमशीतोष्णो भाव्यते तत्र वर्तते स महाभागः ॥

यत्रैकत्र क्षितिधरतटेष्वा झरिण्यायमानाः
आलोक्यन्ते हिमपृथुभराः अद्रिशृंगावतंसाः ।
तीरोपान्तस्फुरितमहसामोषधीनां मयूखैः
संकर्षन्तः बहलितरुचींस्स्थूलरत्नोपलांश्च ॥ ९ ॥

मा०—अस्त्येव फालेक्षणस्य चन्द्रशेखरस्य समीपे एवंगुणा भूमयः ।

ना०—तदपरं चिह्नं कथयामि ।

क्वचित्फुल्लं पद्मं क्वचिदपि च फुल्लं कुवलयं
स्फुरत्सूर्याश्मानः क्वचिदमृतमुक् चान्द्र उपलः ।
क्वचित्कोकद्वन्द्वं प्रमुदितचकोरीं च निकषा
विरुद्धानामेवं पथि निलय एकस्तव भवेत् ॥ १० ॥

मा०—आम् । अस्ति तस्यैव सूर्येन्दुलोचनस्य भगवतो भवानीपतेः पुरतो विरुद्धानामेवमेको निलयः ॥

ना०—हन्त ! कथमद्यापि अलक्षकं भवति वर्णनम् । सुरपतिसूत ! एतादृशं पशुपतिपरिसरमपहाय स्थानमपरं यद्द्रौ तदेव वीररुद्रस्थानम् ॥

मा०—आः ! गृहीतं लक्षणम् । तत्साधयामि । भगवन् ! भवानपि अमरावतीवास्तव्यानाम् आश्वासनाय प्रवर्तताम् ॥

ना०—बाढम्, त्वरस्व । शिवास्सन्तु पन्थानः ॥

[निष्क्रान्तौ]

[विष्कम्भकः]

[ततः प्रविशतः द्वौ देवौ, विशीर्णायां नन्दनवन्यां कुहचन निलीनौ ।]

प्रथमः—सखे, हेतिहतमूर्धतया विकलश्रवणेन्द्रियोऽहम् । तत्कथय, किमद्यापि श्रूयते दितिसुतबलकोलाहलः ?

द्वितीयः—अस्ति अद्यापि कोलाहलः । न जाने कस्यां दशायाम् अमरावती वर्तते इति । किमद्यापि नेदं हतमन्धं तमो विरतम् ?

प्रथमः—वयस्य ! मन्दं भण मन्दं भण ! स्वरानुपातिनो दानवा आवां गृह्णीयुः ॥

(दानवनाम श्रुत्वा अपरः उत्कम्पते । प्रविशति कश्चिदपरः सुरः ॥)

(कर्णे) सखे ! समीपे पदशब्द इव । केनापि दानवेन स्यात् त्र्यासो निरुद्धयताम् । अन्यथा तेन श्वासोपघातो नौ भवेत् ॥

(तृतीयसुरः स्वयम् असुरभिया मन्दमुपसरति ।)

१५ ॥

द्वितीयः—हन्त ! उपसृतो राहुः, ग्रस्ता च नौ ग्रीवाकला ।

तृतीयः—हन्त ! स्वर इवात्र कस्यचित् । अपि स्याद् विरोधिनः ?

प्रथमः—भोः सत्यं विरोध्येव, तदेहि सखे, निभृतं सरन्तौ....

तृतीयः—हा शत्रुः, शत्रुरत्र (इति भिया धावति, तथैव तौ च धावतः अन्ते त्रयोऽपि सङ्घट्टमाप्नुवन्ति ।)

सर्वे—(प्रत्येकं) हा हतोऽस्मि । असुरः असुरः ! (सर्वे श्रुत्वा)] कथं सर्व एव मित्राणि वयम् ॥ (दीर्घं निश्वसन्ति । नवं प्रति ।)

प्रथमः—सखे ! किं किं वृत्तम् आ असुरोपरोधोपक्रमात्, तत्कथय ।

तृतीयः—व्याधित एव महेन्द्रः आक्षिप्य कारागृहे क्षिप्त इति, तत्तद्देववाराङ्गनाः बलात्कृत्य अपनयद्भिः असुरापशदैः महान् आमोदकोलाहलोऽकारि । अपि च सुधर्मायां सजग्धिसपीत्यादिभिः अशिवैः रुतैः शवभूमाविव शिवा आरवान् कुर्वन्त्यस्मद्द्विषः । सुप्रतिष्ठितश्रीकं सहसाऽभाग्यपरिवर्तितलक्ष्मीकमवलोक्य अति हि नाम जृम्भते शोकः असाधारणः । (इति साश्रु किंचिदिव स्मृत्वा सगद्गदं) सा तादृशी देवसभा ! ।

आरत्नाञ्चितभित्तिबिम्बिततनुस्वर्वारवामेक्षणा-
दोरान्दोलितचामरानिलचलच्छैवाललोमावलिः ।
लास्योल्लासजघर्मतोयकणिकामुक्तावलीचित्रितां
देवो यत्र सहस्रदृक् निरविशत् रम्भोरुरम्भाश्रियम् ॥ ११ ॥

सा संप्रति अनालोकनीयाम् अवस्थां नीता ॥

प्र०; द्वि०—हन्त भोः (इति विषादं नाटयतः)

तीयः—हन्त! यत्र—

मामोदमेदस्विवायौ निकुञ्जे व्यहारि प्रमत्तैः शिखण्डीन्द्रचक्रैः ।
महो तत्र संप्रत्यमी क्रोष्टुसंघाः दधत्युच्चकोलाहलं विद्धकर्णम् ॥ १२ ॥

परतो वदति तस्मिन् समुन्मीलति समन्ततः तेजः । सर्वे विलोकयन्ति ।)

प्रथमः—वयस्यौ! अस्मदिष्टं रोचिरुदेति ।

द्वितीयः—किमेतत्? एवमाश्चर्यं बद्धश्रेणि अनुबध्नाति ।

तृतीयः—(निपुणं निरूप्याधस्तात्) ज्योतिरिदमुद्भवति ।

अनायाते स्वर्णक्षितिधरगुहान्तश्शरणतः
महोमूर्तौ तस्मिन् कथमुपहतं संप्रति तमः ।
कुतो लोकालोकाचलतटगताग्नेयदृषदां
स्फुरत्तेजोधाटी झटिति नयनान्यन्धयति नः ॥ १३ ॥

प्रथमः—हन्त! भोः सखे पश्य परितो नन्दनस्य शोचनीयां दशाम् । भग्नाः पारिजातादयः । विशीर्णा लतागृहाः, क्रीडासन्निवेशाः सरस्सोपानपङ्क्तयश्च ॥

तृतीयः—अहो! इदमत्यन्तमसह्यं द्रष्टुं अचिरोपनतपातं सर्वशोभासंपन्नं वस्तु ।

तृतीयः—मित्रे! पश्यतम्—

निरस्तं तद्ध्वान्तं किमपि किमपि स्मेरवदनाः
प्रसादं काष्ठान्ताः दधति नयनं शक्तिमयितम् ।
क्रमादुन्मीलन्ति प्रकटरुचि ते ते च विषयाः
वराहोत्क्षिप्ताया जलधिजठरान्तादिव भुवः ॥ १४ ॥

प्रथमः—कुत इयमूर्ध्वज्वलना शिखावलिः भूतलादतिजवेन उदेति ।

तृतीयः—सखे निपुणं निरूप्यताम् । रथमिव दिवमारोहन्तं पश्यामि ।

परं च—

अशनिध्वज उच्चकैर्यतो हरिता यच्च तुरङ्गमा अमी ।
ध्रुवमद्य कुतोऽपि भूतलाद् उपकारेण सहैति मातलिः ॥ १५ ॥

प्रथमः—आम्, सत्यम्, एवमेव । अपि च जानामि पूर्वमेव सम्यक्; अयं सुधीः अत्युपकारी च काले मातलिर्नाम ॥

[प्रविशति नारदः ।]

नारदः—(तानवलोक्य) अमरतपस्विनः, पश्यत, उपसर्पति युष्माकमुज्जीवकः, आनन्दस्य कन्दलयिता, द्विषन्मर्दनः, उत्सवप्रदाता प्रमोदनाडिन्धमः, क्षितितलालङ्कारः, भुवो भर्ता, लक्ष्म्या वासः, वाण्याः स्वयंवरवरः, प्रतापस्य एकं शरणं, तेजसां निपुञ्जः, वीर्यस्य मूर्तिः, नाम्ना रुद्रः, अपर इव महेश्वरः आयाति । अद्य च—

दिशः प्रसीदन्ति सुखं च वायुः
आवाति सर्वत्र सुगन्ध एषः ।
प्रतापरुद्रश्च समैति; शत्रुः
क्षतः, पुनर्वः परिनिष्ठिता श्रीः ॥ १६ ॥

(उपर्यागत्य रथः तत्पार्श्वे तिष्ठति, रथादवरुह्य)

मातलिः—स्वामिन्! वीररुद्र! अयं देवर्षिर्नारदः ।

वीररुद्रः—महर्षे! प्रणमत्ययं विधेयो वीररुद्रः ।

ना०—(स्वगतम्) अहो! विनयोत्कर्षः । अहो! शरीरसौन्दर्यम्, आकृतिगाम्भीर्यं, मुखतेजश्च ॥

चित्रमेतादृशी सृष्टिः तातेन कलिता कलौ ।
प्रदातुमिव सर्वेषां गुणानामभयं परम् ॥ १७ ॥

(प्रकाशम्) स्वस्ति तेऽस्तु परन्तप !

वीर०—स्वामिन् ! अनुगृहीतोऽस्मि । जानामि मातलिः, नायं विलम्बस्य काल इति । तद्भवतामाशिषा, कृपया च भगवतो भूतनाथस्य सद्य एव गत्वा सकलमपि असुरबलम् ....(इत्यर्धोक्ते लज्जते ।)

ना०—(स्वगतम्) अहो ! अत्युदात्तता वत्सस्य गुणानाम् ! अहो ! अविकत्थनता ! वत्स ! गच्छ, विजयी भव ॥

वीर०—क्व वा स्थितं सुरारिबलम् ?

सुरास्त्रयः—प्रभो ! संप्रति आक्रान्तनिलिम्पनगराः, सुखं विहरन्ति ते दैवसंपदा संपोषिताः, सुधर्मायाम् ।

वीर०—भवतु, एहि मातले । (इति निष्क्रान्तो वीररुद्रः समातलिः ।)

सुरास्त्रयः—अहो अस्य महानुभावता !

नृपः प्रतापरुद्रोऽयं लोकातीतगुणाम्बुधिः ।
सहस्रांशुर्महोधामा स्फुलिङ्गोऽस्य द्युतेरिव ॥ १८ ॥

(पुरतो दृशा वीररुद्रमनुसृत्य, निरूप्य) अहो ! तेजो वर्धते ॥

एकः—पश्य सखे राक्षसान् ?

त्वक्पत्रकौशिकचमूभिरमी सहैव
भीतिप्रतोदबहुलीकृतवेगयाताः ।
सर्वत्र मूर्च्छति महीपतितेजसीत्थं
सीदन्त्यटाभिरमितः शरणं न लब्ध्वा ॥ १९ ॥

ना०—आः किमेतत्, उपसृतमात्रे देवास्थाने वीररुद्रात् स्फुरन्ति लोकघस्मराणि तेजांसि । उदितमिव प्रभानिर्घ्यर्बुदैः । उद्गत इव समस्तोऽप्यौर्वः

पावकः । (पुनश्च पुरोऽवलोक्य) आः! आकारिता आगता बहिर्दानवाः । कथम्, आगतमात्रा एव उदग्रप्रतापज्वालाभिरभिमृष्टाः भस्मावशेषा भवन्ति ॥

सर्वे—(विलोक्य) अये! कोऽयं धूमोत्करः!

ना०—आश्चर्यम् आश्चर्यम् । सत्यं रुद्र एवायम् । अथवा रुद्रादप्यधिकप्रभाव एवायम् । यतः—

निटिलाक्षणा सुमधनुषं ददाह रुद्रः पुराणि हसितेन ।
अस्मिन्पुनरुपगच्छत्यपि भस्मीभवति दानवव्रातः ॥ २० ॥

(देवान् आलोक्य) आगच्छत, गच्छामो वयं सुधर्माम् । वीररुद्रतेजसि शलभायितम् अरातिभिः । पौलोमीमहेन्द्रमोक्षाय व्रजामः ॥

सर्वे—बाढम् ॥

(निष्क्रान्ताः सर्वे ।)

॥ इति असुरविजयो नाम तृतीयोऽङ्कः ॥

॥ अथ चतुर्थोऽङ्कः ॥

(ततः प्रविशति बृहस्पतिः सह मातलिना)

बृहस्पतिः—मातले! अथ कोऽयं महापुरुषो वीररुद्रो नाम, येन वयमुज्जीविता अद्य ॥

मातलिः—आवेदितोऽस्मि नारदमहर्षिणा । अयमन्ध्रेष्वेकशिला नाम नगरी, तत्रत्यो राजेति । परमेश्वरस्य भक्तः प्रसादपात्रं च, कुमारस्य अवतारः इति च वर्णितं तेनैव ॥

बृह०—भवितव्यम् । एवमेव मम तदैव अस्फुरत् । अन्यथा कुतो वा परमेश्वरात्, तदंशात् कुमाराच्च ऋते ज्योतिरेतादृशम् ॥

मा०—प्रियं नः, प्रियं नः । दिष्ट्या तदुपकृताः पुनरपि संपन्नास्मः । किन्तु अयमेको महान् अद्यापि शोकहेतुः ॥

बृह०—क इव । अपि कृत्स्नाः सुरबन्दिनो मोचिताः ?

मा०—मोचितं देवलोकमात्रम् ।

बृह०—तत्कोऽपरो हेतुरावेगस्य ।

मा०—असुरबलान्मोचितोऽपि प्रावृण्मेघत इव सुधामयूखः, प्रतिष्ठापितोऽपि पुनश्च सिंहासने, प्रापितोऽपि प्रियाम् इन्द्राणीं, नयनेषु अद्याप्यनुपरतात् व्याधेः परं पीड्यते देवेन्द्रः । परं च वीररुद्रतेजोऽवलोकनेन कानिचिन्नयनानि अन्धतां गतानि ॥

बृह०—आम्, मातले, महदिदं शोकस्थानम् । कुण्ठितशक्ती अश्विनौ । अपर्याप्तशीतलतया अशक्यप्रभुसेवः सुधांशुरपि व्यर्थं मन्यते स्वबपुः । कुतो वाऽऽसादितव्या अतिचान्द्री सुधा, यया सहस्राक्षस्य उपद्रवोपशमो भवेत् ॥

(इति चिन्तयति, सर्वतः पल्लवति अपूर्वा चन्द्रिका ।)

मा०—गुरो, किमेतत् ! अकाण्डेऽद्य चन्द्रिका ॥

बृह०—अस्मन्मनोरथेनैव भवितव्यम् ॥

[ससंभ्रमं प्रविशति सिद्धः कश्चन]

मा०—सिद्धपुरुष, कुतस्संभ्रमः ? इत एहि ॥

सिद्धः—आः मातलिस्त्वमत्र, एहि शीघ्रम् । त्वरस्व त्वरस्व । वृक्षं वा प्रासादाग्रं वा आरोहावः । (परितो प्रचालयन्नयनम्) कथं विशीर्णं नन्दनं न प्रयच्छति मे शरणम् ॥

बृह०—अये ! किमेतत् । किंकृतोऽयमावेगस्त्वयि ?

सिद्धः—स्वामिन्, नायं विस्रब्धालापस्यावसरः । रक्षतु भवानात्मानम् ॥

मा०—अलमलमावेगेन । तिष्ठ (इति बलादुपगृह्य) वदतु भवान्, किं वृत्तम्?

सिद्धः—(सत्वरम्)

प्रालेयाद्रेः चन्द्रकान्तोपलेभ्यः गङ्गाकोटिस्सर्वतोऽप्युत्थिताऽद्य ।
तत्र प्रान्तस्सर्व एव क्षणेन क्षीराम्भोधौ मज्जितो वा विभाति ॥ २१ ॥

मा०, बृ०—किं किम्?

सिद्धः—सकलोऽपि पर्वतेश्वरः प्लवति । ततो भीतो विद्रुतोऽहम् । प्लाव्यते चित्ररथवनान्तश्च । अचिरेण ब्रह्माण्डमेव उद्वेल्लत्यस्मिन् प्रलयपयोधौ मज्जेत् । तद्रक्षतमात्मानौ । (इति वदत्येव परितोऽप्येकान्तं धवलं भवति रोदः, अतिमात्रं विद्योतते विशदिमा ॥)

मा०—आचार्य! आचार्य! उपेक्षितं नाम आवाभ्यामेतावत्कालम् सत्यमेव प्रलयपयोधेराक्रमः प्रवर्तते ॥

(विद्रुता अन्ये बहवः पर्याकुला आगच्छन्ति ।)

एकः—स्वामिन् प्रालेयशैलः प्रचलति

द्वितीयः— भगवन्नेष दुग्धाम्बुधामा
व्याप्तुं लोकान्समस्तान् बहुलितसलिलः प्लावयत्येवमद्य ।

बृह०—कैलासो नैव नो वा शिव इह न च वोल्लोलकोलाहलोऽतः?

मा०—हन्तासौ दाक्षिणात्यः क्व नु स मुनिवृषो वार्धिपो मृग्यतां भोः ॥ २२ ॥

(प्रविशति तत्पथेन गच्छन् परमेश्वरः सपत्नीकः, नारदश्च ।)

(नारदः बृहस्पतिसमीपमुपेत्य)

नारदः—भोः सुपर्वाचार्य! अयमत्र देवो वृषभध्वजो याति ।

बृहस्पतिः—स्वामिन्! वृषभध्वज इति अधिक एव श्वेतभ्रमः ।

ना०—अयमत्र भगवान् नीललोहितः शितिकण्ठः, समं सिन्दूरारुणया च पराशक्त्या ॥

बृ०, मा०—आः पश्यामि :

पुरातनस्य द्वन्द्वस्य पुरतो नतयो मम ।

सृष्टिस्थित्युपसंहारलीलाविभ्रमदर्शिनः ॥ २३ ॥

ना०—तदेहि, सुधर्मां याति वो मङ्गलाय सर्वमङ्गलापतिः । वयमपि साधयामः ॥

सर्वे—बाढम् ॥

(निष्क्रान्ताः सर्वे ।)

[इति विष्कम्भकः]

(सुधर्मा । प्रविशति महेन्द्रः वीररुद्रांसविन्यस्तहस्तः सपरिवारः ।)

देवेन्द्रः—संप्रति जाग्रति परितोऽप्यदृष्टचरपीयूषप्रसरे अपनीतनयनव्यथः स्वास्थ्यं प्रापितोऽस्मि । कुतः पांसवः, कुतः तमः, कुतो ज्योतिः, कुतो वेयं अपूर्वा कौमुदी इति विचारे परं कृपणा वयम् ॥

वीररुद्रः—(श्रुत्वा) महेन्द्र! किमिति किमिति?

दे०—सखे! कतिचन दिनानि देवलोकः आश्चर्यपरम्परया विपर्यासित आसीत् । अयं प्रसूतो विशदिमा च तस्यामेकः । न जाने कियदायामवती सेति । तद्भवतु, एहि महीनाथ, लज्जितास्स्मो वयमद्य त्वदीयविक्रमेण । किमुच्यते, त्वां धारयामो जीवितानि ॥

वीर०—विरम, विरम, सखे । अलमतिमात्रं मित्रं स्तुत्वा । अथवा, आत्मश्लाघायां किमिति ते रुचिः?

दे०—सत्यमाह भवान् । अनपर एव त्वमस्मत्तः । किं बहुना न सहे विकत्थनाम् ॥

(प्रविशति विधिहरिदेवर्षिसंघसमावृतः परमेश्वरः । उभौ प्रणमतः ॥)

परमेश्वरः---(सुधर्मामनुगृह्य अभयहस्तेन) भो भो देवाः, महर्षयश्च ! आसनं तत्तदलंकुर्वन्तु भवन्तः । महेन्द्र, अलंक्रियतां सिंहासनं वीररुद्रेण साकम् ॥

[सर्वे तथा कुर्वन्ति ।]

परमेश्वरः--

यन्नासीरजधूलिपुञ्ज इति वः प्रादादतीव व्यथां
यद्ध्वस्तारिमहीपतिव्यसनजं तादृक् तमश्चाभवत् ।
यत्तेजोऽसुरघस्मरं यदुदयत्कीर्त्याद्य सर्वं जगत्
दुग्धाब्धीयति सोऽयमेकदृषदो नाथो मदाख्याधरः ॥ २४ ॥

(तदा काचिदशरीरिणी वाणी वैतालिकत्वमाचरति ।)

दुकूलन्त्याशा आभरणति च तारावलिरियं
नभोगङ्गा माला व्यजनममृतांशुर्वियदपि ।
वितानं चास्थानं त्रिभुवनमहो दिग्वसनवत्
यशोराजान्ध्रेशो, मिलितमथवा कोटियुगलम् ॥ २५ ॥

(सर्वे विस्मयानन्दोत्फुल्ललोचनवक्त्राः । इन्द्रः किंचित् लज्जया श्वेतते; वीररुद्रः लज्जावनतमुखारविन्दो भवति ॥)

वीररुद्रप्रापितलक्ष्मीक ! महेन्द्र !

स्वस्था भवन्त्वसुरभीतिविनाशतोऽमी
देवाः, निलिम्पमुनयो हतकर्मविघ्नाः ।
अद्य त्वदीयपदमेष च वीररुद्रः
भुङ्क्ते त्वया सह, न यज्ञशतश्रमेण ॥ २६ ॥

(प्रसरति अरुणिमा सर्वतः । सर्वे संभ्रमन्ति ॥)

केचित्---अहो ! अपशकुनभूता रुधिरधाराः प्रवहन्ति ।

मुनयः——(उत्थाय) नहि नहि, सर्वमङ्गला, अहो, सन्ध्यादेवी!

(इति साञ्जलिबन्धं गायत्रीम् उच्चारयन्ति ॥)

परमेश्वरः——(प्रहस्य) भो देवाः, मुनयश्च, अलमन्यथाविकल्पैः । न किंचिदेतत् । गण्डूषपादाघातादिभिः पुनरपि नन्दनं उज्जीवयितुमादिष्टाः, नन्दनवनगताः अप्सरोविलासिन्यः अस्मद्भक्तस्य वीररुद्रस्य पराक्रमयशोवशीकृतस्वान्ताः तं प्रति प्रकटयन्त्यनुरागम् । तदेष रक्तिमा । तदासतां भवन्तो विस्रब्धम् । अद्य वीररुद्रस्य परमेश्वरप्रतिष्ठाभिषेकं करिष्यामि । पठ्यन्तां प्रशस्तयः ॥

(इति स्वशिरोवासपूतत्रिमार्गगाजलानि वीररुद्रस्योपरि आवर्जयति, स्वनन्ति भव्यवाद्यानि, पतन्ति पुष्पवृष्टयः, नृत्यन्ति अनुभावपेशलममराङ्गनाः । सर्वे हर्षोत्कर्षपुलकिता वर्तन्ते ॥)

परमेश्वरः——पठ्यन्तां प्रशस्तयः ।

(बृहस्पतिः प्रशस्तिवाचनाय संरभते; हिक्कति, शोधयति कण्ठं, भ्रान्ताक्षि स्तब्धीभवति, न तु वक्तुं शक्नोति ।)

परमेश्वरः——अहो! तपस्वी सुरगुरुरेडमूकतां गतः । ब्रह्मन्नाप्तवाक्यप्रणेतः, भारतीरमण! किमिदं जोषं भूयते ॥

ब्रह्मा——न न, नहि किंचित् । करोम्येव सन्दर्भम् । किन्तु महान् कालोऽद्य यतो गृहिणीविधुरोऽहं कुटुम्बकलहापदेशात् ब्रह्मचर्यमातिष्ठे ॥

परमेश्वरः——सत्यमाह भवान् । मयैव विस्मृतं, यदद्य विसृष्टपद्मलोका विहरति विजृम्भितविलासविलोला कुत्रचिदन्यत्रैव भगवती भारती ॥

विष्णुः——अतिलघु सञ्चराम्यद्य, यदद्य वत्सो वहति भूपालनधुरां, नास्ति च मे मुहुरवतारकार्यभारः । अपि च मामुज्झित्वा कुत्रापि गतां लक्ष्मीमन्तरा विषाद आसीत् । अद्य नवाश्रयं वीररुद्रं विलोक्य पूर्वास्पदं निकृष्टतरमेवेति यत्सत्यं लज्जापितोऽस्मि ॥

मुनयः—भो वीररुद्र! परमेश्वरप्रसादप्रथमपात्रस्य भवतः किमस्त्याशास्यम् । तदेवमस्तु, वत्स! चिराय स्थिरभक्तिर्भव भूतपतौ ॥

दिक्पालाः—स्वतस्सिद्धलोकाधिकधान्नस्ते किमस्मत्तो दिक्पालकवराकेभ्यो वरणीयम् । तदस्तु, त्वत्सामन्ता इव सम्यक् उन्निद्राः पालयामो दिङ्मुखानि ॥

परमेश्वरः—भवतु, कालोचितं तमेवामन्त्रयामि ।

(भगवन्निध्यानमुहूर्त एवाविर्भवन् ग्रासाग्रे प्रस्फुरत्प्रोथ इवाश्वः संरभते कवीश्वरो विद्यानाथः ।)

अये, प्राप्त एव स्ववैखरीखर्वीकृतगर्वसुपर्वगुरुः, निजसारस्वतविलासश्वेतमानचतुराननः, विवर्तो वाचो वैभवानां, मूर्तः लोकातिगच्छदुत्प्रेक्षापरम्परः, कविरन्वर्थाख्याप्रख्यो विद्यानाथः । भो देवाः, वन्दन्तां भवन्त एनम् । यस्य भगवति वीररुद्रे, वीररुद्रस्यैव यावती मदङ्घियुगे, तावत्या अपि भूयसी भक्तिः । न किञ्चिदपि अन्धेश्वरं स्तोतुं प्रवृत्तम् श्राम्यति तद्वदनम् । अनवधानावसरेऽपि नास्यास्यान्निष्पतति पद्यमेकमपि यन्न वीररुद्रपरमेश्वराभ्यदिश्यनामाङ्कितम् । किं बहुना, यत्सभ्यं जपत्येवायं तारकमन्त्रं प्रतापरुद्रं नाम पञ्चाक्षरीमयम् ॥

(इति वादिन्येव परमेश्वरे एतावदधोमुखो वीररुद्रः गृहीतसर्वाशीः पादयोः परमेश्वरस्य प्रणम्य उत्थाय)

विद्यानाथः—(कण्ठहेषापूर्वकं झञ्झामारुत इव मूर्च्छत् पठति)—

ससेवाहेवाकप्रतिभटमहीपालनिकर-
स्फुरत्कोटीराढ्यप्रसृमरमहोरत्नविविहैः ।
ज्वलद्भानुज्यूहैः स्नपितमरिराजन्यकमनो-
नभोभूजत्पादद्वयमुदयहेतोर्भवतु नः[1] ॥ २७ ॥

---

1. विद्यानाथविडम्बनार्थाः अन्येऽपि श्लोकाः नाटककर्त्रा कृताः, येष्वन्यतमोऽयं श्लोकः ।

परमेश्वरः—अहो! अयं कविरास्थानिको महाधाटिस्साहसी विद्यानाथः।

एतावदन्ध्रनृपतेः पटहं प्रताड्य
प्रध्माय शङ्खमपि नैव वितृप्यदास्यः।
आबद्ध्य कच्छमवशोध्य गलं प्रताप-
पादूसहस्ररचनाय विजृम्भतेऽद्य ॥ २८ ॥

वत्स! अलमतिश्रमेण। (देवादीनालोक्य) सर्व एव वयं मिलित्वा सद्य एव भूमण्डलं गत्वा वत्सस्य साम्राज्याभिषेचनमेकशिलायां निर्वर्त्तितं प्रेक्ष्य आत्मन आनन्दयामः। तदायान्तु सर्वे भवन्तः॥

(सर्वे तथेति उत्तिष्ठन्ति)

वत्स! किं ते भूयः प्रियमुपहरामि। तथापि इदमस्तु भरतवाक्यम्—
त्वत्तुल्येश्वरलाभमोदितमही संपद्भिरेवं सदा
देवानामुपकारलेशमपि वा नापेक्षमाणास्त्वसौ।
त्वं च प्रीणय नित्यमाश्रितमहीदेवान् सुरानोकह-
श्रीलुण्टाकयशश्चणैः प्रमथितारातिः स्वविश्राणनैः ॥ २९ ॥

[निष्क्रान्ताः सर्वे]

॥ इति परमेश्वरपट्टाभिषेकाख्यः चतुर्थोऽङ्कः ॥[1]

---

1. काकतीयवीररुद्रभूपालास्थानकविना विद्यानाथेन कृतं प्रतापरुद्रीयं नाम अन्तर्गतनाटकमलङ्कारग्रन्थं प्रतीकतया आदाय विश्रृङ्खलकल्पनामयस्य सर्वस्यापि अर्वाचीनस्य प्रशस्तिमयकाव्यस्य प्रहसनार्थे रचितमिदं रूपकम्। रूपकपरिणाम-भ्रान्तिमतामुत्प्रेक्षायाः अतिशयोक्तेश्च परम्परितरूपमादाय कविप्रौढोक्तिमात्रनिष्पन्न-शरीराणां वस्तूनां रजस्तमश्चन्द्रिकारुणिमश्वेतिमादीनां वास्तविकत्वमुपकल्प्य तद्द्वारा विचित्रव्यतिकरमयीं कथामुद्भाव्य निर्व्यूढमिदं रूपकमिति वेदितव्यं सहृदयैः॥

(निर्मातुर्भरतवाक्यम्)

त्यक्त्वा नैच्यं धरणिविबुधः स्वात्मविद्याविचारैः
प्राच्यां ख्यातिं भजतु पुनरप्यात्मनामानुरूपाम् ।
वाणी सूरेर्न भवतु कदाप्याश्रवा काञ्चनानां
योगो भूयात् भुवि सरसयोरेव भव्योदयश्रीः ॥ ३० ॥

॥ समाप्तमिदं रूपकं विद्यानाथविडम्बनापरनामा प्रतापरुद्रविजयः ॥

मनोबोधः-श्रीसमर्थरामदासस्वामिविरचितः

अनु० विश्वनाथकेशव छत्रे

मूलश्लोकक्रमांकाः १-८, ११, १३.

रामाप्तिमार्गः

गणाधीशमीशं गुणानामनन्तं
चतुर्वाक्खनिं शारदाम्बां च वन्दे
जगज्जातमेतद्यतो निर्गुणं तम् ।
सुदृग्गोचरो मेऽस्तु रामाप्तिमार्गः ॥ १

मनो ! भद्र ! भक्तेः पथैव प्रयायात्
जनैर्निन्दितं तत् त्यजेत् सर्वथैव
स्वभावात्ततः श्रीहरिः स्यात् प्रसन्नः ।
जनैर्वन्दितं सर्वभावेन कुर्यात् ॥ २

प्रभाते प्रभुध्यायतां रामचन्द्रो
सदाचारमत्याज्यमेवाचरन्ना
गिरा प्रोच्यतां पावनं रामनाम ।
सुधन्यो भवेद्भूतलेऽस्मिन्नवश्यम् ॥ ३

मनो ! माऽस्तु दुर्वासनाया लवोऽपि
मनो ! मा त्यजेत् सर्वथा धर्मनीती
मनो ! मा स्पृशेत् पापबुद्धिस्तथा त्वाम् ।
मनो ! रेऽस्तु सारोद्धृतौ ते विवेकः ॥ ४

मनः ! पापसंकल्पमाशु त्यज त्वं
मनो ! वासना माऽस्तु शब्दादिकेषु
समाश्रीयतां सत्यसंकल्प एव ।
विकाराभिभूतं विनिन्दन्ति लोकाः ॥ ५

मनो ! माऽस्तु दुःखावहः क्रोध एषो
मनो ! न श्रयेत्पापमूलं च लोभं
विकारी च कामः प्रकारैरनेकैः ।
वसेन्मत्सराद्दम्भदैत्याच्च दूरम् ॥ ६

मनो ! रेऽवलम्बस्व धैर्यं प्रसङ्गे
स्वयं ब्रूहि रे ! नम्रवाचैव नित्यं
गिरं मर्मभेत्रीमपि त्वं सहस्व ।
मनस्तोषय त्वं ततः सर्वलोकान् ॥ ७

स्वदेहावसानेऽपि जीवेत् स्वकीर्तिः
त्वया चन्दनेनेव रे ! स्वक्षयेण
तथैव क्रियां सन्मनो रे ! कुरुष्व ।
प्रतोषोऽजितव्यस्सतामन्तराणाम् ॥ ८

क आप्नोति सर्वाणि लोके सुखानि ?
कृतं कर्म यादृक् पुरा हि त्वयैव
विचिन्त्येति रेऽन्वेषितव्यं त्वयैव ।
तथैवोपभोक्तव्यमस्मिन् शरीरे ॥ ९

गतिः काऽभवद् भो मनो! रावणस्य?
त्यजातो दुरिच्छां मनः ! शीघ्रमेव
सराज्यं त्वकस्माद्विनाशं गतोऽसौ ।
ग्रसिष्णुर्हि कालोऽनुधावत्यखण्डम् ॥ १०

२ जहात्येष दासप्रियो नैव रामः

मूलश्लोकक्रमांकाः २८-३७

धनुर्धारिरामः स रे! दीननाथः पुरो वीक्ष्य तं कम्पते त्वन्तकोऽपि ।
मनः सत्यमेतन्न भोः शंकनीयं जहात्येष दासप्रियो नैव रामः ॥ १

त्रिलोक्या तु यन्नूपुरं गर्जतीव यद् 'अन्ते जयी रामदासः सदैव' ।
अयोध्यामशेषां दिवं यो निनाय जहात्येष दासप्रियो नैव रामः ॥ २

समर्थस्य दासे क्षणं वक्रदृष्टिं क उत्क्षेप्तुमस्यां क्षितौ स्यात् सुधृष्टः ।
मुदा वर्ण्यते यस्य लीला त्रिलोके जहात्येष दासप्रियो नैव रामः ॥ ३

महासङ्कटेभ्यः सुरा येन मुक्ता गुणी सर्वतो यो बलिष्ठः प्रतापी ।
सदा स्मर्यते यः शिवाशङ्कराभ्यां जहात्येष दासप्रियो नैव रामः ॥ ४

अहल्या शिलारूपतो येन मुक्ता पदस्पर्शमात्रेण दिव्या कृता च ।
ययुर्विक्रमं वर्णने यस्य वेदा जहात्येष दासप्रियो नैव रामः ॥ ५

शशी भास्करस्तारका मेघमाला वसन्तीह यावच्च मन्दारमेरू ।
चिरंजीवितां येन नीतौ स्वदासौ जहात्येष दासप्रियो नैव रामः ॥ ६

उपेक्षा तु संभाव्यते नैव रामात् परं चञ्चलं तन्मनो मानवस्य ।
पुरोवाच यो 'भक्तचिन्तां वहामि' जहात्येष दासप्रियो नैव रामः ॥ ७

नरो यादृशं भावमन्तर्बिभर्ति वसत्यन्तरे तादृशस्तस्य देवः ।
अनन्यस्य यो रक्षिता चापपाणिः जहात्येष दासप्रियो नैव रामः ॥ ८

समीपस्थ एवास्ति देवः सदैव कृपालुः परीक्षेच्छुकस्तु क्षणैकम् ।
सुखानन्दरूपश्च मोक्षप्रदो यो जहात्येष दासप्रियो नैव रामः ॥ ९

यथा प्रत्यहं चक्रवाकार्थमर्कः तथा धावति द्राक् प्रभुः संकटे यः ।
नदत्यम्बरे डिंडिमो यस्य भक्तेः जहात्येष दासप्रियो नैव रामः ॥ १०

३ सुधन्यः स दासोऽस्ति सर्वोत्तमस्य

मूलश्लोकक्रमांकाः ४७-५६

बहिः श्रीहरिं वीक्षतेऽन्तस्तथा च हरेर्ज्ञान्यपि स्नेहयुक्तः सुभक्तः ।
रतः कीर्तने साधनं चानुतिष्ठन् सुधन्यः स दासोऽस्ति सर्वोत्तमस्य ॥ १

सदा क्षीयते यत्तनुर्दैवकार्ये सदा वर्तते यन्मुखे रामनाम ।
स्वधर्मस्य यः पालने नित्यदक्षः सुधन्यः स दासोऽस्ति सर्वोत्तमस्य ॥ २

सदैव क्रिया यस्य भाषानुरूपा अपश्यत्यनेकेषु देवं य एकम् ।
भजत्यप्यशङ्को गुणोपेतरूपं सुधन्यः स दासोऽस्ति सर्वोत्तमस्य ॥ ३

विकारीति चित्तेऽल्पमात्रोऽपि कामो यतिर्ब्रह्मचारी तथोदासवृत्तिः ।
लवं नावशिष्टस्तमो नित्यशान्तः सुधन्यः स दासोऽस्ति सर्वोत्तमस्य ॥ ४

मदो मत्सरो नाथवा स्वार्थबुद्धिः न वा बाधते यं भवस्योपसर्गः ।
सदा भाषणं स्वादु नम्रञ्च यस्य सुधन्यः स दासोऽस्ति सर्वोत्तमस्य ॥ ५

नयंस्तत्त्वचिन्तानुवादेन कालं विवादेन वादेन दम्भेन शून्यः ।
सुखं ब्रह्म संभाष्यते येन मूलं सुधन्यः स दासोऽस्ति सर्वोत्तमस्य ॥ ६

ऋजुः सर्वदा सर्वलोकप्रियश्च विवेकी तथा सत्यवाग्यः सदैव ।
असत्या न बह्वर्थदा वा यदुक्तिः सुधन्यः स दासोऽस्ति सर्वोत्तमस्य ॥ ७

सदाऽरण्यवासी च तारुण्यकाले न जालेन यो बध्यते कल्पनायाः ।
दृढो निश्चयो नाविचाल्यश्च यस्य सुधन्यः स दासोऽस्ति सर्वोत्तमस्य ॥ ८

न दुष्टा दुराशा लवाप्यस्ति चित्ते हरिप्रेमतृष्णार्तमास्तेऽन्तरं च ।
ऋणी श्रीहरिर्येन भक्त्या कृतश्च सुधन्यः स दासोऽस्ति सर्वोत्तमस्य ॥ ९

मनः कोमलो यो दयालुश्च दीने कृपालुस्तथा वत्सलो दासपाता ।
कुतः कोपसन्तापलेशोऽन्तरे स्यात् ? सुधन्यः स दासोऽस्ति सर्वोत्तमस्य ॥ १०

४ प्रभाते प्रभुर्ध्यायतां रामचन्द्रः

मूलश्लोकक्रमांकाः ६७-७६

घनश्याम-रामः स लावण्यमूर्तिः प्रतापी महान् धैर्यमेरुर्गभीरः ।
विपत्तौ स्वदासान् स रक्षत्यवश्यम् प्रभाते प्रभुर्ध्यायतां रामचन्द्रः ॥ १

बलिष्ठं धनुर्धारि-रामं विलोक्य कराल: कृतान्तोऽपि कम्पं प्रयाति ।
तदग्रे नरो दुर्बलः किं नु कुर्यात्? प्रभाते प्रभुर्ध्यायतां रामचन्द्रः ॥ २

सुखानन्ददं सर्वभी-नाशनं च भजेद् भक्तिभावेन रामं सदैव ।
विवेकेन जह्याच्च दुर्वर्तनेच्छाम् प्रभाते प्रभुर्ध्यायतां रामचन्द्रः ॥ ३

जपेद्यः सदा कामदं रामनाम न बाधेत तं भक्तमापत् कदापि ।
मदं सर्वमालस्यमप्याशु जह्यात् प्रभाते प्रभुर्ध्यायतां रामचन्द्रः ॥ ४

दहेद् घोरदोषान् क्षणे यस्य नाम नयेत् सद्गतिं मानवं यस्य नाम ।
भवेत्पुण्यराशिस्तथा यस्य नाम्ना स रामः प्रभुर्ध्यायतां सुप्रभाते ॥ ५

न तु क्षीयते सञ्चितार्थोऽशतोऽपि मनो! न श्रमो नामघोषे लवोऽपि ।
महाघोरसंसारशत्रुं विजेतुं प्रभाते प्रभुर्ध्यायतां रामचन्द्रः ॥ ६

महद्दुःखदो देहदण्डस्य मार्गः परं रामनाम्नो जपो दुःखहारी ।
स्वयं शङ्करो ध्यायते देवदेवम् प्रभाते प्रभुर्ध्यायतां रामचन्द्रः ॥ ७

अनेकानि विघ्नानि योगादिकेषु व्रतोद्यापनाद्यर्थमर्थस्त्ववश्यः ।
दयालुः स दीनेष्वतो ध्यायतां रे! प्रभाते प्रभुर्ध्यायतां रामचन्द्रः ॥ ८

जपो रामनाम्नोऽग्रणीः साधनानाम् न चेद् ज्ञायते, मृग्यतां चिन्तनेन ।
वृथा संशयस्त्याज्य एवास्ति सद्यः प्रभाते प्रभुर्ध्यायतां रामचन्द्रः ॥ ९

क्रिया दुष्करा नैव धर्मो न योगो न भोगोऽखिलस्त्याग उक्तस्त्ववश्यः ।
दृढं विश्वसेन्नाम्नि वक्तीति 'दासः' प्रभाते प्रभुर्ध्यायतां रामचन्द्रः ॥ १०

५ स नोपेक्षते भक्तमीशः कदापि

मूलश्लोकक्रमांकाः ११६-१२५

ऋषेः[1] शापतः पीडितेऽत्यम्बरीषे तदर्थं मुदा योऽग्रहीन्नैकदेहान् ।
दैदौ[2] बालभक्ताय यः क्षीरसिन्धुं स नोपेक्षते भक्तमीशः कदापि ॥ १

सुदीनेन बालेन भक्तध्रुवेण य आर्तस्वराहूत आविर्बभूव ।
पदं सुस्थिरं व्योम्नि तस्मै ददौ च स नोपेक्षते भक्तमीशः कदापि ॥ २

गेजेन्द्रेण यः प्राथितः प्राणकृच्छ्रे प्रधाव्याशु नक्रग्रहात्तं ररक्ष ।
प्रदीर्घप्रतीक्षार्तभक्तं दयार्द्रः स नोपेक्षते भक्तमीशः कदापि ॥ ३

यैदाऽजामिलं प्राप उग्रः कृतान्तो दयार्द्रेन पाप्मापि येनोद्धृतोऽसौ ।
अनाथाश्रयश्चक्रपाणिर्य एकः स नोपेक्षते भक्तमीशः कदापि ॥ ४

विधातुः कृते यो बभूवाशु मीनः समुद्धर्तुमब्धेर्धरित्रीं च कूर्मः ।
जनार्थं वराहोऽप्यभून्नीचदेहः स नोपेक्षते भक्तमीशः कदापि ॥ ५

पितृक्लेशिते भूरि कायाधवे हा! नृसिंहाकृतौ स्तंभतो योऽवतीर्णः ।
शिखा यन्मुखाग्नेस्त्वसह्याः प्रतीताः स नोपेक्षते भक्तमीशः कदापि ॥ ६

कृपायाः प्रसादं यदेन्द्रो ययाचे तदर्थं दधाराकृतिं वामनस्य ।
द्विजान् रक्षितुं योऽभवद् भार्गवश्च स नोपेक्षते भक्तमीशः कदापि ॥ ७

वने यन्नहल्यां मुमोचोग्रशापात् सुरान् यश्च सर्वान् दशास्यस्य बन्धात् ।
त्रिलोकेऽनदद्यद्यशोडिंडिमश्च स नोपेक्षते भक्तमीशः कदापि ॥ ८

य उग्रापदि द्रौपदीह्रीं प्रपातुं विहाय प्रियाराज्यचिन्तामधावत् ।
कलौ योऽश्रयद् बौद्धरूपं समौनं स नोपेक्षते भक्तमीशः कदापि ॥ ९

स भूयोऽवतीर्णः प्रपातुं सुदीनान् अनाथांश्च, कल्किर्भविष्यत्यवश्यम् ।
ययुर्विक्रमं वर्णने यस्य वेदाः स नोपेक्षते भक्तमीशः कदापि ॥ १०

फलश्रुतिः

(२०५) मनोबोधमाकर्ण्य दोषघ्नमेनं पदं मन्दधीर्विन्यसेन्मुक्तिमार्गे ।
क्रमाज्ज्ञानवैराग्यसामर्थ्ययुक्तो विमुच्येत विश्वस्य वक्तीति 'दासः' ॥

---

१. दूर्वाससः । २. उपमन्यवे ३. 'नारायण' 'नारायण' इति स्वपुत्रम् आह्वयन्तम् ।

श्रीमदान्ध्रनायकशतकम्

अनु० श्री. ति. गु. वरदाचार्यः

[विदितचरमिदं विमर्शकानां यदान्ध्रभाषायां शतकवाङ्मयमनितरसाधारणी-मभिवृद्धिमवापेति । वाङ्मयेऽस्मिन्नन्तर्भूतानि शतकानि परस्सहस्राणीति नेयमति-शयोक्तिः । तेषु कानिचन नीतिबोधकानि कतिचन देवतास्तुतिपराणि च । भाषान्तरीयाणामुपकाराय शतकसप्तकमितःपूर्वमेव गैर्वाण्यामनूद्य मुद्रितम् । अष्टम-मिदमान्ध्रनायकशतकं नाम परिवर्तितं प्रकाश्यते । अत्र भगवानान्ध्रनायकस्वामी निंदास्तुत्या स्तूयते । यो हि भगवान् कृष्णानदीतटस्थे श्रीकाकुलनामके क्षेत्रे विराजमानः आन्ध्रविष्णुः, आन्ध्रदेवः, श्रीकाकुलेश इति नामान्तरैरप्यभिधीयते । आन्ध्राणामिष्टदैवत्वेनादिमं नामद्वयं, श्रीकाकुलपुराधिष्ठानादन्तिममभिधानं च सञ्जातम् ।

आन्ध्रनायकस्वामिन आलयः तत आरभ्य शताब्दीद्वयानन्तरे काले तद्धर्म-कर्तृणामुपेक्षावशादुपक्षीणपूजोत्सवादिको बभूव । एतदवलोक्य तत्प्रान्तवासी कासुल पुरुषोत्तमकविः बलवद्विषण्णः 'भो भगवन, आन्ध्रनायक, यावत्त्वं स्वप्रभावं प्रकटय्य भूतपूर्वामुत्कृष्टामवस्थां नावाप्स्यसि, तावदहं निन्दया ते संक्षोभं प्रकल्प्य प्रकृतिस्थं त्वां विधातुं प्रयते' इति प्रतिज्ञाय निंदास्तुतिसरण्या तत्तदवतारेषु विष्णुविचेष्टितानि विमृशति । एवमत्र प्रदर्शितं सुमहदात्मनः पुराणविज्ञानं कविना । कविरसौ वन्दिमागधवृत्त्युपजीविनां 'भट्टराजानां' कुलविशेषे जनिमुपलेभे । पूर्वोक्तादयं कविः क्रीस्तुशकाष्टादशशताब्द्याः पश्चार्धे तदनन्तरायाः पूर्वार्धे च बभूवेति शक्यमभ्यूहितुम् । भाषाशैल्या च, आन्तं निन्दास्तुतेः सुनिपुणनिर्वहणेन च कविरयमुत्तमकक्ष्यायां विनिवेशितो विमर्शकैः ।]

अत्रोपयुक्तं 'सीसं' 'तेटगीति' श्चेति वृत्तद्वयमेकपद्यत्वेन परिगण्यते । अनुवादे तावत् सीसस्य द्वे उपजाती, तेटगीतेरेका चेति तिस्रः उपजातयः एकवाक्यतया संदानितकत्वेनावगन्तव्याः ।]

सी ॥ [1]श्रीमदनन्त लक्ष्मीयुतोरस्स्थल ! चतुराननांडपूरितपिचण्ड ।
दरचक्रखड्गगदाशरासनहस्त ! निखिलवेदान्तवर्णितचरित्र ॥
सकलपावननदीजनकपादांभोज ! रमणीयखगकुलोत्तमतुरङ्ग ।
मणिसौधवत्फणामण्डलोरगतल्प ! वरकल्पकोद्यानवनविहार ॥

---

1 आदिमं पद्यचतुष्टयं संस्कृतप्रायतया यथामूलं निवेशितम् ।

ते ॥ भानुसितभानुनेत्र ! सौभाग्यगात्र ! योगिहृद्गेय ! भुवनैकभागधेय ।
चित्रचित्रप्रभाव ! दाक्षिण्यभाव ! हृतविमतजीव ! श्रीकाकुलान्ध्रदेव ! ॥ १

सी ॥ वैजयन्तीदाम ! वर्णितसुत्राम ! शोभननाम ! लोकाभिराम ! ।
कुवलयश्याम ! विकुण्ठपट्टणधाम ! श्रुतिहितनाम ! दैवतललाम ॥
कृतदैत्यसंग्राम ! गीतार्थपरिणाम ! यदुकुलाम्बुधिसोम ! अघविराम ! ।
संगरजितभौम ! रङ्गद्गुणस्तोम ! त्रिभुवनक्षेम ! वर्धिष्णुकाम ! ॥

ते ॥ दासुलमुकाम, नीपेरुदलचुकोम कोसरितिमिप्रेम कोरिनकोर्कुलीम । *
चित्रचित्रप्रभाव ! दाक्षिण्यभाव ! हृतविमतजीव ! श्रीकाकुलान्ध्रदेव ! ॥ २

सी ॥ मानुषहर्यक्ष ! मार्ताण्डसोमाक्ष ! त्रिभुवनाध्यक्ष ! कौन्तेयपक्ष ! ।
मदनकोटिविलास ! मञ्जुलदरहास ! श्रीहृन्निवास ! कौशेयवास ! ॥
शार्ङ्गकोदण्ड ! पिचण्ड भृताजाण्ड ! विमतवेदण्ड ! रविप्रचण्ड !
दीनशरण्य ! विद्विद्छेदनैपुण्य ! भक्तानुगण्य ! दिक्प्रभुवरेण्य ! ॥

ते ॥ सिद्धसङ्कल्प ! अविकल्प ! शेषतल्प ! निष्कलङ्क ! निरातङ्क ! निरुपमाङ्क ।
चित्रचित्रप्रभाव ! दाक्षिण्यभाव ! हृतविमतजीव ! श्रीकाकुलान्ध्रदेव ! ॥ ३

सी ॥ गोविन्द ! मुचिकुन्दसेवितपादारविन्द ! नित्यानन्द ! विश्वतुन्द ! ।
श्रीमन्त ! विजयलक्ष्मीकान्त ! निर्मलस्वान्त ! भक्तोद्यानवनवसन्त ! ॥
अघनाश ! कोटिसूर्यप्रकाश ! परेश ! विजिताश ! सन्मनोम्बुजनिवेश ! ।
सद्गुणगेह ! वासवनीलसमदेह ! बन्धुरोत्साह ! सुवर्णवाह ! ॥

ते ॥ पण्डितस्तुतचारित्र ! पद्मनेत्र ! मधुरमञ्जुलभाष ! समस्तपोष ।
चित्रचित्रप्रभाव ! दाक्षिण्यभाव ! हृतविमतजीव ! श्रीकाकुलान्ध्रदेव ॥ ४

श्रीकाकुलं संश्रितपारिजातः श्रीकाकुलं पुण्यततेर्निधानम् ।
श्रीकाकुलं भूमिगतो विकुण्ठः श्रीकाकुलं मर्त्यजनोपसेव्यम् ॥

---

* अस्य पद्यार्धस्यानुवादोऽयम—
किं ते न दासा वयमीश्वरस्य ध्यायेम ते नाम न चानघं किम् ।
याचामहे ते परमं प्रसादं प्रसीद दातुं सकलान्वरान्नः ॥

श्रीकाकुलं वेदविदां च केन्द्रं श्रीकाकुलं व्याकुलतापहारि ।
श्रीकाकुलं क्षेत्रवराग्रगण्यं श्रीकाकुलं प्रेप्सितवस्तुसिद्धि ॥
श्रीकाकुलं ते वसतिः पवित्रा त्वमान्ध्रनेता भवसीह विष्णुः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ५

तवेन्द्रनीलद्युतिभृच्छरीरे स्वर्णाम्बरापीतरुचिं दधाने ।
उदग्रबाह्वङ्गदरत्नभाभिः उद्भासिते ते मकुटे शिरःस्थे ॥
त्वदानने पार्वणचन्द्रतुल्ये रम्योर्ध्वपुण्ड्रेण विभूषिते च ।
वक्षःस्थहारत्विषि वर्धितायां सत्कौस्तुभान्तःस्थपयोधिपुत्र्या ॥
प्रदर्शितात्मा शमयास्य पापं दत्ताभयो बोधय चात्मतत्त्वम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ६

यो जातमात्रो जनयन् स्वपित्रोः आश्चर्यमोदौ लपितुं प्रवृत्तः ।
योऽदर्शयन्मातरमात्मकुक्षौ समस्तलोकप्रचयं स्वबाल्ये ॥
मात्राङ्कसंस्थापित एव तस्याः शिशुश्च योऽभूद्गिरितुल्यभारः ।
अङ्काज्जनन्याः प्रतिवेश्म गत्वा प्रसह्य कान्ताभिररंस्त यश्च ॥
अहो स डिम्भोऽसि विचित्रवृत्तः किमस्ति किंचिद्यदगोचरं ते ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ७

विद्रोग्धुरीशस्य वरप्रदातुः भस्मासुरस्याशमयोऽपि नाम ।
सन्त्रातुमुग्रं निजवेश्मपालं विच्छिन्नबाहुं च चकर्थ बाणम् ॥
त्वं सोमकं वेदहृतं निहत्य प्रत्यार्पयस्तान् द्रुहिणाय वेदान् ।
सुधां गृहीतामसुरैः प्रसह्य तान्वञ्चयित्वा त्वमदास्सुरेभ्यः ॥
निर्वर्त्यमानाखिलदेवकार्यस्यात्मीयकार्यं किमु दुष्करं ते ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ८

त्वं तत्र नासीति रुषा करेण स्तम्भं स दैन्यो विबिभेद गोष्ठयाम् ।
त्वं तत्र नासीति किलोत्तरायाः प्रायुङ्क्त गर्भे गुरुसूनुरस्त्रम् ॥
त्वं तत्र नासीति सुयोधनेन वने सपत्नान् प्रहितः स कोपी ।
त्वं तत्र नासीति भुजङ्गकेतुः किं द्रौपदीं नाऽकृत वस्त्रहीनाम् ॥
किं नासि तत्र प्रथमं त्वभूत्वा तथा त्वमत्रापि भव प्रदेशे ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ९

अखण्डदीपद्युतिभिः प्रदीप्तः त्वदालयस्संततमेव दृष्टः ।
समर्पितैश्चागरुसारधूपैः सौरभ्यपूर्णं भवनं तवासीत् ॥
अजस्रतौर्यत्रिकमञ्जुनादैः त्वद्धाम चाभूत्प्रतिशब्दयुक्तम् ।
सर्वोपचारार्पणतश्च काले त्वद्देहलक्ष्मीः परिवर्धिताऽऽसीत् ॥
लोभप्रभावादिव दृश्यसे त्वं प्रक्षीणभोगः किमु युक्तमेतत् ।
चित्रप्रभाव ! प्रथिताऽन्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १०

शिलामयं विग्रहमात्रमेतत् कथं हरिस्स्यादिति केचिदाहुः ।
अत्राभविष्यद्यदि काकुलेशः प्रादर्शयिष्यत्स्वमितीतरे च ॥
अन्ये च बुद्धाकृतिरेष तस्मात् सर्वं विजानन्नविदन्निवास्ते ।
किं स्वप्रभावं विवृणीत देवः किं किं भवेद्वेति परे ब्रुवन्ति ॥
नित्योपचारैः रहिते त्वयीत्थं जनप्रलापान्न शृणोषि किं त्वम् ।
चित्रप्रभाव ! प्रथिताऽन्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ११

अष्टोत्तरक्षेत्रशते धरण्यां श्रीकाकुलं स्याद्यदि सुप्रसिद्धम् ।
त्वमान्ध्रनेतेति जनैश्च सर्वैः यत्स्तूयसे तद्यदि सत्यमेव ॥
वैखानसोक्तेरमृषात्वबोधी सकेशमात्मानमदर्शयश्चेत् ।
अर्चावतारेण परात्स्वधाम्नः व्यक्तस्त्वमत्र स्वयमागतश्चेत् ॥
नानाविधानोत्सवभाजनं स्वं न चेत्करोष्याशु भवेदकीर्तिः ।
चित्रप्रभाव ! प्रथिताऽन्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १२

आरोपणं ते गरुडध्वजस्य कदा करोषीत्यभिधेहि सत्यम् ।
कदा नु कल्याणमहोत्सवस्ते सकौतुकं स्यादिति बोधयाशु ॥
रथाधिरूढो रमया सह त्वं कदैषि वीथीष्विति चक्ष्व देव ।
कदा च दूरागतभक्तबृन्दं संख्यामतीयात्कथयाब्जनाभ ॥
वर्षोत्सवस्येक्षणकौतुकं ते कदा जनानां वद सिद्धिमेति ।
चित्रप्रभाव ! प्रथिताऽन्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १३

पीताम्बरेणावृतवत्तनूं स्वां संभावयन्प्राप्तसुवर्णकान्तिम् ।
लक्ष्मीसहोद्भूतमणौ प्रनष्टे भूषान्तरालंकृतवत्प्रहृष्यन् ॥
अनर्घरत्नस्थगितं किरीटं निजोत्तमाङ्गस्थमिति प्रतुष्यन् ।
कर्णद्वयं सद्युतिकुण्डलाभ्यां सहोदिताभ्यामिति मन्यमानः ॥

समृद्धिमानर्जनदक्षिणश्च किं ते पुराणैर्वसनैर्धनैश्च ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १४

किं क्षेत्रपालेषु न वञ्चना ते यद्यर्चनाकार्यततिर्विमुक्ता ।
किं नापकीर्तिर्विषयान्तरेषु वर्षोत्सवाश्चेद्विरता भवन्ति ॥
किं नोपहासोऽन्यमतानुगेषु न मानयेच्चेन्निजदासकोटिः ।
सामान्यधीः किं त्वयि नाल्पवित्सु प्रकाश्यते चेन्न तव प्रभावः ॥
अद्यैव जाता किमु ते प्रतिष्ठा धर्म्याच्चुतः प्राप्स्यसि गर्हणां त्वम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ॥ १५

उपस्थितेऽप्युत्सवहर्षकाले तत्संविधानं किमु कार्यते न ।
दासव्रजस्याक्षिमुदं प्रदातुम् किं क्षेत्रवीथीषु रथेन नैषि ॥
अशेषपापापहमात्मनीनं दत्से प्रसादं किमु न प्रजाभ्यः ।
तीर्थं च सार्थस्तव दिव्यदेशः किं नोऽनुगृह्णासि न चक्रतीर्थम् ॥
हठेन वंशक्रमतो भवन्तं निन्दास्तवेनोपहसामि पश्य ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १६

किं साम्प्रतं गोपपुरस्थितानां अमायिनीनां भवतापहारः ।
हृतेन युक्तं किमु मन्दिरेभ्यः गव्येन कुक्षेः परिपूरणं ते ॥
स्नानं चरन्तीस्वबलास्ववस्त्रं तद्वस्त्रमोषः किमु युज्यते ते ।
प्रसूनहेतोः कुपिता स्वभार्या प्रसादनीया प्रणिपाततः किम् ॥
हास्यानि कार्याणि कतीदृशानि भवानकार्षीत्पटुता तवाहो ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १७

क्लिष्टेषु तिष्ठत्सु सुरासुरेषु स्वत्वं तवाभूज्जलधेरधत्ये ।
याच्ञाभिषेणापहृतं त्वयासीत् महावदान्यस्य बलेस्समस्तम् ॥
सत्राजितः स्वीयमदातुकामात् स्यमन्तकं वञ्चनयाग्रहीस्त्वम् ।
उत्खाय तं नन्दनवृक्षराजं स्वप्राङ्गणे रोपयितुं समर्थः ॥
किं दीपधूपाशनवस्त्रगन्धताम्बूलहीनोऽसि विचित्रमेतत् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ॥ १८

स्वमुद्वहेर्मूर्धनि बर्हिबर्हं धर्तुं किरीटं क्षितिपः किमु त्वम् ।
कण्ठे भवेयुर्वनमालिकास्ते हारार्पणायावनिपोऽसि किं त्वम् ॥

करेण वेणुर्ग्रहणीय एव क्षत्रोऽसि वोढुं किमु शातखड्गम् ।
गोक्षीरगन्ध्येव भवच्छरीरं किं चन्दनं लेपयितुं नृपस्त्वम् ॥
गोपाल इत्येव भवान्प्रसिद्धः न त्वं कुलीनः कुत एष गर्वः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ॥ १९

कारागृहे त्वं पितरौ विहाय पलायितोऽभूः किमिदं महत्त्वम् ।
अरिष्टशय्यास्थशिशौ हृते ते परेण तूष्णींभवतो धृतिः का ॥
अन्येन बद्धे निजपौत्र एव किमज्ञताया नटनं हि धैर्यम् ।
मध्येऽर्णवं निर्मितवेश्मनस्ते द्विषा जितस्याद्भुतमेव वीर्यम् ॥
पराजितश्च प्रपलायितश्च मर्मज्ञ आसीररिभित् कियत्तत् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ॥ २०

भिल्लाङ्गनाभुक्तसमुज्झितेषु फलेषु नासीत्तव हेयभावः ।
इन्द्रात्मजस्यन्दनसारथित्वं न निन्द्यमीषत् भवदीयदृष्टौ ॥
गोपालगोपालनमल्पतोऽपि नाचिन्तयस्त्वं प्रविगीतकर्म ।
सिष्णासुगोपीवसनापहारे नावद्यताबुद्धिरुदेति ते स्म ॥
गुणागुणज्ञानविहीनचेष्टाः भक्तार्थमेता इति तु ब्रुवन्ति ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ २१

अराज्यसिंहासनरोहिणस्ते द्विषः पलायन्त कथं समित्याम् ।
कथं क्षितीशाः अददुः स्वकन्याः गोपाय तुभ्यं कुलमप्यदृष्ट्वा ॥
अम्भोदनीलद्युतिमच्छरीरं नारीततिस्त्वां चकमे कथं वा ।
कथं नु दासाः त्वयि बद्धभावाः यो याचकानर्थयते स्वकामान् ॥
लीलाभिरेते भवतो भवन्ति भ्रान्ताः अनर्हो यशसः त्वमस्य ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ २२

पराक्रमाक्रान्तदिगन्तरस्य हेमाक्षदैत्यस्य जयो हि धाष्ट्यम् ।
हस्तस्थपीयूषविगर्वितायाः सुरारिकोटेः शमनं हि शाठ्यम् ॥
स्तन्यं प्रदित्सोः सविषं जिघांसोः स्वं पूतनाया हतिरङ्गलीला ।
स्वकंसपुर्यागमनावरोधिमत्तेभहत्या बलिमानितैव ॥
किं शौर्यकार्याणि भवन्ति तानि न कापि तैस्ते गणनात्र लोके ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ॥ २३

स्वमेव कंसस्य निहन्तुमिच्छोः पलायितस्त्वं भगिनीं समर्प्य ।
अशक्नुवंस्तं नरकं विजेतुम् भार्यार्पितास्त्रः स्थित एव पार्श्वे ॥
त्वं पर्यणैषीः प्रसभं समित्याम वैदर्भजां सोढतदीयनिन्दः ।
प्रसूनबाणाहतिदूनचेताः कान्तापदाम्भोजनतस्त्वमासीः ॥
शौर्यं तवेदृक्, परमाद्भुतं तु नात्येति विश्वं भवतो यदाज्ञाम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ २४

गोपीप्रहारात्किमु गोपपुर्यां संरक्षितुं स्वं प्रतिवेश्म नाऽगाः ।
त्वं रासकेल्यां रमणीचयस्य संमर्दनात्किं न पलायितोऽसि ॥
किमीक्षितः षोडशभिः सहस्रैः, भूपात्मजाभिः न हि वीतधैर्यः ।
भार्याष्टकेन प्रणये विवादे विनिन्दितस्तान् किमु नान्वनैषीः ॥
बिभेति यः खल्वबलासकाशात् त्वं शत्रुभूभृत्पुरतः कथं स्याः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ २५

विश्वंभरायां महिते कलत्रे त्रैलोक्यभर्तेति भवान्प्रसिद्धः ।
दारैश्च लक्ष्म्याऽमितसंपदा ते कामप्रदातेति यशस्त्वमापः ॥
प्रजापतौ स्रष्टरि ते तनूजे जगत्कुटुम्बीत्यभिधा तवासीत् ।
विनाशिताघा तनया च गङ्गा पापापहत्वं भवतश्चकार ॥
दारात्मजापादितकीर्तिमांस्त्वं दामोदरो जन्मन आदितोऽपि ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ २६

त्वमब्धिकन्यामुपयम्य लक्ष्मीं कृताधिवासः श्वशुरस्य गेहे ।
षण्डाय पाण्डोस्तनयाय दत्ता त्वयानुजाता किमिदं गृहित्वम् ॥
प्रौढां च कन्यामनुमन्यमानः मुग्धाय दातुं कुरुषे न सम्यक् ।
आत्माग्रजस्य प्रवयोऽङ्गनायाः विवाहक्लृप्तिः किमु साम्प्रतं ते ॥
नाज्ञो भवानीदृशकर्मकारी न त्वीदृशं त्वामवयन्ति विज्ञाः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ॥ २७

त्वज्ज्येष्ठसूनुस्सततं करोति क्रिया अगण्याः प्रविनाशिनीश्च ।
प्रियोऽपरस्ते तनयस्तनोति स्त्रीपुंसबन्धं दृढमोहपाशैः ॥
त्वदीयभार्याऽखिललोकमाता सपक्षपाताऽतति चञ्चला च ।
अनादिभूतस्वकमायया त्वं अशेषजन्तूंस्तनुषे सुबद्धान् ॥

परस्परस्मादधिका भवन्तः त्वद्वंशरीतेः कमनीयताहो ! ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ॥ २८

कियांस्तदा त्वं स्वविलीनविश्वः यदाध्यशेथाः वटपत्रमात्रम् ।
कियांस्तदा त्वं मृदुवस्त्रसंस्थं त्वां लालयामास शिशुं यशोदा ॥
कियांस्तदा त्वं कुटिला पुपोष पितृष्वसा त्वां स्वजनं विधातुम् ।
कियांस्तदा त्वं फणिनः फणाग्रे ननर्तिथाज्ञातभयो यदैव ॥
किं ते प्रतिष्ठा निगमेषु यस्य नीवारशूकप्रतिमत्वमुक्तम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ॥ २९

अव्याहतं ते वचनं विधेयेष्वमायिगोपेष्वधिगोपपल्लि ।
अव्याहतं ते वचनं वचस्थैरामोद्यमानं मधुरास्थलोकैः ॥
अव्याहतं ते वचनं स्वकीये स्वद्वारकावस्थितभक्तबृन्दे ।
अव्याहतस्ते महिमेभपुर्यां युधिष्ठिरेऽभ्यर्चति राजगोष्ठ्याम् ॥
अनाश्रितास्त्वां नहि चिन्तयेयुः न तेऽत्र लब्धप्रसरा हि लीलाः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ३०

पापं चरन्तं सममन्यवत्सैः वत्सं निरुध्य प्रसभं जघन्थ ।
जिघांसयायातमहोक्षमुग्रं शृङ्गे गृहीत्वा क्षपयां चकर्थ ॥
विदारयन्तं बकमात्मचंच्वा प्राशीशमो भेदितकन्धरं त्वम् ।
पदाभिघाती च मृगाधमश्चेत्यचिन्तयन् गर्दभममप्यहंस्त्वम् ॥
अहो तवैतान्यपदानकानि सदेदृशस्ते कृतयो धरण्याम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ॥ ३१

प्रपन्नपार्थाय कृतोपदेशः युद्धं विधेयं प्रतिबोधयंस्त्वम् ।
नैपुण्यनिर्वर्तितसन्धिदूत्यः पक्षौ दधानः समरोद्यतौ तौ ॥
लोकार्थमादर्शितविश्वरूपः कुरुक्षितीशं व्यथयंश्च सेर्ष्यम् ।
आश्रुत्य धन्वाऽग्रहणं पुरा त्वं सुयोधनं सस्पृहमेव तन्वन् ॥
बन्धुव्रजस्याप्रशमय्य वैरम् दिदृक्षसे तत्क्षयमेव युद्धे ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ॥ ३२

वैकुण्ठनाथोऽपि महाविभूतिः त्वमिष्टगोपालपुराधिवासः ।
अवाप्तलक्ष्मीसमनुग्रहोऽपि चौर्यं विधत्से प्रतिवेश्म दुःस्थः ॥

चतुर्दशानां जगतामधीशः सकौतुकापालितधेनुकोऽसि ।
संभाव्यमानो मुनिदेवताभिः संक्रीडसि त्वं सह गोपबालैः ॥
महान्महत्स्वल्पतमेषु चाल्पः आराधनीयोऽसि कथं जगत्याम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ॥ ३३

अवध्य इत्येव सुयोधनः किं मुमोच न त्वां विनिबध्य दूतम् ।
गोपोऽर्हणां त्वं कथमर्हसीति चैद्यः सभायां न निनिन्द किं त्वाम् ॥
अलंकृतात्मा भवदीयचिह्नैः पौंड्रो भवन्तं किमुवाच न स्वम् ।
जेष्याम्यजय्यं परतो युधीति नानुद्रुतस्त्वां यवनः किमाजौ ॥
वीतस्पृहा ये स्वकजीवितेषु बिभ्युः किमेते भवतो नृपालाः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ३४

त्वं पङ्क्तिबाह्यः क्षितिपालकानां दासस्य भुक्त्वा सदनेऽसि तृप्तः ।
अचन्दनाक्तः स्वकबन्धुभिस्त्वं कुब्जाविलिप्तो नितरां प्रहृष्टः ॥
मालामदत्तः क्षितिपाग्रगण्यैः तामग्रहीर्मालिकहस्ततः त्वम् ।
धराधिनाथैरवितीर्णवासाः वस्त्रप्रदे त्वं रजकेऽतितुष्टः ॥
किमर्हणार्हो नृपबान्धवस्त्वं त्वदीयवृत्तं विदितं पुरैव ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ३५

भ्रात्रेऽर्पयित्वा मुसलं हलं च त्वं शंखचक्राद्यकरोः स्वकीयम् ।
तालध्वजं त्वं वितरन् युयुत्सोः तार्क्ष्यांकेतुं समुपात्तवांश्च ॥
हीनार्घनीलाम्बरमग्रजाय दत्वा वसानोऽसि हिरण्यवासः ।
त्वमग्रजातं मधु पाययित्वा स्वयं दधिक्षीररसेन हृष्टः ॥
न्याय्यो भवान् सोदरयोः प्रवृत्तेः विनिर्णये पारयसि त्वमेव ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ३६

अशेषभूपालसमर्पितानि द्रव्याणि गृह्णाति स वेङ्कटेशः ।
षट्षष्टिभोगान्विहितानपूर्वान् नीलाद्रिदेवोऽनुभवन् प्रसन्नः ॥
सपानकस्यार्घविभागदायी भक्तप्रियो मङ्गलशैलदेवः ।
सिंहाद्रिदेवो घनसारमिश्रश्रीचन्दनेनास्त्यनुलिप्तगात्रः ॥
सगर्भ्यदेवान्तरवत्स्वयं तं प्रभावमादर्श्य विभूतिमेहि ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ३७

मत्स्योऽपि लोके परिदृष्टदर्पः कूर्मस्य सन्दृश्यत एव सत्त्वम् ।
अनुद्रुतः स्यात् कुपितो वराहः नृसिंहरूपोऽपि ससाहसः स्यात् ॥
भवेत्पटुत्वं भुवि वामनस्य स्याद्ब्राह्मणस्याप्यतिगर्वितत्वम् ।
सकाकपक्षोऽपि नृपोऽस्ति शूरः बलिष्ठबाहुर्मुसली धरण्याम् ॥
विमृश्यमाने तु भवान् हि गोपः कल्किर्भवन् किं वितनिष्यसे त्वम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ३८

किं नन्दगोवत्सनिकायपालं ब्रह्मादयस्त्वामनुनीतवन्तः ।
गोपालपल्ल्यां विटचोरचेष्टाः वितन्वतस्तेऽप्सरसः प्रनृत्ताः ॥
रणाङ्गणे पार्थरथाश्वचोदी दिक्पालकैस्त्वं बहुमानितः किम् ।
किं तुष्टुवुर्मागधराजभीत्या देवाः द्रुतं त्वां मधुरां विहाय ॥
किं ते तदानीं भुवनैकनाथं आहोस्विदल्पं वद मेनिरे त्वाम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ३९

किं पूतनास्तन्यविषोपभोगेऽप्यवीतजीवोऽसि ततः फलं किम् ।
त्वं कालियाशीविषदंशनेऽपि सजीव एवासि ततः फलं किम् ॥
सोढ्ढवापि चाणूरभुजाभिघातं जितस्त्वयासाविति यत्ततः किम् ।
साल्वप्रयुक्तामितशक्तिशक्तेः निवर्तनात्किं भवतोपलब्धम् ॥
त्वं याचसेऽन्यान् कृशदासतुल्यः वस्त्राशने रीतिरियं हि कीदृक् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ४०

गोपीकृतोलूखलबन्धनस्त्वं न मानवानित्युदिते किमीर्ष्या ।
किं जारचोराचरणप्रसंगात् अकीर्तिरस्तीत्युदिते भयं ते ॥
निर्विष्टकान्ताचरणाहतेः किं लज्जा कथं वेत्युदिते लघुत्वम् ।
अनिन्द्यमेवेत्यदतो घटान्नं नैच्यप्रकाशान्नहि कापि हानिः ॥
कामं स्वदासैः प्रविगर्हितस्य किं मानलेशो भवतोऽस्ति देव ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ४१

सूतोज्झितं त्वां रहसि स्वमात्रा पुत्रीचकारानुपदं यशोदा ।
त्वमेकमातुः किल गर्भनाशे प्रविश्य मात्रन्तरमाविरासीः ॥
पितुर्विलङ्घ्य स्वविवाहयत्नं भवन्तमेवाभिससार पत्नी ।
त्वदग्रजाते क्षितिपाय दित्सौ लग्नाऽतिथौ योगिनि तेऽनुजाता ॥

एवंविधं ते कुलसम्प्रदायं गाढं निगूढं विवृणोमि पश्य ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ४२

त्वां पाण्डुपुत्रेषु सपक्षपातं आहुः कुतस्ते ह्यनुभूतबाधाः ।
आनर्च हस्ती जननान्तरे त्वाम् इत्यूचुरेतस्य कुतो नु पीडा ॥
आबाल्यमित्रं तव चेत्कुचेलः कुतोऽशनाया व्यथितस्स आसीत् ।
प्रह्लादमाहुस्तव गर्भभक्तं कुतस्तथऽपीड्यत स स्वपित्रा ॥
आर्तावनेऽकारि कथं विलम्बः एवंविधस्ते करुणास्वभावः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ४३

क्रतूपभोक्तास्म्यहमित्यनैषीः उच्छिष्टतां विप्रसवौदनं त्वम् ।
उक्त्वा स्वमेवासुरनाशिनं त्वं मातुः सपत्न्याः तनयान् जघन्थ ॥
उदीर्य भूभारहरं स्वमेव चकर्थ चान्योन्यहतान् स्वबन्धून् ।
स्वं ब्रह्मचर्यव्रतनिष्ठितं त्वम् आवेदयन्नन्यसतीर्गतोऽसि ॥
अनन्यरोधेन निरङ्कुशस्त्वं यथेष्टचारी भुवि वीतभीतिः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ४४

स्वमादियोगीश्वरचित्ततः किम् आलानतो मोचयितुं न शक्तः ।
वेदान्तदुर्वेशगुहान्तरात्किम् निर्गन्तुमप्यस्ति भवान्न दक्षः ॥
मुहूर्तयामाब्दमितं च कालम् अतीत्य शक्नोषि न वर्तितुं किम् ।
असज्जनक्रूरमनःकुमार्गे दधासि पादं न कदापि किं त्वम् ॥
किंहेतुकोऽयं भवतो विलम्बः समस्तजन्तूद्धरणोचितस्य ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ४५

कठोरतुङ्गस्तनघट्टनैस्त्वं वेणीप्रहारैः मसृणोरुमर्दैः ।
नखक्षतैः दन्तकृतैश्च दंशैः नारीसहस्रैरुपरत्युपायैः ॥
उच्चावचैर्बन्धविधानभेदैः आतृप्ति भुक्तः प्रविलुप्तनिद्रः ।
श्रमातिरेकं व्यपनेतुमिच्छन् किमत्र निद्रावशतां गतोऽसि ॥
अहो प्रभो साधु ! कुतो विलम्बः ? प्राप्तप्रबोधः परिबोधयास्मान् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ४६

किं नाभिपद्मान्तरमेत्य पश्यन् गम्भीरतां वेत्ति न तेऽब्जयोनिः ।
किं तेऽङ्गनानेकसहस्रगेहेष्वालोकनाद्वेद मुनिर्न मायाम् ॥

पार्थः समालोकितविश्वरूपः किं वा विजानाति न ते स्वरूपम् ।
आराधयंस्त्वामनिशं हृदि स्वे नावैति तत्त्वं किमु ते हरोऽपि ॥
अवेद्यमर्मत्वकृतः कुतस्ते गर्वो विदुस्त्वां सुधियो महान्तः ।
चित्रप्रभाव! प्रथितान्ध्रदेव! श्रीकाकुलेश! क्षपिताघलेश! ॥ ४७

शक्यो न वक्तुं पुरुषाकृतिस्त्वं स्त्रीमूर्तिरेवेत्यपि नाभिधेयः ।
वाच्यं न ते वापि नपुंसकत्वं स्वरूपवत्तामपि ते न विद्मः ॥
गुणाढ्यतां नापि विलोकयामः न ज्ञातमर्यादमवैति कोऽपि ।
कुलीनता नाप्यभिधानयोग्या कुत्रत्यता चापि समानकक्ष्या ॥
ईदृक्तया वक्तुमशक्तिमत्त्वात् न शक्नुमो वर्णयितुं भवन्तम् ।
चित्रप्रभाव! प्रथितान्ध्रदेव! श्रीकाकुलेश! क्षपिताघलेश! ॥ ४८

चक्रे स्त्रियं नारदमात्मजं यः मायाविनं तं किमु विश्वसन्ति ।
चतुर्मुखं यः सुषुवेऽब्जनाभौ किं चिन्तयेयुर्नरपुङ्गवं तम् ॥
स्मरान्तकं यः स्मरसाच्चकार तं पूजयेयुः कुटिलं कथं वा ।
आब्रह्मणश्चामशकाच्च तिष्ठेत् सर्वत्र यस्तं कथमामनेयुः ॥
स्तुवन्तु बुद्ध्वा बहुधा जनास्त्वाम् अपेक्ष्यसे कैः परमार्थतस्त्वम् ।
चित्रप्रभाव! प्रथितान्ध्रदेव! श्रीकाकुलेश! क्षपिताघलेश! ॥ ४९

अप्राप्तगत्यन्तरवद् भवन्तं अर्चन्ति पद्मासनशूलिशक्राः ।
अनन्यलक्ष्या इव योगसिद्धेः त्वय्याहितान्तःकरणा मुनीन्द्राः ॥
उत्तारमार्गान्तरशून्यवत्ते भक्त्या कथास्सत्पुरुषाः पठन्ति ।
विरोधिनां नः शरणं क्व वास्त इतीव दैत्या भवतो विनष्टाः ॥
त्वं शुद्धबुद्धप्रकृतिर्यथार्थे तवाधिकारस्य वदास्य रीतिम् ।
चित्रप्रभाव! प्रथितान्ध्रदेव! श्रीकाकुलेश! क्षपिताघलेश! ॥ ५०

नर्त्यन्त एवाखिलजन्तवोऽत्र त्वयानिशं पुत्तलिदर्शिनेव ।
प्रदर्शयस्येव यथेन्द्रजाली मिथ्याप्रपञ्चं परमार्थसत्यम् ॥
नेपथ्यधारीव विभिन्नदेववेषानुपादातमिहेहसे त्वम ।
त्वयाश्रितो वैभवरङ्गवल्लीं विमोहितो देवतयेव लोकः ॥
एवंविधास्ताः भवदीयविद्याः तवान्यविद्या विदिता न वेद्मि ।
चित्रप्रभाव! प्रथितान्ध्रदेव! श्रीकाकुलेश! क्षपिताघलेश! ॥ ५१

संभाषसे वैणिकगायकेन प्रीत्यर्षिणायं किमु पुण्यमूर्तिः ।
समानवृत्ती रजताद्रिसंस्थे त्वं वीतरागे कतमस्स बन्धुः ॥
श्वेताहिशय्यामधितिष्ठसि त्वम् अन्याद्दशोऽसौ किमु भोगिभोगः ।
वियुज्यसे न प्रतिवेश्मगामिस्त्रिया समं सा किमु भाग्यलक्ष्मीः ॥
स्नेहस्तवाहो सममेव सद्भिः तवैवयुक्तः प्रणयस्सहैतैः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ५२

समस्तपोषीति तवाभिधैव कर्ता च भोक्ता च भवांस्तु नूनम् ।
त्वमक्षरो हीति गतः प्रसिद्धिं निर्णेतुमेतत्तु किमस्ति साक्षी ॥
गुणाब्धिरित्याह जनो भवन्तं को निर्गुणः स्याद्भवतोऽतिरिक्तः ।
विश्वात्मकोऽसाविति कथ्यसे त्वं प्रविश्य कस्त्वां निपुणं ददर्श ॥
एवंविधा नः श्रुतयः परं तु के त्वां त्वदीयं च विदन्ति विश्वम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ५३

गुणेन केनापि ससर्जिथ त्वं समस्तलोकानयथार्थभूतान् ।
गुणेन चान्येन बिभर्षि सर्वां स्वसृष्टपूर्वां विविधां च सृष्टिम् ॥
गुणान्तरेणात्मकृतं च सर्वं प्रमार्क्षि निःशेषतया विरक्तः ।
यथार्थतो निर्गुणरूप एव न मासि कुत्रापि न सावकाशः ॥
न वास्तवेनास्ति गुणस्तवैकः न पूज्यता ते न च वाच्यतापि ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ५४

जीव्याशिनं जीविनमेव तन्वन् तस्मै न दत्से किमपि स्वयं त्वम् ।
यथाकृतं भोजयसि त्वमेतान् ततोऽधिकं को भवता प्रदत्तः ॥
त्वं कर्मसूत्रेण निबध्य लोकं संचालयस्यत्र तु कः स्वतन्त्रः ।
भिन्नस्वभावान् पृथगेव कुर्वन् तदैकमत्यं क्षपयस्यहो त्वम् ॥
विजायते ते जनरक्षकत्वम् अनन्यगत्यासि निषेवणीयः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ५५

नारायणस्त्वं सलिलास्पदत्वात् नारायणाख्यामहिमा तु को वा ।
सार्वत्रिकः पीनतयासि विष्णुः को विष्णुनाम्नः प्रथितः प्रभावः ॥
सुकेशवत्त्वात् तव केशवाख्या का केशवाख्याविदिता प्रतिष्ठा ।
श्रियःपतिः श्रीपतिनामकस्त्वं किं तद्यशः श्रीपतिनामबोध्यम् ॥

आख्या अनेकाः तव कृत्रिमास्स्युः त्वं ज्ञेयमूलः सहजेन नाम्ना ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ५६

दावानलाभीलशिखाततिं त्वम् अदाहभीतो मधुवन्पपाथ ।
गोवर्धनाद्रिः सुमगुच्छतुल्यं त्वयोद्धृतश्चाविगण्य्य भारम् ॥
विषादभीतोऽजगरस्य जिह्वां व्यदारयो वस्त्रमिवातिजीर्णम् ।
सुदुष्प्रधर्षो नरको निकृत्तः विष्णूत्सवाखेट इव त्वयाजौ ॥
त्वं भक्तरक्षाविवशः चकर्थ किं साध्यमेतत्समयान्तरेषु ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ५७

विहाय वत्सापहरत्वगर्वं अङ्गीकृतागाः प्रणतो विधाता ।
बाणस्य युद्धे गिरिशः सहायः समर्प्य भक्तं भवते नुनाव ॥
पाषाणवर्षी च सहस्रनेत्रः सापत्रपः त्वां क्षमणं ययाचे ।
भीतो यमः साञ्जलिबन्धमेव समर्पयामास गुरोस्तनूजम् ॥
सुरासुरास्त्वामकुलीनगोपं न पारयेयुः सुखतो विजेतुम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ५८

आद्यान्तनीचोच्चचिरन्तनोक्तिपैतामहग्रन्थहरं सुरारिम् ।
सुदुष्प्रवेशे सलिले निलीनम् सहस्रदंष्ट्रस्समभूर्ग्रहीतुम् ॥
सप्तार्णवान्तः क्षणमात्रतस्त्वम् उत्प्लुत्य सर्वत्र विचित्य लब्ध्वा ।
पार्श्वे सुरारिं प्रसभं विदार्य तत्कुक्षितस्तानखिलांश्च वेदान् ॥
प्रत्यार्पयो नैकमुखामराय तवावतारस्त्वियतः प्रसिद्ध्यै ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ५९

अब्धिं घटं मन्दरमेव मन्थम् गुणं भुजङ्गं लघु कल्पयित्वा ।
सुरासुरैर्निर्मथिते सुधायै शैलं निमग्नं कमठाकृतिस्सन् ॥
उदूढवान्किन्तु सुरासुरेषु वैमत्यमापाद्य च पङ्क्तिभेदात् ।
प्रकल्पिताशानसुरान्विहाय सुधामदास्त्वं दिविजेभ्य एव ॥
सपक्षपातं किमु विश्वसन्ति दैत्याः स्वभागापहृतं भवन्तम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ६०

हेमाक्षदैत्ये बलदर्पयोगात् कुत्रोपलभ्यः सितपक्षिगामी ।
एवं विचिन्वत्यखिलासु दिक्षु सर्वास्त्वदीया वसतीः समायः ॥

वराहरूपं कमनीयमेत्य पृथ्व्या अधस्तात् विनिलीन आसीः ।
तत्रापि सम्प्राप्तममुं गृहीत्वा पार्श्वे शरीरस्य च कान्दिशीकः ॥
उद्धृत्य पश्चात्सलिलोपरिष्टात् यत्साधितं तत्किमु शौर्यकार्यम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ६१

यथोपदिष्टं गुरुणाऽपठन्तं निन्दाप्रहारैरनवाप्तभीतिम् ।
व्यासक्तचित्तं तनयं परत्र नार्हः किमु स्याज्जनको निषेद्धुम् ॥
कुतो नु कोपस्तव यन्नृसिंहरूप्यायसस्तम्भविनिर्गतः सन् ।
आभीलदंष्ट्रामुखनेत्रवह्निज्वालाव्रजैस्तं प्रशमय्य वीरम् ॥
प्रह्लादमावीरनधीतिनं तं निन्दन्ति सर्वेऽपि विचेष्टितं ते ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ६२

किं त्वं न सूतोऽदितिकश्यपाभ्यां न वर्धितो वामन इत्यमूभ्याम् ।
कौपीनदण्डौ च कमण्डलुं च धृत्वागतोऽसौ कुहनावटुर्हि ॥
न भूसुरोऽयं न हि दानपात्रम् एवं निषिद्धो गुरुणापि दाता ।
प्रीतो बलिस्ते विततार कामान् अवाप्तकामोऽपि भवान्न तुष्टः ॥
अशेषधर्माचरितुः प्रदातुः हृत्वा श्रियं गोत्रभिदे ददाथ ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ६३

जातस्तपस्याजमदग्निनस्त्वं क्रूरप्रवृत्तिः धृतवैरिभावः ।
द्रोहं नृपेभ्योऽप्यविचार्य कोपात् निकृत्तकण्ठानकरोस्त्वमेतान् ॥
त्वं कार्तवीर्यस्य सहस्रबाहून् छित्वातितीव्रैः परशोर्निपातैः ।
सृजन्प्रवाहान् रुधिरस्य भूम्यां तैर्वारिभिः तर्पिततात आसीः ॥
ततो भुवं भूसुरसाच्चकर्थ विप्रोचिता ते किमियं प्रतिष्ठा ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ६४

धरासुतायामनुयातवत्यां त्वं धैर्यलक्ष्म्यामटवीं गतोऽसि ।
पृथ्वीसुतापातितभूषणेन सुग्रीवसख्यं समवाप्तवांस्त्वम् ॥
लङ्कां हठात्प्राग्गतया स्वपत्न्या नीतोऽसुरांस्त्वं क्षपयाञ्चकर्थ ।
अङ्केस्थितायां धरणीसुतायां बभूविथ त्वं जगदेकनाथः ॥
त्वं मैथिलीगाढपरिग्रहेण सपौरुषोऽभूः पुरुषोऽसि कीदृक् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ६५

त्वयैव धर्मस्य कृते विघाते जुघोष तारस्वरतस्त्रिलोकी ।
पाणौ गृहीते जनकात्मजायाः भूपालसङ्घा जहसुः समेताः ॥
आश्चर्यमापुस्त्वयि बाधमाने दिवि स्थितान् पुण्यजनान् प्रकामम् ।
विभीषणे राज्यपदाभिषिक्ते साक्ष्ये स्थितौ तौ रविशीतभानू ॥
साधून्यहो ते चरितान्यमूनि यशस्त्वमीभिः भवतो भवेत्किम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ६६

मुनीन्द्रयागे सफलीकृते त्वं गृहीतपाणिर्धरणीसुतायाः ।
पट्टाभिषिक्ते तरणेस्तनूजे सेतुप्रबन्धोत्थयशस्त्वमापः ॥
बन्दीकृता देववधूर्विमोच्य कारागृहान्मोचयसि स्म पत्नीम् ।
विभीषणे राज्ञि कृतेऽधिलङ्कं त्वमध्ययोध्यं समभूर्नृपालः ॥
परोपकारैकफलन्यमूनि त्वदेकसाध्यं वद किंचनापि ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ६७

सासूयवाचा जननी सपत्न्याः य एत्यरण्यं किमु सोऽनभिज्ञः ।
गुरौ प्रमीते सति राज्यभारं संन्यस्तवान्यः किमु सोतिमूर्खः ॥
निषिध्यमानोऽप्यनुजेन कः स्यात् भार्यावचोभिः हरिणं जिघृक्षुः ।
देशान्तरस्थो बलवद्विरोधं संपादयेद्यः स किमस्त्यबुद्धिः ॥
दक्षो भवानीदृशकर्मकारी त्राता कथं स्याः जगतां विपद्ब्धेः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ६८

चिरात्प्रसूतो जनकं सुतस्त्वं त्वदर्थशोकादकरोर्गतासुम् ।
स्वं सेवमानं विपिनेऽनुजातं त्यक्त्वा क्षुधार्तं त्वमभूः फलाशी ॥
निर्वर्तितस्वेष्टकृतीन्कपीस्त्वम् अदर्शयो वृक्षततिस्थशाखाः ।
विश्लेषभीत्या विपिनेऽनुयान्त्याः सत्याश्चकर्थान्यगृहाधिवासम् ॥
स्वरूपमात्रात्तवभूपभावः क्व पौरुषं सर्वमिदं हि माया ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ६९

कुलानुयातस्य गुरोरमित्रात् अशिक्षथाः निष्ठुरमन्त्रजातम् ।
त्वं पूर्वदेवाध्युषितां पुरीं च चकर्थ दग्धां दहनेन मायी ॥
स्वपूर्वजातैर्जलधिं निखातं अपूरयः कुत्रचिदश्मभिस्त्वम् ।
अज्ञातमायामनुरज्यमानां निकृत्तनासामकरोः प्रसह्य ॥

किं हीयते त्वां स्तुवतो महान्तं कैवल्यमस्याभिमुखत्वमेति ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ७०

त्वं कौशिकेनोज्ज्वलितप्रतापः पार्श्वस्थितेनाहततादकोऽभूः ।
कलत्रनिर्बन्धवचश्चिकीर्षुः मारीचमातेनिथ विद्धगात्रम् ॥
पराङ्मुखं त्वामपि युध्यमानं छिन्नोत्तमाङ्गं कृतवान् खरं त्वम् ।
संप्रार्थितो मौनिसुरैः चिराय निकृत्तवांस्त्वं दशकण्ठकण्ठान् ॥
किमस्तिरोषः परमार्थतस्ते किमत्र वाच्यं मृदुमानसस्त्वम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ७१

त्वद्दण्डिता हीनतमापि दासी त्वां रुद्धकोपाऽव्यथयत्कथं न ।
निकृत्तनासा प्रसभं त्वया सा न त्वां कथं शूर्पणखा बबाधे ॥
बाल्ये क्षताङ्गाद्भवता समित्यां मारीचतस्ते कतिथा न मायाः ।
निर्दोषवालिक्षपणं भवन्तम् आर्तास्य भार्या न कथं निनिन्द ॥
स्वामी भवस्त्वं न हि वेत्सि किंचित् अल्पेऽपि हेतौ बहुलाः कथा हि ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ७२

कथाश्रुतेस्ते विनिवारणाय कुतोन्वरक्षः श्रुतिबद्धघण्टम् ।
वैरात्त्वया युद्धसमुद्यतस्य भ्राता यवीयान् कुत एव गुप्तः ॥
त्वन्मर्म बोद्धुं बहुवेषधारिशत्रुस्पशांस्त्वं किमिति व्यमुञ्चः ।
त्वद्बाधकं वैरिपथप्रविष्टं त्वदीयतोक्त्था च किमित्यमृष्यः ॥
त्रातारमात्मानमुपस्थितानां त्राणेऽसि लोके किमु बद्धदीक्षः ।
चित्रप्रभाव ! प्रथिनान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ७३

शस्त्रं प्रयुक्तं सकलासु दिक्षु भित्त्वाऽऽगमद्दैत्यबलस्य मर्म ।
प्रयुक्तपर्वं त्वतिशय्य बाणं बाणान्तरं दैत्यततिं विभेद ॥
निपातितः सायक एक एव छिन्नारिशस्त्रोऽशमयन्निशाटान् ।
हत्वा सुरारीन् प्रहितः शरोऽन्यः प्रत्याजगाम स्वयमेव तूणीम् ॥
इत्थं जितारेर्बलिता तवेयं कियत्यहो सा तव मार्गणस्य ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ७४

अरण्यसंचारिजनाशिनी सा किं साम्प्रतं ते तरुणी निहन्तुम् ।
स्वभक्ष्यसत्त्वग्रहणाय बाहू प्रसारयेद्यः किमु वध्य एषः ॥

काकस्य कुत्राप्यशनग्रहीतुः उत्पाटनं किं तव युज्यतेऽक्ष्णः ।
तृणस्पृशं तं भृशविद्धगात्रं मारीचमुत्सादयितुं किमर्हम् ॥
के वा नृपाला व्यदधुर्भुवीत्थं कृत्वेदमन्यन्निपुणोऽसि कर्तुम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ७५

नीतिज्ञता यस्य बलं च तेजो विधेयभृत्यः स हि ते हनूमान् ।
निस्सीमशौर्यः प्लवगेश्वरोऽपि सुग्रीवनामा परमस्सुहृत्ते ॥
विज्ञातमर्मा द्विषतां सभक्तिः विभीषणस्ते परमाप्तभूतः ।
कर्तव्यतामूढधियस्त्वदर्थे प्रायुञ्जताशीर्वचनानि देवाः ॥
अतो हि लङ्का भवता विजिग्ये किमीशिषे दैत्यजये स्वशक्त्या ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ७६

अगन्तृसीतां शिरसा विधार्य गच्छन्विराधः कुत एव जघ्ने ।
शिशुर्यथा न्यस्तकुचो मुखे यः काको हतः किं मिथिलात्मजायाः ॥
सीतामुदे त्वं कृतचित्रवेषं मारीचमातेनिथ किं गतासुम् ।
प्रसूमिवाशोकवने धराजां न्यवेशयद्यो भवता हतः किम् ॥
कोपः कुतोऽसौ यदि सागसस्ते निःश्रेयसेनानुगृहीतवान्किम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ७७

न काङ्क्ष्यते यद्यपि शत्रुराज्यं कुतो न सुग्रीवपुरी विलोक्या ।
न लोभनीयं यदि ते परस्वं स्पृश्या किमेका न शिलाधिलङ्कम् ॥
परस्त्रियां यद्यपि ते न वाञ्छा स्थाप्या न किं शूर्पणखा सनासा ।
प्रतिश्रुतेन्द्रारिवधो भवांश्चेत् विद्रावणीयाः किमु मूलदैत्याः ॥
किं त्वं प्रतिज्ञातपथान्नु रेखामात्रेण धर्मी न परिच्युतोऽसि ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ७८

दयाविहीना अपि दानवेन्द्रा नित्याग्निहोत्रादिरता न किं स्युः ।
किं शौचराहित्यभृतोऽपि दैत्याः नाधीतसंपाठितवेदशास्त्राः ॥
किं सत्यवाचां परिवर्जनेऽपि कैलासधामार्चनरागिणो न ।
मायावितायामपि शस्त्रमन्त्रप्रयोगसंहारचणा न किं ते ॥
एतान्सुरारीञ्जननेन विप्रान् अनाशयो विप्रवधादभीरुः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ७९

वाली किमेकप्रहृतेर्निपात्यः त्वया स वृक्षान्तरितेन विद्धः ।
किं पङ्क्तिकण्ठो निधनं प्रणेयः नाभीस्थपीयूषघटोऽस्य भिन्नः ॥
किं कुम्भकर्णः प्रधने प्रशाम्येत् स सुप्तिमध्ये त्वभियोद्धुमैच्छत् ।
किं वश्यतामिन्द्रजिदप्युपेयात् तवानुजन्मा चिखिदे निरन्नः ॥
आयूंष्यमीषामवगच्छसि त्वं जितास्ततोऽमी कथमन्यथा नु ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ८०

दुर्नक्रपीडाव्यथितद्विपेन्द्रत्राताऽहमस्मीति कुतः प्रतिष्ठा ।
दुष्टेन गोष्ठ्यां वसनापहारे स्त्रीमानरक्षीति कुतो यशस्ते ॥
पाषाणभूतां पतिशापयोगात् सतीमकुर्वीति कुतो नु कीर्तिः ।
कुतोऽग्रजक्रोधपलायितस्य कपेः सहायत्वकृता प्रसिद्धिः ॥
ख्यातिः कुतस्ते भवदुःखभीतिम् अनीशितुर्भक्ततेर्विनेतुम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ८१

प्रविस्र(मत्स्य)गन्धे सलिले प्रवेशः जलोच्चयेपूद्वहनं गिरेश्च ।
मुस्ताशनं क्षुद्विनिवारणाय व्यात्ताननं गर्जनमुच्चकैश्च ॥
भिक्षाटनं सत्यपि भूतिमत्त्वे त्यागः स्वशस्त्रस्य नृपान्तराय ।
पलायनं चाप्यनिवेद्य पौरान् पानात्सुरायाः विवशत्वयोगः ॥
स्थाणुत्वसक्तिः नरवाजिताप्तिः एवं विमुञ्चाम्यविनिन्द्य न त्वाम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ८२

शरे प्रयुक्ते खरमूर्धरन्ध्रे भीत्या पराक्त्वं भवतो वदन्ति ।
कपिः पलायेत युधीति वृक्षप्रष्ठादधर्म्यां हतिमाहुरेके ॥
तार्क्ष्यध्वजं त्वां निजचिह्नबुद्ध्यै नागास्त्रमुक्तोच्छ्वसितिति ब्रुवन्ति ।
वरादवध्यस्य बलेश्च याच्ञां अकिंचनत्वादुदितां गदन्ति ॥
क्लेशैकसाध्या भवति प्रतिष्ठा भवेदकीर्तिर्लघु किं न वेत्सि ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ८३

कबन्धदीर्घोरुकरौ निकृत्तौ त्वयेति भूतार्थ इदं भवेच्चेत् ।
त्वं पङ्क्तिकण्ठात्मजसर्पबन्धात् निर्मुक्त आसीरिति चेद्यथार्थम् ॥
विनाश्यमैरावणबन्दिसङ्घ सजीव आगा इति चेच्च सत्यम् ।
मारीचमायाप्रकरप्रणाशात् जितं त्वया यद्यदि सत्यमेतत् ॥

साक्षो हि सर्वस्य भवेत्प्रकाशः राजोपचारैस्सहितस्य तेऽत्र ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ८४

व्यक्तैव शान्तिः जलधिं यदा त्वं बाणैः प्रहर्तुं यतसे स्म शातैः ।
ज्ञातैव रुट् ते दशकन्धरस्य यदानुजन्मा गमिताधिपत्यः ॥
स्पष्टैव कीर्तिः कपटस्स काकः सोढापराधो भवता यदासीत् ।
दृष्टो विवेकः तव धर्मपत्नी यदाग्निमावेश्यत दोषहीना ॥
गुणैरगण्यैः सहितस्त्वमेवेत्यर्चामि जानन्नगतिर्भवन्तम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ८५

राज्यं विसृष्टं जनकस्य वाक्यात् शौर्यं महत्किं भवता विसृष्टम् ।
त्वं दीक्षया त्यक्तविभूषणोऽभूः संत्यक्तवांस्त्वं किमु बाणधन्व ॥
व्रताद्वसानोऽपि न हेमवासः किं वाऽत्यजस्त्वं दृढवज्रवर्म ।
प्रतिज्ञया न्यस्तसमस्तवस्तुः किं वा भवान्मानधने विरक्तः ॥
त्वं सर्वरक्षोहननैकदीक्षः क्षत्रोऽसि कुत्रास्ति तपस्विवृत्तिः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ८६

समर्पितास्त्रं भवतेऽपरोषं विप्रोत्तमं त्वं किमु भीषयेथाः ।
शिलोच्चयैस्त्वं किमु बद्धसेतुः कपीन्वशीकृत्य पयोधिमध्ये ॥
हत्वाग्रजं तस्य किमाधिपत्यं त्वयाऽऽरवीन्दु प्रददेऽनुजातः ।
अक्रीतमास्थाय च पुष्पकं त्वं विहायसा जग्मिथ किं पुरीं स्वाम् ॥
सोत्साहचर्याचरणार्थमेवं प्रवृत्त आसीः तव रक्षिताहो ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ८७

प्रत्युद्गमाभावमिषेण रुष्टः किं क्रुद्धमित्रस्य जघन्थ सूतम् ।
त्वद्बान्धवे किंचिदनिष्टवाचि सोत्पाटिता हस्तिपुरी किमर्थम् ॥
त्वद्दृष्टिहर्षं प्रविचिन्त्य गर्वं कूलंकषा किं भवता निरोध्या ।
स्वमुद्वहन्तं किमु मित्रभावात् हन्याः प्रलम्बं गुरुकोपवश्यः ॥
रोषो महांस्ते बलराम किं तु विवेकिता ते विदिताद्यमीभिः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ८८

अदृष्टभर्त्रन्यनराकृतीस्ताः पुरत्रयाधीशसतीर्विलोक्य ।
विलुप्तधैर्यो विटवत्तदर्थे वन्ध्यप्रयत्नः धृतवैरिभावः ॥

अनीनशः तद्रमणीहृदीशान् महानटेनामिततेजसाऽपि ।
प्रदाय तस्मै रथवारणाश्वयुद्धाङ्गशस्त्राण्यसुरप्रहृत्यै ॥
त्वं वीर आसीः त्रिपुरान्तकाख्यां त्वयैव लेभे महतीं स शम्भुः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ८९

संकीर्णभूतान्विरचय्य वर्णान् धर्मानशेषांश्च विधाय शून्यान् ।
सर्वां धरित्रीं परिपूर्य पापैः कृत्वा परिभ्रष्टमिदं च विश्वम् ॥
कलेर्विजृम्भात्परमेव किं त्वं लोकोपकाराय हयाधिरूढः ।
हस्तस्थखड्गेन निकृत्त्य दुष्टान् आसीः परित्रातविशिष्टलोकः ॥
कास्ते तवाजस्रचराचरादिलोकावनं ते विदिता हि वृत्तिः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ९०

त्वं विश्वमोही यदि कृष्णमूर्तिः कुतोऽत्र लीला न हि तस्य दृश्याः ।
महाबलस्त्वं यदि कामपालो न दर्शयेः किं स्वबलं स्थलेऽस्मिन् ॥
त्वं चेद्धतारो नरसिंहरूपः किमत्र तेजो न बिभर्षि तस्य ।
त्वं सत्यविक्रान्तिरथासि रामः पराक्रमो नास्य कुतः प्रकाश्यः ॥
देवो भवान्स्यादुत देवदेवः किं न प्रदर्श्यो महिमा तदीयः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ९१

गोपालकं त्वामवदन्नशेषवेदान्तचारीति किमु प्रचक्षे ।
अवर्णयंस्त्वां हलिनं यथावत् अजांडवाहीति च किं वदामि ॥
अकीर्तयंस्त्वां लघुयाचितारं किं वाभिदध्यां निखिलागमज्ञम् ।
वनेचरं त्वामगदन् समस्तलोकालिदुःखापनुदं ब्रुवे किम् ॥
अज्ञापयित्वा तव नीचवृत्तीः जगत्प्रभुत्वं किमु बोधयेयम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव . श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ९२

पेयं जलं न श्वशुरस्य गेहे क्षारस्तदीयः स्वकमात्रतुल्यः ।
मित्रं कपाली धृतकृत्तिवासाः अन्नं क दद्यात् वृणुयाच्च केन ॥
करोति योषा वचनं न किंचित् किं सर्वबाधी तनयः प्रदत्ते ।
मुखे निगूहेद्वचनं न योषा समर्पयेत्तां भवते किमेषः ॥
किं वोपलभ्यं पररोहगत्या स्थाने स्वकीये भव वर्धितश्रीः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ९३

किं दुर्जनोच्छेदसदोद्यतं तं सुदर्शनं धारयसे यथार्थम् ।
किं शत्रुकर्णज्वरदं नु पाणौ दधासि सत्यं वद पाञ्चजन्यम् ॥
मत्तद्विषद्भेदनदृष्टवीर्यां कौमोदकीं किं वहसि प्रसिद्धाम् ।
किं घोरविद्विड्रुधिरोपभुक्तथै तं नन्दकं तत्त्वत एव धत्से ॥
अमोघदिव्यायुधवन्तमेवं कथं वयं विश्वसिमो भवन्तम् ।
चित्रप्रभाव! प्रथितान्ध्रदेव! श्रीकाकुलेश! क्षपिताघलेश! ॥ ९४

रत्नाकरः सद्म सदा तवालं किं जीविकार्थं पर एव सेव्यः ।
रमानिशं नर्तति मन्दिरे ते तुभ्यं किमन्यः प्रददीत कामान् ॥
स्थैर्येण संगुप्तमहाधनस्त्वं किं सारयेरन्यजने स्वपाणिम् ।
संत्रायसे त्वं कृषिकस्य सस्यं कुतोऽर्थनीयं भवता परस्वम् ॥
संरक्षितुं कामयसे जनान्यान् याचस्व तानेव त एव दद्युः ।
चित्रप्रभाव! प्रथितान्ध्रदेव! श्रीकाकुलेश! क्षपिताघलेश! ॥ ९५

दृष्टस्तदानीं न हि तेऽब्धिकन्यापाणिग्रहस्सोऽत्र तु वीक्षणीयः ।
तदा न चालोकि धरात्मजायाः कल्याणहर्षः स तु विद्यतेऽत्र ॥
नापीक्षितो भोजसुताविवाहो वृत्तस्तद सोऽत्र तु दर्शनीयः ।
न रेवतीमङ्गलकर्म दृष्टं मोदामहे दर्शनतोऽत्र तस्य ॥
एवं वदन्तः परिणीतवन्तं प्रेक्ष्य श्रियं त्वां सुजनाः प्रहृष्टाः ॥
चित्रप्रभाव! प्रथितान्ध्रदेव! श्रीकाकुलेश! क्षपिताघलेश! ॥ ९६

अशेषलोकस्थितिहेतुभूतोऽप्यात्माश्रितं यो गुरुमेव मेने ।
गर्भस्थितानेकसहस्रकोटिब्रह्माण्डकोऽप्यल्पगृहे स्थितो यः ॥
चराचरप्राणिजगत्पतित्वेऽप्यादत्त एवार्पितमाश्रितैर्यः ।
यस्स्रष्टृशूल्यादिसुरैकदृश्यो दत्ते सदा दर्शनमात्मनीनम् ॥
निधिं पुरस्थं तमिमं भवन्तं अप्रेक्ष्य गच्छन्ति जना बतात्र ।
चित्रप्रभाव! प्रथितान्ध्रदेव! श्रीकाकुलेश! क्षपिताघलेश! ॥ ९७

कैलासहेमाद्रितुलाधिरूढनागाशनस्कन्धरथोत्सवस्य ।
मन्दारसंतानवनानुभूताखेटोत्सवानन्दनिमज्जनस्य ॥
पयःपयोराशिचलत्तरङ्गनिर्विष्टडोलोत्सवसंमदस्य ।
फणास्थरत्नप्रविभासिभोगिभोगात्तपर्यङ्कमहोत्सवस्य ॥

कियानिव स्यादयमुत्सवस्ते भक्तालिनेत्रोत्सवमात्र एषः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ९८

समृद्धवैकुण्ठगते पुरेऽन्तः पार्श्वे क्वचिन्नव्यसुदर्शनस्य ।
हर्म्यस्य सद्मे स्थितपारिजातमन्दारकल्पादिवनान्तराले ॥
सुधासरस्तीरगतेन्दुकान्तपर्यङ्कशय्याविहिताधिवास ।
रमामनोहारिविलासयुक्तसंभोगसौख्याहृतचेतसस्ते ॥
किमन्यदाप्तव्यमनाप्तमस्ति लीलार्थमेषा हि तव प्रवृत्तिः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ ९९

सद्भक्तसंघाय निजाय देव संधारयस्यद्य ऋणं महत्त्वम् ।
विभिन्नमार्गेष्वपि गच्छतस्त्वमन्वेषि दासाननपायिभूतः ॥
संस्थाप्यसे यत्र निजाश्रितैस्त्वं तत्र स्थिरस्तिष्ठसि सर्वदैव ।
समर्पितां भक्तजनैर्यवागूं गृह्णासि पीयूषरसामिव त्वम् ॥
लोकास्समस्तास्तव वश्यभूताः त्वं तावदात्माश्रितकोटिवश्यः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १००

सहायभूता नृपकोटयोऽपि संरक्षितुं सैन्धवमीशते किम् ।
स्वसूनुशीर्षं भुवि पातयन्तं मृतं शपन् सिन्धुनृपः किमासीत् ॥
कर्णेन शक्त्या प्रहृतिर्नरस्य किं घोषिता सिध्यदनीकसंघैः ।
अनन्यधृष्यः प्रथितस्स भीष्मः किमिन्द्रपुत्रस्य शरान् विषेहे ॥
कियद्बलं स्याद्भुवि पौरुषस्य साह्येन ते स्याद्विजयो हि लोके ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १०१

जन्मोर्मिसंसारमहार्णवस्य जानेऽहमेकान्तसुदुस्तरत्वम् ।
पारप्रणेता भवसागरस्य ह्यतापदां चेति भवान् प्रगीतः ॥
किमित्युदास्से करुणेयती ते स्यान्नाम कार्यान्तरगौरवं ते ।
विज्ञायते ते शरणार्थिरक्षा गजेन्द्ररक्षोत्सुकमानसस्त्वम् ॥
रतप्रमोदाब्धिसहानुभूतिं विहाय लक्ष्मीमपि किं गतो न ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १०२

प्रारब्धमागामि च संचितं च स्युर्नाम नित्यं मम जन्मनीह ।
कृतान्यघान्येव मयाधमेन तानि त्वदीयामृततुल्यदृष्टिः ॥

निर्हेतुजाताऽविगणय्य चास्मिन्प्रसारिणी स्यात् दुरिताम्बुधिश्च ।
सन्तारणीयो भवतः परस्तात् गतिं न वेद्मि श्रितपालनाङ्क ॥
भुजङ्गपर्यङ्क ! रमासहाङ्क ! भूभृच्छशाङ्काहवबीतशङ्क ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रिकाकुलेश ! क्षपिताघलेश ! ॥ १०३

बोद्धुं क्रियाः प्राणिकृतां नियुक्ताः चतुर्दश स्युः किमु धर्मदेवाः ।
तदुक्तलेखी किल चित्रगुप्तः निवेदितस्तच्छमनोऽपराद्धान् ॥
भटैः स्वकीयैः निरयस्य कूपततौ निपातात् बहु बाधते हि ।
शक्तो भवान्दुर्गतिवारणेऽस्मिन् त्राता विपत्सागरमज्जितानाम् ॥
सदुल्लसत्ते शरणं प्रपद्ये पादाब्जयुग्मं वितराभयं मे ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १०४

पुण्यं कवीनां किमु पूर्वजानां येषां भवानात्थ समक्षमेव ।
कार्याणि पद्यानि हि मत्पराणि तत्सिद्धये दत्तवरा भवन्तः ॥
यथावबोधं रचितं कवित्वं त्वदङ्कितं कर्तुमना जनोऽयम् ।
बद्धाञ्जलिः किं भवदीयभक्तः श्रीपादरेणुप्रसराय नार्हः ॥
पात्रं कृपायाः कुरु मां कृपालो सल्लक्षणाञ्चत्करपादपद्म ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १०५

अदोषबोद्धुर्मम यत्कवित्वं विद्वज्जनामोदकरं चकर्थ ।
अपेतशुद्धेरजितेन्द्रियस्य कृताधिवासोऽसि ममाशयेषु ॥
अपुण्यकार्याचरणं कदाचित् अस्तावयो मां गुरुभिर्महद्भिः ।
अशक्तिमत्त्वादकृतप्रयत्नं अपालयो मामशनप्रदानात् ॥
अन्वग्रहीः पातितमग्रहीर्मां कदध्वनो वारय मां प्रसन्नः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १०६

फलानि भुंक्षे स्म यथा शबर्याः यथा च कुब्जाकरतो विलेपम् ।
यथा च पाकं द्रुपदस्य पुत्र्याः स्तन्यं यथा गोपकुलोद्भवायाः ॥
मालां यथा मालिकहस्ततश्च यथा कुचेलात्पृथुकस्य मुष्टिम् ।
संवाहमङ्घ्र्योः गुहतो यथा च चिक्रीडतो दासकृतिं यथा च ॥
तथैव मत्तः शतकं गृहाण प्रजल्पितानीव शिशोः पिता त्वम् ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ॥ १०७

सेवस्व चेतः पुरुषोत्तमाङ्घ्री इति प्रणीतं शतकं मयैकम् ।
हे राम हे भक्तवरप्रदातर् इति प्रणिन्ये शतकं द्वितीयम् ॥
अरीरचं हंसलदीविदेवगोपालसंस्तुत् शतकं तृतीयम् ।
त्वदङ्कितं चात्मकपोलकल्पं प्राणैषमेतच्छतकं चतुर्थम् ॥
त्वद्दत्तकाव्यग्रथनेन वर्धे श्रीकासुलोऽहं पुरुषोत्तमाख्यः ।
चित्रप्रभाव ! प्रथितान्ध्रदेव ! श्रीकाकुलेश ! क्षपिताघलेश ! ॥ १०८

॥ इति श्रीवरदाचार्येणानूदितेषु
आन्ध्रशतकेषु नवममान्ध्रनायकशतकं समाप्तम् ॥

दया*

न. च. वे. नरसिंहः

दयायास्तत्त्वं तद्यदुत न बलात्सा हि सुलभा ;
शनैर्वृष्टिर्वेयं निपतति दिवोऽधो महितले ।
ददानस्यादातुर्वितरति च सा श्रेय उभयो-
रियं सत्त्वाढ्येभ्योऽप्यधिकतमसत्त्वेन जयति ॥

अलङ्कुर्याद्राज्ञां कनकमुकुटादप्यतितरां
शिरः, तेषां दण्डः पिशुनयति भौमं ननु बलम् ।
प्रभुत्वं माहात्म्यं वसत इह ; तस्माच्च महिपा
भृशं बिभ्यत्येषा त्वधिकमहिमा दण्डबलतः ॥

प्रभूणां प्रभ्वीयं हृदयमधिरुढेति, करुणा
गुणो दिव्यस्तस्माल्ललितकरुणादृष्टिकलिता ।
प्रशास्तृणां शिष्टिर्यदि भवति भौमोऽपि महिमा
दधानो दिव्यत्वं बहुलमिह भव्यं प्रकुरुते ॥

---

* 'Merchant of Venice' नामकादाङ्ग्लनाटकात् ; 'The quality of mercy' इत्यादिकस्य 'seasons justice' -पर्यन्तस्य भागस्य अनुवादः ।

मधुसञ्चयः

विविधसूक्तिप्रकरानुवादः

शैलेन्द्रनाथ सिद्धनाथ पाठकः (आवन्तिक)

न्यायाधीश इवात्माऽयं दण्डात् पूर्वं सदा जनान् ।
सम्बोधयति दुर्मार्गात् स्वबन्धुरिव भूरिशः ॥

—रामकृष्णः परमहंसः

किं वदेयमिति प्राज्ञो विचारयति पूर्वतः ।
मूर्खस्तु भाषणस्यान्तेऽवदं किमिति शोचति ॥

—फ्रेञ्च् आभाणकः

स्वपौरुषमद्यतनं श्वस्तनं भाग्यमुच्यते ।

—पाल्शिलर्

मूर्खाः स्वतः प्ररोहन्ति नैवोप्यन्ते विधानतः ।

—रूस आभाणकः

यथा बुद्धिविहीनत्वं तथैवाडम्बरो महान् ।

—पोप्

वद स्तोकं लिख स्तोकं चिन्तय त्वधिकाधिकम् ।

—फ्रेञ्च् आभाणकः

दैनन्दिनानुभूतेर्ये पुत्राः, आभाणका हि ते ।

—डच् आभाणकः

स्वल्पं हि जीवितं पुंसाममूल्यसमयक्षतेः ।
पुनः स्वल्पतमं पुम्भिः क्रियतेऽत्यद्भुतं भुवि ॥

—जॉन्सन्

निकषोपलः

वेद-वेदान्त-विषयकाः ग्रन्थाः

वर्णोच्चारणदीपिका, शौनकशिक्षा।

उभयमपि व्याख्यासहितम् । के. एन्. एस्. दिवाकर द्विजेन्द्रः, हरिविहारः, तृप्पूणित्तुर, कोच्चि, केरलः । रू. १.५०; २ ॥

उभावपि ग्रन्थौ वेदाङ्गभूतशिक्षान्तर्गतौ । प्रथमे ग्रन्थे वेदेषु येषां वर्णानां स्वरूपमुच्चारणं च अस्पष्टं कष्टसाध्यमवधानापेक्षं च, ते सर्वे विशदीक्रियन्ते । वर्णोत्पत्तिः, वर्णविभागः, स्वरः इत्यादिकमपि सप्रमाणमत्र प्रतिपाद्यन्ते । अन्ते वेदलक्षणमपि प्रतिपादितम् ॥

प्रायः उपर्युद्दिष्टमेव विषयजातं प्रतिपादयन्ती ऋग्वेदीया शौनकशिक्षा सुविदितैव । ६७-श्लोकमिता सेयमपि शिक्षा सव्याख्या तैरेव दिवाकर-द्विजेन्द्रैः प्रकाशिता । उभयत्रापि केरलभाषया विवरणं प्रदत्तम् । ऋगादि-वेदाधीतिनामेतद् ग्रन्थद्वयमपि उपकाराय भवेत् । श्लाघ्यपरिश्रमाश्च द्विजेन्द्रा दिवाकराभिधाः ॥ (वे. रा.)

ऋग्वेदीयं शमानलक्षणम्, उपलेखसूत्रं च

दशग्रन्थि वेङ्कटरामशास्त्रिणा संकलितम् । वाणीविलासमुद्रालयः, श्रीरङ्गम् । रू. २. ॥

पदपाठं क्रमपाठं च सिसाधयिषूणां वेदे पदविभागाः शुद्धतया ज्ञेयाः; विशिष्य लुप्तविसर्गस्थलानि स्पष्टं ग्राह्याणि; दीर्घह्रस्वादिकेषु च अवधानं देयम् । तदेतत्सर्वं विशदप्रतिपत्तये संकलय्यैकत्र दत्तमेतयोः शमानोपलेखपुस्तकयोः । शमानलक्षणं नागदेवेन निर्मितम् । उपलेखाख्यं ग्रन्थान्तरमपि प्राचीनं मुद्रितचरं च । एतयोः पुनः प्रकाशनेन अध्ययनपरम्परामुपकृतवन्तो वेङ्कटराम-शास्त्रिणः धन्यवादानर्हन्ति ॥ (वे. रा.)

सर्वानुक्रमणी-नावायोगपाठः ।

कुम्मणि भवदासन् नम्पूतिरिः, एर्नाकुलम्, केरलः । रू. २. ॥

केरलेषु बह्वृचसंप्रदायः सम्यक् संरक्षितो वर्तते । तत्र त्रिशिवपुरी, तिरुनावाय् इत्याख्ययोः द्वयोः संप्रदाययोः मनाक् ऋषि-देवताविषये भेदो

दृश्यते । तमेतं भेदं सर्वं संकलय्य श्रीमन्तो भवदासनामानो द्विजा पुस्तकद्वये प्राकाशयन् । त्रिशिवपुरी-संप्रदायं मलयाललिप्यां प्रथममुद्रयन्, अपरं नावाय्-मठीयं संप्रदायमद्य देवनागरीलिप्यां प्रकटितवन्तः । श्लोकबद्धाया अस्याः अनुक्रमणिकायाः आङ्ग्लभाषया आमुखोक्तिः श्रीमद्भिः डा० राघवायैर्लिखिता ॥

सामवेदसंहिता आङ्ग्लानुवादसहिता

धर्मदेव विद्यामार्तण्डः, आनन्दकुटीरम्, ज्वालापुरम्, उ.प्र. । रू. १५ ॥

श्रीश्रद्धानन्दस्वामिनां शिष्येषु प्रख्याता धर्मदेवविद्यामार्तण्डाः, वेद-विचारेषु च तैः प्रकाशिताः ग्रन्थाः प्रसिद्धाः । अद्य तैः साधितमिदं कार्यं महत्, सर्वैरप्यभिनन्द्यं च । अस्मिन् बृहति संपुटे सर्वा सामसंहिता आङ्ग्लानुवादेन दत्ता । तत्र तत्र टिप्पणी च योजिता । उपक्रमे च आङ्ग्ल-भाषया सामवेदीयं सर्वं विषयमधिकृत्य विपुल उपोद्घातोऽपि समर्पितः । वेदस्य वैदिकस्य सन्देशस्य च प्रचाराय ग्रन्थकर्तृभिः क्रियमाणो निरन्तरोऽ-भियोगः श्लाघामर्हति ॥ (वे. रा.)

अद्वैतामृतसारः

श्रीद्विजेन्द्रलालशर्मा पुरकायस्थः । भारतीभवनम्, गोपालजी का रास्ता, जयपुरम्, राजस्थानम् । १९६८ । रू. २. ॥

अत्र सरलैः षष्टिसंख्याकैरेव पद्यैः विना वादं परमतखण्डनं वा शाङ्कर्या अद्वैतप्रक्रियायाः सारभूता अर्था ग्रन्थकर्त्रा दत्ताः । पद्यानामाङ्ग्ल-हिन्दी-अनुवादश्च दत्तः, स पाठकानां बहूनामुपकाराय भवेत् ॥ (वे. रा.)

तत्त्वसन्दर्भः श्रीजीवगोस्वामिकृतः

डा० सीतानाथगोस्वामिना संपादितः । यादवपुरविश्वविद्यालयः, कलकत्ता-३२ । रू. ६. ॥

चैतन्यमहाप्रभूपज्ञस्य गौडीयकृष्णभक्तिसंप्रदायस्य साहित्ये प्रमुखं स्थानं बिभ्रति रूपजीवगोस्वामिनो बहुमुखा ग्रन्थाः । जीवस्य षट्सन्दर्भाख्यः प्रबन्धः एषु सिद्धान्तप्रतिपादनविषये प्रधानः । अस्मिन् अन्तर्भूताः षट्

सन्दर्भाः षड्भिः विद्वद्भिः सम्यक् संशोध्य पृथक् पृथक् प्रकाशयितव्या इति यादवपुरविश्वविद्यालयेन निर्णीतम् । तत्र प्रथमतया प्रकाशितो भागः डा० सीतानाथगोस्वामिना संपादितः ।

भागवतसन्दर्भापराभिधः षट्सन्दर्भग्रन्थः भागवततात्पर्यनिर्णयरूपो भवति । तत्त्वसन्दर्भाख्ये भागे प्रमाणप्रमेयाख्यविभागद्वयघटिते भगवति तत्स्वरूपे तद्भक्त्यादिषु अर्थेषु वेदेतिहासपुराणानि एव प्रमाणानि, तत्र भागवतपुराणस्य श्रैष्ठ्यम्, तत्र वर्णितं भगवत्स्वरूपं, तस्य अद्वैतपरतया व्याख्यानानां निराकरणमित्येवमात्मका विषयाः भागवतश्लोकोदाहरणैः निरूप्यन्ते ।

बलदेवविद्याभूषणस्य टीकापि योजिता । तथा संपादकस्य आङ्ग्लटिप्पण्यश्च । मुद्रणादिकं समीचीनं दृश्यते । यादवपुरविश्वविद्यालयसंस्कृतग्रन्थमाला प्रतायताम् ॥ (वे.रा.)

इतिहासः

रामायणसमीक्षा

श्रीवेङ्कटेश्वरविश्वविद्यालयीयसंस्कृतविभागः, तिरुप्पति । १९६७ । रू. ७.॥

१९६७-तमे वर्षे प्रवर्तितायां रामायणसमीक्षागोष्ठ्यां विद्वद्भिः ये लेखा उपन्यस्ताः तेषां संग्रहभूतमिदं प्रकाशनम् । पूर्वं वेदसमीक्षेति यत्प्रकाशितमेतैरेव, तस्य प्रकाशनस्य रीतिरत्रापि अनुसृता । अत्र श्रीमद्रामायणे तं तं विषयमधिकृत्य अष्ट निबन्धाः सन्ति । रामायणकथामालंब्य प्रवृत्तं हिन्दी-तेलुगु-कन्नड-मलयालाख्यप्रान्तीयभाषाचतुष्टये प्रवृत्तं रामायणसाहित्यं प्रथमं निबन्धचतुष्टये वर्णितम् । जैनसंप्रदायेऽन्यथानीतान् रामकथांशान् वर्णयति निबन्धान्तरे श्रीभयानिमहाशयाः । रामायणस्य धर्मोपदेशकतया प्रवृत्तत्वमन्यस्मिन् निबन्धे संग्रहेण प्रतिपाद्यते । एकत्र इतिहासस्यास्य श्रीवैष्णवसिद्धान्तानुगुण्यमुपवर्णितम् । एते सर्वेऽपि निबन्धा आङ्ग्लभाषया प्रवृत्ताः । अन्ते प्रसिद्धैः कविभिः गान्धर्वतत्त्वज्ञैः अनन्तकृष्णशर्मभिः यद् 'वाल्मीकेः गेयपरिस्पन्दः' इति सन्दर्भः प्रकाशितः स एक एव संस्कृतभाषया उपन्यस्तः ॥ (वे. रा.)

काव्यानि

मेघदूतविलासः, अमरुशतकलीला

उभयमपि 'बाक-कंबे'-इत्याख्यैः विरचितम् । भारतवाणी-प्रकाशनमाला १६,१७, पुण्यपत्तनम् । १९६६, १९६७ । रू. ५; ७ ॥

श्लाघनीयोऽयमुद्यमः श्रीमतां 'बाक-कंबे' नामकानां कोरियादेशाभिजनानां संस्कृतविदुषाम् । अस्मिन् पुस्तकद्वये तैः स्वीयं प्रसिद्धप्राचीनसंस्कृतकाव्ययोः संस्कृतव्याख्यानं संप्रदायरीत्यनुगं प्रकाशितम् । वाक्यार्थविवरणातिरेकेण क्वचित्क्वचित्प्रयोगस्वारस्यं, अलङ्काराः, रसचमत्कृतिः इत्यादिकमपि विवृतम् । शैली च तत्र तत्र दीर्घसमास-सन्नन्त-यङ्लुगादिप्रयोगैः प्रौढिं स्पृशति । मुद्रणं सुष्ठु संपन्नम् ॥ (वे. रा.)

हरिशतकम्

गोपालदासगुप्तः । आनन्दप्रकाशनम्, दिल्ली-७ । रू. ५ ॥

महाकवेः भर्तृहरेः नीतिशतकमत्र हिन्दीपद्यानुवादेन प्रदत्तम् । 'सुरभारती-साहित्यमालायां' प्रकाशितमिदं संस्कृतप्रचारं नूनमुपकरिष्यति । किन्तु एतादृशानि पुस्तकानि स्वल्पमूल्यकानि बहुजनसुलभान्यपि भवितुमर्हन्ति ॥ (वे. रा.)

कालिदाससुभाषितानि

कृ. त. पाण्डुरङ्गि, बङ्गलूर् ।

महाकवेः कालिदासस्य रूपकेभ्य उद्धृतानि शतं सुभाषितानि, विषय-विभागेनात्र समर्पितानि । छात्राणां कण्ठपाठयोग्यानि ॥ (वे. रा.)

नीतिशास्त्रम्

पि. कृष्णमूर्तिः, सेकन्दराबाद् ।

शतश्लोकात्मको नीतिशास्त्रं नाम श्लोकसंग्रहः सुविदितः । त एते श्लोका अत्र आङ्ग्लानुवादेन दत्ताः । मूलं तेलुगुलिप्यां मुद्रितम् । आन्ध्रप्रदेशे संस्कृतप्रचारकार्यमेतादृशी संस्कृतसेवा साधयिष्यति ॥ (वे. रा.)

अलकामिलनम्

द्विजेन्द्रलालशर्मा पुरकायस्थः । भारतीभवनम्, गोपालजी का रास्ता, जयपुरम् । न. पै. ७५ ॥

कविकुलगुरोः मेघसन्देशकाव्यस्य अनुस्यूततया रचितमिदं खण्डकाव्यम् । तदेव वृत्तं, तथैव खण्डद्वयात्मकम् । सन्देशानन्तरं यक्षकान्तायाः विरहावस्था, तदनन्तरं यक्षेन योगः, तत्प्रेमालापादिसंभोगशृङ्गारश्च वर्ण्यन्तेऽत्र कविना । मनाक् वृत्तभङ्गो दृश्यते, स शोधनीयः ॥ (वे. रा.)

ललिताञ्जलिः

अयिरूर् सी. माधवन् पिल्लै, किलिकोल्लूर् पोस्ट्, कोल्लम्, केरलः । न. पै. ७५ ॥

ललिताविषयकं ललितैरनुष्टुप्श्लोकैर्निबद्धमिदं स्तोत्रम् । प्रथमद्वितीयाद्यक्षरप्रासरम्येन श्लोकशतकेन गुंफितम् । भक्तितन्त्रवेदान्तभावपूर्णं हृदयग्राहि च शोभते ॥ (वे. रा.)

मुक्तकमञ्जूषा

दि. द. बहुलीकर् । शारदागौरवग्रन्थमाला १५, "शारदा", ४२५, सदाशिवपेट्, पुण्यपत्तनम् २ ।

प्रतिभावाचकानां परिचिता एव एते ग्रन्थकर्तारः । एतैर्विरचितानां सुभाषितमुक्तकश्लोकानां १६७-संख्याकानां संग्रहोऽस्मिन् संपुटे दत्तः । विविधानि वृत्तानि उपयुक्तानि । शैली च क्वचित्सरला, क्वचित्प्रौढा च चकास्ति । श्लोकेषु च बहु विषयजातं विमृष्टम् ॥ (वे. रा.)

ललितगीतालहरी

पं. ओगेटि परीक्षित् शर्मा । शारदाकार्यालयः, पुण्यपत्तनम् २ ॥

अत्र ३२-विषयानधिकृत्य प्रबन्धा गीतमयानि रागतालयुक्तानि खण्डकाव्यानि प्रकाशितानि वर्तन्ते । तान्येतानि आकाशवाण्यामितरत्र च गीतानि प्राप्तप्रचाराण्येव । ऋतवः, सागरः, शिशवः, भ्रमराः, कर्षकः, हम्पी, काश्मीरदेशः, हिमालयः इत्यादिका विषया एकत्र ; अपरत्र कालिदास-

शकुन्तलेत्यदिकाः; द्वित्रेषु गीतेषु 'त्वमेवाहम्' इत्यादयो आध्यात्मिका विषयाः, एवं विविधानि वस्तून्यादाय प्रवृत्तान्येतानि गीतानि। प्रायो जयदेवादिदर्शित-मार्गेण प्रवृतात्र गीतप्रबन्धरीतिः ॥ (वे. रा.)

मानससन्देशकाव्यम्

कौशिकवीरराघवाचार्यकृतम् । श्री विज्जमूरु रङ्गाचार्यैः प्रकाशितम् । तिरुप्पति ॥

काव्यकर्तुः कालः क्रिस्तु १८५१-१९२० । पश्चिमगोदावरीप्रान्तीयोऽभूत् । तेलुगु-तमिळ-संस्कृत-भाषासु प्रवीण एष बहून् काव्य-नाटक-गद्य-पद्य-ग्रन्थान् भक्तिपराणि च ग्रन्थान्तराणि व्यरचयत् । किन्तु षडेव तस्य कृतयोऽद्य ज्ञाताः यासु अन्यतमोऽयं मनस्सन्देशाख्यं खण्डकाव्यम । अत्र भगवन्तं प्रति योगिना जडभरतेन मनः दूततया प्रेष्यते । भक्तिमार्गस्य तत्साधनानां च प्रतिपादनमत्र काव्यशैल्या कालिदासानुकारिण्या कृतम ॥ (वे. रा.)

भूमिदानयज्ञोपनिषद्, जवहरगङ्गालहरी च

काशीनाथ रघुनाथ वैशम्पायनः । १७८६ सदाशिवपेठ्, पुण्यपत्तनम्-२ । रू. ३ ॥

'विनोबा' महाशयेन भूमिदानं नाम यज्ञरूपमात्मशोधकं दीनोपकारकं सेवाकर्म यत् प्रवर्तितं, तत्स्तोत्रपरा १७ श्लोका अत्र हिन्दी-अनुवादेन समर्पिताः । आरम्भे श्लोकद्वयमीशावास्यमन्त्रद्वययोः शब्दैरर्थैश्च घटितम । (२) जवहरगङ्गालहरी प्रतिभायां (५. १) प्रकाशितचरो निबन्धः ॥ (वे. रा.)

श्रीगुरुगोविन्दसिंहभगवत्पादाः

हरबंससिंहः - डा. श्रुतिकान्तशर्मा । श्रीगुरुगोविन्दसिंह-फौण्डेषन, चण्डीगढ् । रू. ८ ॥

सिक्-गुरोः श्रीगोविन्दसिंहस्य ३००-वर्ष - जयन्त्युत्सवं, तदर्थान् आरम्भांश्चाधिकृत्य गतायां सञ्चिकायां (पृ. १०६) किञ्चिल्लिखितम् । तमेव उत्सवमधिकृत्य प्रकाशितमिदं ग्रन्थान्तरम् । आङ्ग्लभाषायां गुरोरस्य जीवित-वृत्तान्तप्रतिपादको ग्रन्थः श्रीहरबंसमहाशयेन लिखितः, प्रसिद्धश्च । तस्यात्र

संस्कृतभाषया श्रीश्रुतिकान्तशर्मणा अनुवादः समर्पितः । अनुवादकस्य संस्कृतशैली सरला हृदयङ्गमा च । पञ्चनदप्रदेशे ये माणवकाः संस्कृतं विद्याशालासु पठन्ति तेषां पाठ्यगद्यपुस्तकत्वेन नियोज्योऽयमनुवादग्रन्थः । पत्रमुद्रणादिकमतिसमीचीनं भाति ॥ (वे. रा.)

विरहलहरी

श्री. भि. वेलणकरः । इन्दिरानिवासः, मुंबई-४ । रू. २ ॥

तदा तदा अभिनवेषु मार्गेषु स्वीयकवितोत्साहं प्रदर्शयता श्रीमता वेलणकरमहाशयेनात्र आकाशवाण्यां गानार्थं २५ संस्कृतमया गीतप्रबन्धाः रचिताः, तेऽत्र राग-स्वरप्रदर्शनेन प्रकाशिताः । हिन्दी-अनुवादः, आङ्ग्लटिप्पणी च योजितौ । सरलसरसा रीतिः । उपात्ता विषयाश्च न केवलं प्रसिद्ध-विप्रलम्भशृङ्गारादिकाः, परन्तु शास्त्रार्थाः, विज्ञानाशयाः इत्यादिका नूतनाः चमत्कारकाश्च । सर्वथा श्लाघनीयसमुत्साहोऽयं कविः ॥ (वे. रा.)

गणपतिसम्भवम् (हिन्दी-अनुवादसहितम्)

म० म० प० प्रभुदत्तशास्त्री । अर्चनाप्रकाशनम्, ७६ रामदासपेठ, नागपुरम् । रू. १०-००. ॥

पुराणप्रसिद्धकथानकमुपजीव्य म० म० प० प्रभुदत्तशास्त्रिभिः विरचितमिदं 'गणपतिसम्भवम्' नाम महाकाव्यं ललितपदकलितं रसनिर्भरं सुबोधं च । शिवपार्वतीविवाहमुपक्रम्य गणशासनोत्कर्षोपसंहारं कथानकं चारु उपवर्णितम । योगशक्तिचमत्कृति-शास्त्रार्थशब्दीभाव-देवमोदकोपहारादीनामुपवर्णनं लेखकपाण्डित्यपरिचायकं भवति । अत्र कविभिः नूतनाः कल्पनाः उद्भाविताः । द्वितीये सर्गे गिरिशगिरिजा-पाणिग्रहणावसरे लाजहोमवर्णनश्लेषः हिन्दीभाषाभाषिणां प्रमोदावहः । भारतीयवीर-काश्मीर-नेपालवर्णनं अन्यास्पृष्टम् । (पृ० ८, १०, १८) । अन्तिमः सर्गः कवेः व्याकरणशास्त्रपरिज्ञानडिण्डिमो (सर्गः १०. श्लो० ८८, ८९, ९०) भवति । (कु. वे. शे.)

शिवा-सम्बन्धः (खण्डकाव्यम्)

प० रामावधमिश्रः, प्रधानाचार्यः, श्रीविद्याधर्मसञ्जीवनसंस्कृतमहाविद्यालयः, देवरिया, उत्तरप्रदेशः । रू. १-०० ॥

पौराणिकं शिवपार्वतीकथानकमाश्रित्य श्री प० रामावधमिश्रविरचितं 'शिवा-सम्बन्ध' नामकं खण्डकाव्यं पूर्वोत्तरार्धद्वयविभक्तं छन्दोबद्धं सरसं सुबोधम् आधुनिकखण्डकाव्येषु प्रशंसामर्हति । सफलप्रयत्नोऽयं कविः स्वीयां विचारनैपुणीं काव्यकरणवैचक्षण्यं चाभिव्यञ्जयति । पार्वतीसौन्दर्यवर्णनं (पृ० ४२) कालिदासमनुस्मारयति ॥ (कु. वे. शे.)

कर्णार्जुनीयं महाकाव्यम्

विन्ध्येश्वरीप्रसादशास्त्री । स्वयम्भातिपुस्तकालयः, ४३/१७ सदानन्द बाजार, वाराणसी । रू. २. २५ ॥

शास्त्राचार्य विन्ध्येश्वरीप्रसादशास्त्रिभिः भारतपद्मपुराणादिप्रसिद्धकथानकमाश्रित्य विरचितमिदं 'कर्णार्जुनीयं' नाम महाकाव्यं द्वाविंशसर्गात्मकमर्थगाम्भीर्यनिर्भरं वीररसोपबृंहितं सुभाषितभूषितं हृदयग्राहि भवति । द्वादशसर्गे कर्णस्य प्रतिश्रुतसंरक्षणप्रतिपादनं मनोहारि । कवेः वर्णनापाटवं प्रतिभाप्रसरश्च किरातार्जुनीयादिमहाकाव्यादीननुस्मारयति । (कु. वे. शे.)

वीरोत्साहवर्धनम् (हिन्दीटिप्पणीसहितं युद्धकाव्यं)

सुरेशचन्द्रत्रिपाठी, प्राध्यापकः, सारस्वतखत्री पाठशाला, इन्टर् कालेज, प्रयागः । रू. १. २५ ॥

श्री सुरेशचन्द्रत्रिपाठिमहोदयैः चीनीयाक्रमणमाधारीकृत्य विरचितं 'वीरोत्साहवर्धनं' नाम लघु युद्धकाव्यं सांप्रतिकं सैनिकानामुत्साहवर्धकं भवति । कवेः नैपुण्यं वर्णनापाटवं च आन्तं परिदृश्यते । हिन्दीभाषाविवरणमपि छात्रोपकारि वर्तते । आधुनिकचरित्रकाव्यरचनायां संस्कृतभाषया कृतः कवेः प्रथमः प्रयासः प्रशंसार्हः ॥ (कु. वे. शे.)

राष्ट्रपथप्रदर्शनम् (हिन्दी-अनुवादसहितम्)

दुर्गादत्तशास्त्री, विद्यालङ्कारः । कृष्णा ब्रदर्स्, प्रकाशकः मुद्रकः, पुस्तकविक्रेता, मेन् बाजार, कांगडा । रू. ७-०० ॥

श्री दुर्गादत्तशास्त्रिभिः रचितमिदं 'राष्ट्रपथप्रदर्शनं' नाम काव्यं अष्टादशाध्यायपरिमितं इदानींतनपरिस्थितौ वर्तमानानां विशिष्य छात्राणां कृते अनुशासनं ददत् संस्कृतसाहित्यपोषकं च । प्राचीनमाचारं नैतिकं चरित्रं

चोपोद्बलयितुमेव लेखकस्य उद्यम इति स्वयमेव व्यनक्ति । भाषाऽपि सुबोधा । आधुनिकपरिस्थित्यनुकूलकाव्यनिर्माणेन काव्यलोकस्य राष्ट्रस्य च कृते लेखकानां प्रयत्नो अभिनन्दनार्हः ॥ (कु. वे. शे.)

जवाहरजीवनम् (हिन्दीटीकोपेतम्)

रामशरणशास्त्री । प्रकाशकः-सेवकसंघः, बरनाला (संगरूर) पंजाब् । उत्तमसंस्करणस्य रू. ७-०० साधारणस्य रू. ५-००.

प० श्री रामशरणशास्त्रिविरचितं 'जवाहरजीवनम्' नाम काव्यं दिवंगत-प० नेहरूमहाभागवर्णनपरम् । राष्ट्रनेतुः प० नेहरूमहाभागस्य जीवनचरित्रमास्पदीकृत्य संग्रथितेऽस्मिन् मनोरञ्जका अर्थाः समनुवर्णिताः । भाषासारल्येन अर्थस्फुटतया च सुखावबोधं च । हिन्दी-अनुवादोऽपि उपादेयः ॥ (कु. वे. शे.)

जवाहर-ज्योतिः (हिन्दी-अनुवादसहितम)

प० राजारामशुक्लः; काशीहिन्दूविश्वविद्यालयीयसाहित्यप्रधानाध्यापकः, डी० ६२/४३ ई, सोनियां, वाराणसी ॥

प० राजारामशुक्लमहोदयैः विरचितं 'जवाहर-ज्योतिः'-नामकं प० नेहरू-माहात्म्यप्रतिपादकं उपादेयं विशिष्य चरित्रकाव्यपिपठिषूणां हृदयङ्गमं च । अस्मिन् काव्ये प० नेहरूमहाभागस्य व्यक्तित्ववर्णनं प्राञ्जलया भाषया कृतं मनोहारि भवति । सांप्रतिकं समयमनुरुध्य चरित्रकाव्येषु निहिता कवेर्भावना स्तुत्या ॥ (कु. वे. शे.)

सीताचरितं महाकाव्यम्

श्री रेवा प्रसाद द्विवेदिना रचितम् । संस्कृतपरिषद्, सागरविश्व-विद्यालयः, तथा सुधीरप्रकाशनम्, रायपुरम्, म. प्र. । रू. ३ ॥

ग्रन्थकर्ता प्रतिभावाचकानां परिचित एव । न केवलं कवनपटुरयं, परन्तु परिनिष्ठितशब्दशास्त्रज्ञतया दुर्घटदुरूहविरचनेष्वपि शक्तिं प्रकाशयति । तदत्र प्रस्तुते काव्ये यदनेन टीकाप्ययोजि, तत्पठितॄणां महते साह्याय भवति । दशसर्गात्मकं काव्यमिदम् उत्तररामायणकथामालम्ब्य प्रवृत्तम् । बहवः तत्तच्छास्त्रीया विषयाः, तथा आधुनिका अपि व्यवहाराः तत्र तत्र श्लोकेषु निवेशिताः ॥ (वे. रा.)

रवीन्द्रप्रतिभा

दीनेशचन्द्रदत्तः । संकेतादिकमन्यदज्ञातम् ॥

१७४-पद्यात्मकेऽस्मिन् निबन्धे न केवलं महाकवेः श्रीरवीन्द्रनाथस्य स्तुतिः प्रस्तुता, अपि तु छन्दःशास्त्रमनुसृत्य सर्वेषां वृत्तानामुदाहरणभूताः श्लोकाश्च आम्रसेचनपितृतर्पणन्यायेन दत्ता । आमुखे अवसाने च वृत्तसूची निवेशिता । श्लाघ्यः परिश्रमो रचयितुः ॥ (वे. रा.)

गल्पकल्पलतिका

गिरिराजशर्मणा संगृहीता

संस्कृतप्रचारपरिषत्प्रकाशनम्, भारतीभवनम्, गोपालजी का रास्ता । जयपुरम् ॥

विविधानां लेखकानां लेखा अत्र संगृहीताः । प्रथमं झालवाडस्थस्य श्रीगणेशशर्मणो 'भ्रातृस्नेहः' इति गद्यबन्धः । अस्याः कथायाः कर्तुः शैली शुद्धा श्लक्ष्णा सुश्लिष्टा च । शोलापुरवास्तव्यस्य वासुदेवशास्त्रिणो गद्यसन्दर्भः 'विषमस्मै प्रदातव्यम्' इत्याख्यः अत्रान्तर्गतो द्वितीयो लेखः । पूर्ववदियमपि खण्डकथा समीचीनया रीत्या लिखिता, परन्तु पूर्वा कथा आधुनिकीं परिस्थितिमालम्ब्य प्रवृत्ता, इयं तु प्राचीनाम् । आन्ध्रदेशीयस्य शठकोपस्य दृश्यसप्तकघटितं लघुरूपकं तृतीयतयात्र योजितम् । भारतीविजयनाम्नि अस्मिन् दृश्यनिबन्धे भारतीयभाषां नायिकीकृत्य संदृब्धे भाषाप्रश्नसमाधान-फलके कर्तुः प्रतिभास्फूर्तिः प्रशंसार्हा समुल्लसति । 'अभिनवो गान्धर्वो' नाम चतुर्थः प्रबन्धोऽपि खण्डकथा गद्यबद्धा नन्दकिशोरझा-महाशयेन रचिता, यत्र आधुनिकखण्डकथाप्रक्रिया निपुणं लेखकेन समादृता दृश्यते । प्राचीनसाहित्य-प्रसिद्धानां वाक्यानां तत्र तत्र योजनं शैल्याः कामपि शोभामादधाति । 'बलिदान'-नाम्नी कृतिः समनन्तरमुद्रिता स्वातन्त्र्ययुद्धवीरापदानविषयिणी कथा; श्यामदेवशास्त्रिणा लिखिता इयमपि कथा सुश्लिष्टा; शैली समासोत्प्रक्षाप्रासा-दिभिः तत्र तत्र प्रौढिं स्पृशन्ती दीप्यते । दीनानाथत्रिवेदिना रचिता अन्ते मुद्रिता 'नारीमतिवैभवम्' नाम कथा कर्तुः संघटनाचातुर्यं व्यनक्ति । सर्व एवास्मिन् लघुनि पुस्तकेऽन्तर्भाविता निबन्धाः गुणविशिष्टा वस्तुवैचित्र्यभूषिताः सजीवस्य आधुनिकसंस्कृतसाहित्यस्य समीचीनप्रतीकभूता विराजन्ते ॥ (वे. रा.)

रूपकाणि

पार्वतीपरमेश्वरीयम्, रामवनगमनम्, पाददण्डः

डा० श्रीमती वनमाला भवालकर्; - संस्कृतपरिषद् सागर-विश्वविद्यालयः, सागर् (म. प्रं.) १९६६, १९६५, १९६६. रू. १-५०; १; १.॥

कालिदासस्य कुमारसंभवे पञ्चमसर्गे वर्णितं पार्वतीतपःफलेन परिणतं पार्वतीपरमेश्वरसंयोगम् उपजीव्य कृतम् उपरि प्रथमं निर्दिष्टं दृश्यत्रयात्मकं गीतमयं रूपकम्। कालिदासवाग्भिः सह अपेक्षिताः काश्चन पद्यात्मिकाः कवेः स्वीया वाचोऽप्यायोज्य विरचितः, प्रतिपदं गानाय समुचितान् रागानपि सूचयन्, विविधच्छन्दोभिः ग्रथितः कालिदासरसिकैः सङ्गीतकुतुकिभिश्च आदरणीयोऽयं प्रबन्धः॥

द्वितीयतया निर्दिष्टमपि विविधच्छन्दोग्रथितं गीतस्वर-राग-तालयोजितम् अभिनययोग्यं दृश्यत्रयात्मकं रूपकम्। आबालवृद्धपरिचितायां रामायणकथायां रामवनगमनवृत्तान्तः अत्र कथावस्तुतया उपात्तः॥

तृतीयतया उपरि निर्दिष्टे एकाङ्के रूपके देशप्रेमभावनां भूमिकात्वेन प्रकल्प्य यूनोः अनुरागगतिः प्रतिपादिता लेखिकया। मानवप्रेम्णि हृदयसौन्दर्यमेव साफल्यबीजं न पुनर्देहसौन्दर्यम् इति प्रतिपाद्यतेऽत्र। 'सागरिका'यां प्रथमं प्रकाशितमिदम्, आकाशवाणीतः प्रसारितं च॥ (स. सु. जा.)

गणाभ्युदयम्

डा० हरिहरत्रिवेदी। अखिलभारतीयसंस्कृतसाहित्यसम्मेलनम्; देहली; १९६६॥

पञ्चाङ्कस्य रूपकस्यास्य निबन्धा कविः ऐतिहासिकतत्त्वज्ञश्च। भारते गणराज्यानामुदयः, तान् गणान् विद्रावयितुं प्राचीनभारतीयैः के के प्रयत्नाः कृताः इत्यमुं विषयमधिकृत्य रचितमिदं रूपकं अस्मत्पूर्वजानां स्वातन्त्र्यविषये जागरूकतां प्रकटीकरोति। ऐतिहासिकयाथार्थ्यमनुत्सृज्य नाट्यानुरूपाभिः काल्पनिकीभिः घटनाभिः कृत्रिमैश्च पात्रैः परिष्कारं करोति कविः। 'संस्कृतरत्नाकरे' पूर्वं मुद्रितं गणराज्यमहोत्सवावसरे १९६६-तमे वर्षे पुनः प्रकाशितम्। (स. सु. जा.)

प्रतिज्ञाकौटिल्यम्

जग्गु वकुलभूषणः । बङ्गलूर्, १९६८ । रू. ३-८० ॥

अष्टाङ्कस्य रूपकस्यास्य प्रणेता संस्कृतप्रतिभायां त्रिः दृष्टपूर्वः कविवरश्च । विशाखदत्तप्रणीतं मुद्राराक्षसं नाम रूपकं अपूर्ववस्तुसंविधानवैचित्र्यकं सुविदितमेव । तदनुगुणमेव पात्र-सन्दर्भादि आरचय्य तत्पूर्ववस्तुतया सन्दृब्धमिदं नाटकम् । रचयितुः वैदुष्यं, शब्दशुद्धिः वर्णनाचातुर्यं च नाटके सर्वत्र स्फुटं भवति । डा० वे. राघवमहोदयानां प्रास्ताविकोक्त्या भूषितोऽयं ग्रन्थः भारतीयशासकानां साह्येन मुद्रितः ॥ (स. सु. जा.)

नारीजागरणम्

श्रीगोपालशास्त्री दर्शनकेसरी । चौखाम्बा विद्याभवनम्, वाराणसी, १९६६ । रू. ४. ॥

'भारते नार्यः संस्कृतशिक्षारताः मातृत्वाभिमानवत्यः भारतीय-संस्कृतिरक्षिकाश्च भवेयुः, विहाय पाश्चात्यानुकृतिम्', इति सामाजिको विषयः वस्त्वत्र सप्ताङ्के नाटके । ऐतिहासिकनि पौराणिकानि च पात्राणि दृष्टान्तीकृत्य अमुमर्थं विशदीकरोति निबन्धा ॥ (स. सु. जा.)

पद्मावती

कोलाचलं यज्ञनारायणदीक्षितः । गुण्टूर्, आन्ध्रप्रदेशः, १९६७ । रू. २ ॥

ब्रह्माण्डादिपुराणोक्त-श्रीवेङ्कटाचलमाहात्म्यान्तर्गतं पद्मावती-श्रीनिवासो-द्वाहमधिकृत्य कलितं सप्ताङ्कमिदं नाटकम् । काश्चन गीतयोऽपि अत्र योजिताः प्रबन्धा । रचयितुरस्य 'वरूथिनी' इति नाटकान्तरं पूर्वं प्रतिभाया-मालोचितम् । (स. सु. जा.)

उपनिषद्-रूपकाणि

के. टि. पाण्डुरङ्गि । बङ्गलूर् । १९६८ ॥

'सत्यकामः जाबालः', 'जनकराजसभा' इति नामाङ्कितं रूपकद्वयम्, औपनिषदान् संवादानुपजीव्य तद्वचोभिरेव सन्दृब्धम् । प्रथमं छान्दोग्ये विद्यमानं प्रसिद्धं वस्तु, द्वितीयं बृहदारण्यकीयम् । नभोवाणीप्रसारणार्थं कन्नडविवरणमप्यायोजितम् ॥ (स. सु. जा.)

मेघदूतोत्तरम्

श्री. भि. वेलणकरः । सुरभारती, भोपाल् । रू. २. ५०. ॥

रचयितुरस्य कृतयः पूर्वं प्रतिभायामालोचिताः । मेघदूते यक्षस्य कथं स्वाधिकारे प्रमादः, तथा प्रणयियुग्मस्य पुनर्मेलनमित्येतदुभयं कालिदासेन ध्वनितं सूक्ष्मरीत्या । तदेव वस्तुतया स्वीकृत्य गीतप्राये व्यङ्के रूपकेऽस्मिन् चित्रितम् । भोपाल्-इत्यादिषु स्थलेषु रङ्गे पञ्चकृत्वः प्रयुक्तं च । हिन्दी-आङ्ग्लानुवादौ च दत्तौ ॥ (स. सु. जा.)

भूपो भिषक्त्वं गतः

पं० गणेशशास्त्री लोण्ढे । शारदागौरवग्रन्थमाला ११, पुण्यपत्तनम् २, १९६७ । रू. १ ।

'वैद्यकादिव्यवसायव्याप्तान् जनान् धनतृष्णा अधुना कदर्थयति' इति विषयमधिकृत्य कृतं पञ्चप्रवेशात्मकं लघुनाटकम् । सरलभाषया अनलङ्कृतवचोभिर्लिखितमिदं पाठशालासु छात्रैः प्रयोक्तुं योग्यम् ॥

स्तोत्रग्रन्थाः

श्रीगणेशसुप्रभातम्, श्रीशृङ्गारवेलायुधस्तोत्रम्,
श्री-अभिरामनायिकास्तोत्रम्

त्रयमपि श्रीस्वामिशस्त्रिभिः कृतम् । कृष्णापुरम्, कोडम्बाकम्, मद्रास्-२४ । न. पै. ४०, ५० ॥

एतेषां स्तोत्राणां कर्तारः मन्त्रशास्त्रनिष्णाताः देव्यनुग्रहपात्रभूताः । इतः पूर्वं च कानिचित् तदुपज्ञानि स्तोत्राणि अत्र विमृष्टानि । अत्र पुस्तकद्वये दत्तानि स्तोत्राणि प्रचारार्थं देवनागरी-द्रमिडलिप्योः मुद्रितानि, द्रमिडानुवाद-सहितानि च ॥ (वे. रा.)

अष्टलक्ष्मीगीतम्, स्तुतित्रयम्

महाकवि श्रीसुन्दरेशशर्मणा रचितम् । कर्ता, पश्चिममहावीथी, तञ्जावूर, मद्रास् । न. पै. ३०; रू. १ ॥

इमे अपि मन्त्रशास्त्रनिष्ठाः गणपत्युपासकाः सुन्दरेशशर्माणः । एषां कृतयः पूर्वं प्रतिभायां विमृष्टाः । अत्र अष्टलक्ष्मीविषयकाः स्तुतयः रागतालबद्धगीति-रूपेण रचिताः । स्तुतित्रयपुस्तकेऽन्तर्भूतास्तु स्तुतयः श्लोकरूपाः, चामुण्डेश्वरी-लक्ष्मी-वाणीपराश्च ॥ (वे. रा.)

सुवर्णलक्ष्मीनक्षत्रमाला

पण्डित श्री हरिशास्त्रिभिः विरचिता । संस्कृतप्रचारपरिषत्, भारतीभवनम्, गोपालजी का रास्ता, जयपुरम् । न. पै. २० ॥

गीतिप्राये वृत्ते प्रसिद्धं महिषासुरमर्दिनीस्तोत्रमनुसरन्ती इयं लक्ष्मीविषया स्तुतिः ललितया शैल्या गुम्फिता, हिन्दी-अनुवादेन सह मुद्रिता ॥ (वे. रा.)

श्रीरामायणस्तोत्रमाला

के. अन्नपूर्णा देवी, ३ वारेन् रोड्, भीमण्णपेट्ट, मयूरपुरम्, मद्रास्-४ । न. पै. ५० ॥

रामायणकथां संगृह्णन् लघुभिः अनुष्टुप्श्लोकैः सन्दब्धोऽयं रामस्तवः । अन्ते गुरुवायुपुरस्थकृष्णपरमेकम्, अम्बापरं स्तोत्रद्वयं च मुद्रितम् ॥ (वे.रा.)

केतीशनाथसुप्रभातम्

ति. कि. सीतारामशास्त्रिभिः कृतम् । हिन्दुमाणवकसङ्घः, लङ्काविश्वविद्यालयः, पेरादनिया, लङ्का ॥

प्राचीनसमयाचार्यैः द्रमिडशिवभक्तैः देवारनामभिः प्रबन्धैः स्तुतः केतीशक्षेत्रस्थः शिवः । तमधिकृत्य कृतमिदं सुप्रभातस्तोत्रं दशवसन्ततिलकात्मकम् । पुस्तकेऽस्मिन् कर्तुः स्तोत्रान्तराणि, केतीशप्रतिपत्तिः, केतीशमङ्गलम्, अन्ते मानासिकचिदम्बरक्षेत्रदर्शनमष्टश्लोकात्मकं च प्रकाशितम् । अप्रकाशिताः परस्सहस्रं स्तोत्रमयाः श्लोकाः ग्रन्थकर्त्रा रचिता इति भूमिकायामुक्तम्, तेऽपि क्रमशः प्रकाशयिष्यन्ते तेषां शिष्यैः भक्तैश्चेति विश्वसिमः ॥ (वे. रा.)

श्रीरामशतकम्

ति. ना. रामचन्द्रः । कपालिनगरम्, मयूरपुरम्, मद्रास्-४ ॥

विविधैर्वृत्तैः शब्दचित्रैश्च सन्दब्धेयं स्तुतिः कवयितुः पाण्डित्यं भक्तिं च व्यनक्ति । 'आपदामपहर्तारम्' इत्यस्य प्रसिद्धस्य रामश्लोकस्य प्रथमाक्षरैर्घटितारम्भा उपक्रमे ३४ श्लोकाः ॥ (वे. रा.)

स्तुतिमणिमालिका

न. च. रघुनाथाचार्यः । १७-१५१, करीमाबाद् रोड्, वरङ्गल्, आ. प्र. । रू. १ ॥

अत्र प्रथमतया मुद्रिता स्तुतिः शताधिकैः श्लोकैर्गुम्फिता श्रीशैलेशवेङ्कटेशं विषयीकरोति । शठगोपादिसूरीणां द्रमिडगाथानां कासाञ्चिदनुवादरूपतया केचन श्लोका अत्र निवेशिताः । इमामेव रीतिमनुसरति द्वितीया श्रीरङ्गराजविषया स्तुतिः ३०-पद्यात्मिका । अष्टोत्तरशतवैष्णवदिव्यदेशेषु मध्ये कांश्चनोद्धृत्य तत्रत्यदेवताविशेषाणां स्तुतयः, तथा श्रीवैष्णवाचार्याणां केषांचन स्तुतयः, रामानुजविषयकद्रमिडस्तुतेः कस्याश्चन संस्कृतानुवादश्च अन्ते योजिताः ॥ (वे. रा.)

श्रीमहागणपतिपञ्चश्लोकीस्तवः, श्रीगजाननशरणागतिस्तवश्च

कावश्शेरि कृष्णहरिहरशर्मा । वाविल्ल रामस्वामिशास्त्रुलु अण्ड् सन्स्, मद्रास्-१ ॥ २५ न. पै. ।

एतासां लघ्वीनां स्तुतीनां कर्ता आयुर्वेदशिरोमणिः, सङ्गीते च रसिकः । अस्य गीतिमयानि स्तोत्राणि नचिरात्प्रकाशमेष्यन्ति । प्रकृते पुस्तके गणेशपरं स्तोत्रद्वयमनेन द्रविडानुवादेन सह दत्तम् ॥ (वे. रा.)

भगवच्चरणोत्प्रेक्षा (सव्याख्या)

रचयिता एवं व्याख्याकारः म० म० श्री प० मथुराप्रसाददीक्षितः । प्रकाशकः-आचार्य श्री सदाशिवदीक्षितः, १४९, हजरियाना, नडागांव गेट् रोड्, झाँसि । रू. २. ॥

म० म० श्री प० मथुराप्रसाददीक्षितविरचितं स्तबकपञ्चकात्मकं सव्याख्यं 'भगवच्चरणोत्प्रेक्षा'-नामकं विष्णुप्रार्थनात्मकं ग्रन्थरत्नं अप्रस्तुतप्रशंसार्थान्तरन्यासोत्प्रेक्षादिभिः अलङ्कारैरलङ्कृतं माधुर्यादिगुणोपेतं पाठकानां हृदयाह्लादकं भक्तिसंवर्धकं च । नाटक-मुक्तककाव्य-कामशास्त्र-वैद्यक-दर्शन-व्याकरण-धर्मशास्त्राद्यनेकविषयकग्रन्थरचनापाटवेन विश्रुतानां श्रीमथुराप्रसाददीक्षितानां

भगवद्भक्तिसंवर्धकेऽस्मिन् ग्रन्थे सर्वे श्लोकाः अर्थगांभीर्यनैर्भर्येणानुसन्धानयोग्याः। पण्डितवरेण्यैरेतैः भगवच्चरणयोः प्रार्थनां लक्ष्यीकृत्य आनुषाङ्गिकतया संस्कृतभक्तिसाहित्यस्य महान् उपहारः कृतः ॥ (कु. वे. शे.)

पुष्पाञ्जलिः (हिन्दीपद्यानुवाद-गद्यानुवादसहितः)

प० विष्णुदत्तमिश्रः। मुद्रकः—हुंकार प्रेस् न्यू मार्केट्, पाटना। रू. १-२५. ॥

श्री प० विष्णुदत्तमिश्रविरचितं सीतारामशङ्करवन्दनात्मकमिदं भक्तिसंवर्धकं लघु काव्यं संस्कृतज्ञानां प्रीतिदायकं भवति। हिन्दीभाषायां स्वयंकृतः पद्यानुवादो गद्यानुवादश्च संस्कृतानभिज्ञानामपि अध्ययनसौलभ्यमापादयति। स्तुत्योऽयं लेखकानां परिश्रमः ॥ (कु. वे. शे.)

स्तोत्रग्रन्थाः

सौन्दर्यलहरी - हस्तामलकस्तोत्रम्, अन्नपूर्णाविश्वनाथस्तोत्रम्, चन्द्रशेखराष्टकस्तोत्रम् (श्रीशङ्कराचार्यकृतानि)

पि. कृष्णमूर्तिः, ५६७७, सेइण्ट् मेरिस् रोड्, सेकन्दराबाद्, आन्ध्रप्रदेशः। प्रथमम्-रू. १; अन्यानि प्रत्येकं न. पै. २५. ॥

प्रसिद्धान्येतानि स्तोत्राणि स्वल्पमूल्यकानि आङ्ग्लानुवादसहितानि तेलुगुलिप्यां श्रीमता कृष्णमूर्तिना प्रकाशितानि। तत्र सौन्दर्यलहर्या आङ्ग्लानुवादः डा० वे. राघवमहाशयैः सम्यक् परिशोधितः; तेषामेवामुखोक्त्या च समलङ्कृतोऽयं ग्रन्थः ॥

आन्ध्रप्रदेशे संस्कृत-भक्ति-प्रचार-सेवायां बद्धश्रद्धस्य एतेषां ग्रन्थान संपादयितुः परिश्रमः सफलः स्यादित्याशास्महे ॥ (वे. रा.)

अनुवादाः

केतकीकाव्यम्

श्रीरघुनाथचौधुरिणा विरचितम्, श्रीमनोरञ्जनशास्त्रिणा अनूदितम्। प्रकाशकः-शान्तारामचौधुरी, उजनबझार, गौहाती। रू. ३. ॥

सुप्रसिद्धस्य आसामीयकवेः श्रीरघुनाथचौधुरिणः 'केतकि'नामकं पक्षिकाव्यं को वा न जानाति । केतकिनाम्नः पक्षिणो ध्वनिर्यदा उदेति, तदा जगति कोऽपि प्रहर्षः समुदेति, नूतनं जीवितं सौन्दर्यं च प्रकृतिमुज्जीवयति, उज्ज्वलयति च । पञ्चभागात्मकमिदम् आसामीयकाव्यं नलबारी-संस्कृतकलाशालाध्यक्षैः पताकान्यायादिकाव्यकर्तृभिः मनोरञ्जनशास्त्रिभिः संस्कृतभाषायां सुष्ठु सरलं चानूदितम् अद्य सर्वस्मिन्नपि भारते रसिकैरनुभवितुं शक्यते ॥ (वे. रा.)

अथातो ज्ञानदेवोऽभूत्

मूललेखकः-श्रीभालचन्द्र भिडे, अनुवादकः-डा० ग. बा. पळसुले । भारतवाणीप्रकाशनमाला १५, पुण्यपत्तनम्, १९६७ । रू. २. ॥

'तो ज्ञानदेव झाला' इत्यस्य मराठीनाटकस्य संस्कृतानुवादः, पूर्वं भारतवाण्यां प्रकाशितः । महाराष्ट्रीयस्य महात्मनो ज्ञानदेवस्य पिता सन्न्यासग्रहणानन्तरमपि पत्नीपुत्रादिभिस्सह लोकयात्रां निस्स्पृहः चकार । अन्धश्रद्धायुताः प्राकृतजनाः न केवलं तत्कुटुम्बस्य समाजबहिष्काराय, किन्तु ज्ञानदेवस्य पित्रोः मरणस्यापि कारणमभूवन् । प्राकृतजनप्रबोधार्थमेव भगवद्गीतायाः ज्ञानेश्वरीति प्राकृतमराठीव्याख्या तेन महात्मना कृता इति वस्त्वेतदधिकृत्य द्व्यङ्कमिदं पद्यरहितं नाटकं विशदयति ॥ (स. सु. जा.)

तदात्मानं सृजाम्यहम्, सम्मानकर्णिकम्

मूललेखकः-श्रीवासुदेव पालन्दे, अनुवादकः-माधव देशपाण्डे । भारतवाणीप्रकाशनमाला १८, पुण्यपत्तनम्, १९६७ । रू. ४ ॥

पुण्यपत्तनस्य भारतप्रशालासांस्कृतिकमण्डलेन प्रयुक्तमिदं पद्यरहितं लघुनाटकद्वयम् । पूर्वस्मिन् नाटके इव अत्र प्रथमनिर्दिष्टे नाटकेऽपि दुःखमयं महात्मनो ज्ञानदेवस्य चरितमेव वस्तु । समाजेन बहिष्कृतौ समारोपितदोषौ ज्ञानदेवस्य पितरौ आत्मानौ गङ्गायामर्पयतः । अधर्माभ्युत्थानेऽस्मिन् समये ज्ञानदेवः नूतनं देवालयं प्रतिष्ठापयति ।

द्वितीये लघुनाटके, मातुलप्रेरणया रामो नाम युवा सदसि साक्षर इति सम्मानं लभते, पश्चात् स्वयमेव अनधीतवन्तं आत्मानं निवेद्य पारितोषिकं प्रत्यर्पयति इति सत्यवचनस्य गौरवं प्रदर्शयति रूपकमिदम् । मुद्रणदोषाः शोधयितव्याः ॥ (स. सु. जा.)

कलापूर्णोदयः, त्रिवेणी

श्रीसन्निधानं सूर्यनारायणशास्त्री, ४४, जीरा सिकिन्द्राबाद्-३. १९६७,३८. आन्ध्रप्रदेशसाहित्यएकाडेमी-संस्थया प्रकटितः; रू. ६, २. ४०. ॥

कलापूर्णोदयनाम्ना सुप्रसिद्धं आन्ध्रभाषानिबद्धं काव्यं क्रिस्तुषोडशशताब्दप्रान्ते पिङ्गलिसूरनार्येण विरचितम् । तदानीन्तनस्य प्रसिद्धानुवादप्रस्थानस्य व्यतिरेकेण, पुराणेतिहासादिप्रसिद्धकथावस्तुपरित्यागेन नूतनमपूर्वं चेतिवृत्तमुत्पाद्यं समालम्ब्य ग्रथितम् । विजयनगराधीशस्य श्रीकृष्णदेवरायस्य समनन्तरकालेऽयं कविरासीत् । प्रसिद्धं काव्यमिदं शिरोमणिभिः श्रीमद्भिः सन्निधानं सूर्यनारायणशास्त्रिभिः प्रसिद्धकविपण्डितवर्यैः द्वादशसर्गात्मककाव्यरूपेण संक्षिप्य गैर्वाण्यामनूदितम् । यद्यपि मूलग्रन्थस्य शोभा अनुवादकर्मणि क्लेशसाध्या, तथापि प्रकृते काव्ये मूलप्रबन्धस्य शोभा समुचितरीत्या आनीता । मूले विस्तृतानां वर्णनानां कथागत्यनुपयोगिनां परित्यागेन, रसोचितविविधप्रसिद्धवृत्तसमाश्रयणेन च क्लृप्तोऽयं प्रबन्धः पाठकजनभागधेयत्वेन प्रथतेतराम् । ग्रन्थस्यास्य प्रयोजनं सकलान्ध्रेतरपाठकोपयोगितया सम्भवीत्याशास्महे । मुद्रणेऽनवधानं पुस्तकस्यास्य शोभां किञ्चिदपकर्षतीव ।

प्रसिद्धानां भाषाकाव्यानामेवं संस्कृतीकरणद्वारा तेषां प्रचारविस्तारसम्पादनपरः श्रीशास्त्रिणामयमुद्यमः सर्वथा श्लाघनीयः ॥

त्रिवेणी नामा ग्रन्थः प्रवरवरूथिनीय-भर्तृहरिचरित-कबीरचरितात्मकखण्डकाव्यत्रयसमहाररूपः पूर्वोद्दिष्टैरेव शास्त्रिवर्यैः कृतः ।

तत्र प्रवरवरूथिनीयमिति सुप्रसिद्धान्ध्रप्रबन्धस्य मनुचरित्राख्यस्य प्रथमाश्वासद्वयस्य स्वेच्छानुवादरूपः । आन्ध्रप्रबन्धप्रणेता अल्लसानि पेद्दनामात्यः 'आन्ध्रकवितापितामह' इति बिरुदभूषितः सरससाहितीप्रियश्रीकृष्णदेवराजस्य सभालङ्कारमणिरासीत् । आन्ध्रपञ्चमहाकाव्येषु अन्य-

तमेऽस्मिन् ग्रन्थे प्रथमाश्वासद्वये प्रवराख्यस्य ब्राह्मणस्य वरूथिनीनाम्न्या गन्धर्वयोषितश्च शृङ्गारवृत्तान्तः प्रपञ्चितः । अत्राप्यनुवादसरणिः यथापूर्वमाश्रिता ॥

त्रिवेण्यां द्वितीयं खण्डकाव्यं भर्तृहरिचरितम् । सुप्रसिद्धस्य राज्ञः भर्तृहरेः शतकत्रयकर्तुः कथां यथोचितवर्णनसंभाषणादिद्वारा सुनिपुणं निरूपितवन्तः सूर्यनारायणशास्त्रिणः पुनरपि सहृदयाभिनन्दनपात्रतां प्राप्ताः । प्रसिद्धोऽप्ययं वृत्तान्तः श्रीमद्भिः शास्त्रिभिः नूतनतां कामपि शोभां च प्रापिता ॥

त्रिवेण्यां तृतीयो भागः कबीरचरिताख्यः । हिन्दूमहम्मदीयमतयोर्निर्विशेषमादरं प्रकटितवतः रामानन्दशिष्यभूतस्य श्रीरामभक्तस्य कबीरस्य वृत्तान्तः सुप्रसिद्धः । तस्य भक्तशिखावतंसस्य सकलमुमुक्षुजनोपजीव्यस्य बाल्यादारभ्य सिद्धिपर्यन्तं वृत्तान्तं सरलमधुरया शैल्या, विरचितवन्तः श्रीमन्तः सन्निधानं सूर्यनारायणशास्त्रिणः । कबीरोपदेशवाक्यानि च तत्र तत्र निबद्धानि ग्रन्थस्यास्य मकुटायमानानि विराजन्ते । एतदन्ते योजिता कबीरगीतावलिः एकशतगीतसङ्कलिता, ग्रन्थकर्तृणां हिन्दीसाहित्यवैशारद्यं, यथारसं तदनुवादसामर्थ्यं च स्पष्टीकरोति । अत्रत्याः बहवः श्लोकाः हृदयङ्गमपदगुम्फनेन भक्तिसंबर्धकाः मननयोग्याश्च वर्तन्ते । मुद्रणं तु सर्वथा शोचनीयम् ॥
(मु. रा.)

काव्यतरङ्गिणी - द्वितीयस्तरङ्गः

प्रणेता : सि. जि. पुरुषोत्तमः, एम्. ए., मैसूरु विश्वविद्यानिलयः, मैसूरु। जयमारुती पब्लिषर्स्, वि. वि. मोहल्ला, मैसूरु २ । वि. सं. रू. ८., सा. सं. रू. ४. ॥

पूर्वमेव प्रतिभायां (१-२, पु. २६२) विचारितः "कन्नडकाव्यतरङ्गिणी-कुवेंपुतरङ्गः" । प्रकृतो ग्रन्थः तस्य ग्रन्थस्य द्वितीयस्तरङ्गः । ग्रन्थेऽस्मिन् चत्वारोऽध्यायाः सन्ति । प्रथमेऽध्याये सुप्रसिद्धाधुनिककन्नडकविभिः श्रीः कुवेंपु, श्री. बि. एम्. श्रीकण्ठय्य, श्री. द. रा. बेन्द्रे इत्यादिभिः रचितानि कानिचित् कन्नडपद्यानि, द्वितीयेऽध्याये सर्वज्ञवचनान्यादीनि जानपदगीतानि, तृतीयाध्याये हिन्दीभाषायां रचितानि पद्यानि च सि. जि. पुरुषोत्तमैः सरलसंस्कृतभाषायां अनूदितानि । चतुर्थाध्याये तु स्वीयानि गीतानि पद्यानि च

दत्तानि। अनुवादोऽतीव सरलः। छन्दोविषये तु सामान्यतः मूलमेव अनुसृतम्। वामभागस्थपत्रेषु मूलं गीर्वाणलिप्यां, दक्षिणभागस्थेषु संस्कृतानुवादश्च मुद्रितौ।

दे. वे. गुण्डप्पेन विरचितस्य 'मङ्कुतिम्मनकग्ग' काव्यस्य संस्कृतानुवादोऽपि ग्रन्थेऽस्मिन् वर्तते। काव्यमिदं शम्भुशर्मणा अपि पूर्वमेव संस्कृतभाषायामनूदितं प्रकाशितं चासीत् प्रतिभायाम् (१-२, पु. २२२-६१)।

ग्रन्थोऽयं महीशूरविश्वविद्यानिलयस्य उपकुलपतिवर्याणां डाक्टर्. के. एल्. श्रीमालीमहोदयानां आमुखेन भूषितः। सि. जि. पुरुषोत्तमस्य व्यवसायोऽयं सर्वथा अभिनन्दनमर्हति। (न. रा. सु.)

पुरन्दरवाणी (श्रीपुरन्दरदासवर्याणां पद्येभ्य उद्धृत्य संस्कृते अनूदितानि वचनामृतानि)

प्र. कृ. त. पाण्डुरङ्गि, वेङ्गलूरु, १९६४.

अष्टपुटात्मकोऽयं लघुग्रन्थः। पुरन्दरदासवर्यः सङ्गीतसाहित्यविशरद इति विदितमेव। कर्णाटकभाषायां तेन बहूनि गीतानि रचितानि। तत्र अमृतोपमानि नानासुभाषितानि सन्ति। अस्मिन् लघुग्रन्थे तेषां संस्कृतानुवादः प्रा. कृ. त. पाण्डुरङ्गिमहोदयैः प्रकाश्य जनोपकाराय मुद्रितः। एतैः पूर्वमेव कन्नड-संस्कृत-आङ्गल-भाषासु बहवो ग्रन्था प्रकाशिताः॥

प्रकाशितोऽयं लघुग्रन्थः दासवर्यस्य चतुर्थशतवार्षिकमहोत्सवावसरे। अत्रानूदितानि शतं पुरन्दरदासवचनामृतानि छात्रोपयोगीनि। अनुवादोऽयं यथामूलं वर्तते॥ (न. रा. सु.)

व्याकरणग्रन्थाः

तद्धितान्ताः केचन शब्दाः

डा० भागीरथप्रसाद त्रिपाठी। मोतीलाल बनारसी दास, चौक, वाराणसी॥ रू. ५॥

वाराणसेयसंस्कृतविश्वविद्यालये शोधकार्ये प्रवृत्तो ग्रन्थकर्ता अत्र व्याकरणशास्त्रैकदेशे कामपि इतिहास-तुलनात्मिकां समीक्षां समर्पितवान्। पीएच्. डी. उपाध्यर्थं पाणिनीयधातुपाठमधिकृत्य विचारोऽनेन कृतः। सांप्रदायि-

केन पाण्डित्येन आधुनिकभाषाशास्त्रप्रक्रियामपि सम्यगधीत्य समीक्षाः कृताः श्रीमता त्रिपाठिना । अत्र एकादश तद्धितान्ताः शब्दाः आधुनिकप्राचीनरीतिद्वयानुसारेण ३७-भाषागततत्तद्रूपोदाहरणैः निपुणं निरूपिता इति प्रशंसनीयोऽयं कार्यक्रमस्त्रिपाठिनः ॥ (वे. रा.).

संस्कृतव्याकरणम्

डा० कपिलदेव द्विवेदी । विश्वविद्यालयप्रकाशनम्, वाराणसी । रू. १२. ५० ॥

प्रथमं संस्कृतव्याकरणस्य संक्षिप्तं चरित्रं दत्तम् । अनन्तरं लघुसिद्धान्तकौमुदीमाधारीकृत्य हिन्दीभाषया संस्कृतव्याकरणं व्याख्यातम् । ततः संग्रहेण वैदिकी प्रक्रिया तथा प्राकृतव्याकरणं च प्रतिपादिते । व्याकरणपारिभाषिकशब्दसूची सविवरणा दत्ता । अध्येतृणां महत उपकाराय स्यादयं ग्रन्थः ॥ (वे. रा.)

गोलनवाङ्कुरः

मल्लीनाथचौमालः । सस्कृतप्रचारपरिषत्प्रकाशनम्, भारतीभवनम्, गोपालजी का रास्ता, जयपुरम्, राजस्थानम् । रू. १ ॥

संस्कृतभाषायामाधुनिकविज्ञानविषयकसाहित्यप्रवृद्धयर्थं यः तत्र तत्र क्रियमाणः प्रयत्नो दृश्यते, तदुपबृंहणतया सन्दृब्धोऽयं ग्रन्थः समादरमर्हति । अत्र ख-भ-भू-गोलविषयाः प्राचीननवीनशास्त्रग्रन्थानुपजीव्य सचित्रं लिखितोऽयम् । जयपुरीयसंस्कृतप्रचारपरिषदः प्रचारकार्यं विजयताम् ॥ (वे. रा.)

संस्कृतशिक्षाग्रन्थाः

चित्रद्वारा संस्कृतशिक्षा - प्रश्नोत्तरावलिः

कपिलदेवशास्त्री । संस्कृतप्रचारपरिषद्, गोपाल जी का रास्ता, जयपुरम्, राजस्थानम् । रू. १. २५ ॥

प्रश्नोत्तररूपेण चित्रसाह्येन अतिलघवः पाठा अत्र घटिताः । सुबन्तानि तिङन्तानि च पदानि बहूनि अक्लेशेन ईदृशपुस्तकद्वारा झटिति बोद्धुं शक्यानि ॥ (वे. रा.)

संस्कृतसौरभम्

श्री चारुदेवशास्त्री । मेहरचन्द्र लक्ष्मणदास, कूचा चेलां, दरियागंज्, दिल्ली-६ । रू. २. ५० ॥

उच्चतरपाठशालासु संस्कृतशिक्षार्थं सन्दब्धमिदं पाठकदम्बकं प्रसिद्धैः पण्डितैः श्रीचारुदेवशास्त्रिभिः । ४४ पाठाः पद्य-गद्य-नाट्यमया अत्र अन्तर्भाविताः । प्रतिपाठमन्ते प्रश्नावली दत्ता । समीचीनतया संकलिता इमे पाठाः प्रसिद्धेभ्यः प्राचीनसंस्कृतग्रन्थेभ्यः उद्धृताः । नवीनसंस्कृतसाहित्यमपि अत्रोपयुक्तम्; केचन पाठाः आधुनिकसंस्कृतपत्रिकाभ्य उद्धृताः, केचन नूतनकविभ्यश्च । प्रतिभासंपादकानां टाल्स्टाय्-कथायाः कस्याश्चिदनुवादोऽप्यत्र दृश्यते । महात्मगान्धिसूक्तिरपि समुचितं स्थानं लभते । आभाणकाः महाकविसूक्तयश्चान्ते तिलकयन्ति पुस्तकम् । व्याकरणटिप्पणी यान्ते योजिता सा अध्यापकानां छात्राणां च उपकाराय कल्पेत ॥ (वे. रा.)

सरलसंस्कृतशिक्षणोपायः

दुर्गादत्तशास्त्री मैथिलः । संस्कृतप्रचारपरिषद्, भारतीभवनम्, गोपालजी का रास्ता, जयपुरम् । रू. १ ॥

अत्र सुबन्ततिङन्तपट्टिकाः, सन्धिकारकादिविषयाः, अनुवादाः इत्यपेक्षितं प्रारम्भशिक्षोपयोगि वस्तुजातं सम्यगुपन्यस्तं बालिकानां बालानां च संस्कृताध्ययनोपयोगि भविष्यति ॥ (वे. रा.)

संस्कृतोदयः

राष्ट्रीयशैक्षणिक-अनुसन्धानप्रशिक्षपरिषद्, शिक्षामन्त्रालयः, भारतशासनम्, देहली । रू. २. ५० ॥

उच्चतरपाठशालासु संस्कृत-अध्यापनार्थं शिक्षामन्त्रालयद्वारा संकलय्य प्रकाशितमिदं पुस्तकम् । अस्मिन् संकलनकार्ये मुख्यतया अधिकृतः डा० सूर्यकान्तः । तेन बहुभिः संस्कृतविद्वद्भिः संस्कृताध्यापकैश्च सह

समालोच्य महता कालेन प्रयासेन च संपादितमिदम् । अत्र त्रयो भागाः, आहत्य ५८ पाठाः १२२ पत्रेषु दत्ताः । एते च पद्य-गद्य-नाटयसाहित्येभ्य उद्धृताः, केचन नूतनतया गद्येन संपादकैरेव विरचिताः । पञ्चतन्त्र-हितोपदेश-महाभारत-जातकमाला-रामायण-कादम्बरी-कालिदास-भास-भवभूति-भारवि-ग्रन्थेभ्य उपात्ताः । वैज्ञानिकविषयः, नदीपर्वतादयः, भारतीयप्रजातन्त्र-पद्धतिः, गान्धी, नेहरूसूक्तिः,-इत्यादीन् नूतनान् विषयांश्चाधिकृत्य पाठाः प्रदत्ताः । प्रतिपाठमन्ते अभ्यासः, प्रश्नाः, इत्यादिकमपि योजितम् । पुस्तकस्य उत्तरभागे (पृ. १२५-२०३) पाठोपयुक्तानां पदानां कोशः, व्युत्पत्त्या आङ्ग्लपर्यायेन च पाठक्रमेण निवेशितः ॥ (वे. रा.)

'संस्कृतपरिचयः' (Introducing Sanskrit)

प्राचार्य एस्. के. रामचन्द्रराव्। भारतीयसंस्कृतिविद्यापीठम्, बङ्गलूर्-२०। रू. १ ॥

७४-पत्रेषु संस्कृतभाषाया इतिहासः, सुबन्त-तिङन्तानि, पदानि, समासाश्च संग्रहेणात्र दत्तानि । अन्ते सुबन्ततिङन्तपट्टिकाः, सुभाषितानि, आभाणकाश्च योजितानि । भारतीयसंस्कृतिविद्यापीठस्य प्रचारसेवा अभिवर्धताम् ॥ (वे. रा.)

जनशिक्षा ओ संस्कृत् (वङ्गभाषायाम)

कर्ता-अध्यापकः श्रीध्यानेशनारायण चक्रवर्ती, रवीन्द्रभारतीविश्व-विद्यालयः, कलकत्ता "ऋषिधाम", दत्तपुकुर, पो. २४ परगणाः जिल्ला । रू. ५-५० ॥

श्रीमन्तः ध्यानेशनारायणचक्रवर्तिनः प्रसिद्धाः कविपण्डिताः प्रतिभापठितृणां परिचिता एव । संस्कृतप्रचारार्थं ग्रथिते प्रकृते ग्रन्थे बहुविधोपपत्तिप्रतिपादन-पुरस्सरं गीर्वाणवाण्याः राष्ट्रभाषापदवीमधिरोढुं योग्यता सुनिरूपिता । एतद्विषये लोकसभायां प्रवृत्तानि संस्कृतबद्धानुरागाणां प्रसिद्धसदस्यानां भाषणानि एकत्र सङ्गृहीतानि । विशिष्य संस्कृतभाषायाः सारल्यगाम्भीर्यसमुपादेयतादिगुणाः एतद्ग्रन्थद्वारा वङ्गेषु प्रचारमेष्यन्ति ॥ (मु. रा.)

संस्कृतपत्रिकाणामितिहासः

कृ. त. पाण्डुरङ्गी, बङ्गलूरु ॥

अत्र एकविंशतिसंस्कृतपत्रिकाणां वृत्तान्तः सङ्ग्रहेण दत्तः । आसु काश्चन विरताः, काश्चनैवाद्यापि प्रचरन्ति । पत्रिकाद्वारा नूतनसंस्कृतवाङ्मय-वृद्धिः भवति । अतः अद्य प्रचरन्त्यः पत्रिकाश्च यथा विरतपत्रिकागोष्ठीं न प्रविशन्ति, तथा संस्कृतज्ञैः तत्प्रणयिभिश्च पत्रिकाः समादरणीयाः ॥ (वे. रा.)

मङ्गला

पी ११ सी० ऐ. टि. स्काम ५८, बीसपाडा, कलकत्ता-३ ।

इयं मासिका संस्कृतपत्रिका प्रतिभया साशीर्वादमनुगृह्यते । अत्र कथा, रूपकम् (आकाशवाण्युपयुक्तम्), आधुनिकविषयाः, संस्कृतशिक्षा इति विविधमुपहृतं दृश्यते । नामानुरूपं समेधतामियं नूतना पत्रिका ॥ (वे. रा.)

सामवेदीया षष्ट्यब्दपूर्तिशान्तिः

धर्मज्ञ-मायूरं रामनाथशास्त्री । ७, श्रीकृष्णपुरं वीथी, रायपेट, मद्रास्-१४ ॥

या षष्ट्यब्दपूर्तौ आस्तिकैः शान्तिरद्यानुष्ठीयते, विशिष्य दक्षिणभारते, सा प्रायः सर्वैः कृष्णयजुर्वेदीयक्रममनुसृत्यैव क्रियते । अद्य प्रतिभासंपादकानां डा० वे. राघवार्याणां षष्ट्यब्दपूर्त्युत्सवः मासद्वयात्प्राक् यः प्रवृत्तः, तदा सामशाखिभिस्तैः स्वीयशाखानुसारेण स निर्वर्तयितव्य इति निश्चित्य, तदर्थं छन्दोगकर्मकाण्डनिष्णाता आयोजिताः । तैः गौतमकारिका एतद्विषये वर्तन्ते, तदनुसारेण पद्धतिरपि अस्ति विरलप्रचारा अज्ञातप्राया इति प्रदर्शितम् । अतः इमां गौतमोक्तां छन्दोगषष्ट्यब्दपूतिपद्धतिमनुसृत्य छन्दोगपुरोहितसाह्येन न केवलं स्वषष्ट्यब्दपूर्तिः पूरिता राघवार्यैः, किन्तु इतरेषां छन्दोगानामास्तिकानामुपयोगार्थमियं पद्धतिः मुद्राप्य प्रकाशिता, षष्ट्यब्दपूर्तिदिने छन्दोगेभ्यो दत्ता च ॥ (कु. वे. शे.)

(१) सुभाषगौरवम्, (२) वङ्गविभावरी, (३) भारतगाथा ।

दत्तदीनेशचन्द्रः, अन्ताराष्ट्रीयग्रन्थागारम् पो. बा. १४१, जयपुरम्, राजस्थानम् । प्रत्येकं रू. २ ॥

प्रथमोद्दिष्टे खण्डकाव्ये प्रसिद्धस्य राष्ट्रीयस्वातन्त्र्ययुद्धनेतुः तु. च. वसुमहाशयस्य गौरवम्; द्वितीये वङ्गदेशस्य गौरवं तदनुभूता दुरवस्था च; तृतीयेन भारतदेशस्यैव सांस्कृतिकं चरित्रम्, अर्वाचीना दशा, राष्ट्रीयाः समाजीयाः प्रश्नाः, देशभक्तिः, इत्यादिकं वर्णितम् । प्रथमनिर्दिष्टाभ्यां खण्डकाव्याभ्यां विविधानि छन्दांसि उदाहृतानि कविना । तृतीयं तु मन्दाक्रान्तावृत्तेनैव रचितम् । भारतगाथाया अन्ते कविरेवं प्रार्थयते- "विधेहि भारतं नाकं भारतीयान् सुरोपमान् । जगद्गुरूंश्च तान् कर्तुं त्वं शक्नोषि जगत्पते ॥" इति ॥ (वे. रा.)

छन्दस्सन्दोहः

दत्तदीनेशचन्द्रः । पूर्वोद्दिष्टमेव प्राप्तिस्थानम् । रू. २ ॥

अत्र ग्रन्थकर्त्रा ३९१ अक्षरवृत्तानां लक्षणम्, तथा सप्रभेदं मात्रावृत्तानां च लक्षणं यत् दत्तं, तच्छात्राणां रचयितॄणां च उपकाराय स्यात् ॥ (वे. रा.)

श्रीपाद दामोदर सातवलेकर-महाभागाः

यत्कीर्तिशेषं गताः, तत्संस्कृतप्रचारस्य, विशिष्य वैदिक-वाङ्मयप्रचारस्य च महती विनष्टिः । एते वेदोक्तं शतमानमायुः, विविधं जनेभ्यः, विद्वद्भ्यः, राष्ट्राधिकारिभ्यश्च संमानं प्राप्ताः आदेहनिर्याणं संस्कृतसेवामयं जीवितं यापितवन्तः । प्रथमं राष्ट्रभक्त्यतिरेकेण प्रेरिताः आङ्ग्लशासकानां प्रकोपपात्रभूताः महान्तं क्लेशमन्वभवन् । चित्रकर्मणि कुशला एते स्वशिल्पद्वारा यद्यत् संपादितं तत् सर्वं धनं संस्कृतप्रचार-पुण्यकर्मणि सफलतामनयन् । सर्वासां वेदशाखानां स्वल्प-मूल्यानि पुस्तकानि मुद्राप्य, हिन्द्या अनुवाद-व्याख्यानानि विरच्य वेदप्रचारे अनन्यसाधारणीं सेवामकुर्वन् । एतदर्थमेव स्वाध्यायमण्डलमिति संस्थामपि प्रतिष्ठापयन्ति स्म । स्वाध्यायमण्डलद्वारा ४१० ग्रन्थाः, तथा मराठी-गुजराती-हिन्दी-भाषामय्यः तिस्रः पत्रिकाः, अमृतलतेति एका संस्कृतपत्रिका चैतैः प्रकाशिताः ॥

'तपोऽर्थमायुः' इति भारतीयविद्याभिवर्धनात्मकेन तपसा नीतमेतैर्यदायुः, तदस्माकं पुरतः अमृतं ज्योतिरिव प्रकाशमानं सदा अस्मान् तादृशे कर्मयोगे चोदयद्विराजताम् ॥ (संपादकः)

Samskrita Pratibha

A VALUABLE OPINION

HARVARD UNIVERSITY DEPARTMENT OF SANSKRIT AND INDIAN STUDIES: WIDENER LIBRARY 273
CAMBRIDGE, MASS.

Dear Sir,

I write to acknowledge receipt of Volume 5, *Numbers* 1 *and* 2 *of Samskrita Pratibha. I have found both delight and instruction in these two copies of the journal. I am particularly interested by the memorials of Prime Minister Nehru, which show that in skilful hands Sanskrit can still be used with both emotion and beauty in reference to the events of our times.*

Sincerely yours,

(Sd.) DANIEL H. H. INGALLS

"संस्कृतरवीन्द्रम्"

रवीन्द्ररचनानां संस्कृतानुवादः—साहित्य-अकादेमी- रू. १२.५०

मद्रविश्वविद्यालये 'ठाकूर्-प्राचार्य' पदवीमलङ्कुर्वतां

श्री. कृ. चन्द्रशेखरार्याणामामोदनम् ।

Appreciation by Sri K. Chandrasekharan, Tagore Professor, University of Madras

महाकविरवीन्द्रनाथस्य जन्मशताब्दपूर्तिमहोत्सवावसरे अनेक-साहित्यगोष्ठ्यः रसिकजनाश्च सातिशयकाव्यसृष्टिकौशलस्य अस्य कृतीनाम् आस्वादनेन उदितम् आनन्दं स्वस्वप्रकारैः प्रकटयकुर्वन् । कविसार्वभौमेन अनेन भावुकलोकः द्योतित एवेति सर्वैः अङ्गीक्रियते । सहृदयाः सर्वत्र तेषां कृतज्ञतां च तेभ्यः आविष्कर्तुं मिलिताः बभूवुः । रवीन्द्रप्रतिभाविशेषेण वशीकृताः स्वात्मार्पणोन्मुखा भारतीया इतरदेशीयाश्च भाषान्तरेष्वपि तस्य कविताद्दष्टिं प्रकृतिविभूतिषु सुभगानुप्रवेशं च प्रशशंसुः, स्वीयनिबन्धेषु प्राकाशयंश्च । संस्कृत-वाण्यामपि रवीन्द्रकृतीनाम् एकम् अनुवादसङ्कलनम् अवश्यं करणीय-मित्याशया उद्युक्तवान् डाक्टर् राघवः, अस्य रवीन्द्रसंस्कृतस्य प्रकाशीकरणेन अस्मद्विधानां कृतज्ञतां लब्धवान् ।

रवीन्द्रस्य रचनाशैली संस्कृतपदप्रचुरा । अतश्च तस्य कविताया अनुवादः श्रमरहित एव भविष्यति । स्वादुसंस्कृतमयी अञ्जलिमञ्जरी सम्प्राप्तेति अभिनन्दामः । अत्र पुरस्कारनामाङ्कितो लेखः इतः पूर्वं भाषान्तरेषु अमुद्रितः प्रतिभाति । अनेके पण्डिताः विद्यावन्तश्च महाकवेः प्रसिद्धकाव्यनाटकानि संस्कृतभाषया अनुवदन्तः आत्मन काव्यास्वादनशक्तिं कौशलं च रवीन्द्रसंस्कृते प्रकाशितवन्तः । अत्र पदसारल्यं पद्यशैली च सर्वं पुस्तकं विद्योतयतीति नः परमं प्रमोदम् आवहति ।

'रवीन्द्रः संस्कृतं च' इति विषयमधिकृत्य श्रीराघवेण यद् आवेदितं तद् इमाम अनुवादमालां सर्वां भूषयति ।

अस्य रवीन्द्रसंस्कृतस्य दर्शनेन महाकवेरस्य कविता, कथा, नाटकम् इति सर्वमपि संस्कृतभाषायामेव निजं सौभाग्यं प्राप्नोति इति सर्वोऽपि रसिकलोकः प्रमोदिष्यते ॥

"सहृदया" कृ. चन्द्रशेखरः

तिरुपतिस्थ-

केन्द्रीयसंस्कृतविद्यापीठप्रकाशनानि

१. सामविधानब्राह्मणम्—सायण-भरतस्वामि-व्याख्याभ्यां सहितम् - बी. आर्. शर्मणा संपादितं, डा० वे. राघवार्याणां आमुखोक्त्या सहितम् मू. रू. १५-००

२,३,४ देवताध्यायब्राह्मणम्—सायणभाष्य-युक्तम्, संहितोपनिषद्ब्राह्मणं सायण-द्विजराजभट्टव्याख्योपेतम्, वंशब्राह्मणम् - बी. आर्. शर्मणा संपादितम् ,, १२-००

५. मलयमारुतः—लघुकाव्यसंग्रहः डा० वे. राघवार्यैः संपादितः ,, ५-००

६,७ जैमिनीयार्षेयब्राह्मणम्, जैमिनीयोपनिषद्-ब्राह्मणम्. बी. आर्. शर्मणा संपादितम् ,, २४-००

८. सामवेदार्षेयदीपः—भास्कराध्वरिकृतः- बी. आर्. शर्मणा संपादितः ,, १३-५०

९. आर्षेयब्राह्मणम्—सायणभाष्योपेतम्- बी. आर्. शर्मणा संपादितम् ,, २०-००

१०. षड्विंशब्राह्मणम्—सायणभाष्योपेतम्- बी. आर्. शर्मणा संपादितम् ,, २०-००

११. भारतीयं वृत्तम्—(*India's Past* by A. A. Macdonell)- संस्कृतानुवादः वि. एस्. वेंकटराघवाचार्यकृतः ,, १९-००

१२,१३ श्रीप्रश्नसंहिता, पञ्चविधसूत्राणि प्राप्तिस्थानम्—निर्देशकः,

केन्द्रीयसंस्कृतविद्यापीठम्,

तिरुप्पति, आन्ध्रप्रदेशः.

BIBILIOGRAPHY OF THE BOOKS,
PAPERS & OTHER WRITINGS OF
Dr. V. RAGHAVAN

With the Foreword of Dr. S. RADHAKRISHNAN
and the Introduction of Prof. D. H. H. INGALLS

Released on the 61st Birthday of Dr. Raghavan
by Dr. A. L. Mudaliar, V.C., *Madras University*

A complete up-to-date classified annotated bibiliography, with several indexes, of about 80 books and 750 papers.
Rs. 30.

THE NEW ORDER BOOK CO.
ELLIS BRIDGE, AHMEDABAD-6 (INDIA)

THE SANSKRIT EDUCATION SOCIETY
MADRAS 4

Latest Publications;

शाब्दतरङ्गिणी-Śābdataraṅgiṇī on theories of meaning according to different Śāstras by Panditaraja V. Subrahmanya Sastrigal.

NEW MODEL SANSKRIT GRAMMAR by Sri D, Krishna Iyengar, in English Medium, Vol. 1.

कृदन्तरूपमाला-Kṛdantarūpamālā, a Thesaurus of Verbal Derivatives. Vols. 1-4. Rs. 10 each.

The Teaching of Sanskrit. Rs. 5.

In Press

अव्ययकोशः-A Thesaurus of Indeclinables

T. V. VISWANATHA AIYAR
14, EAST MADA STREET, MADRAS-4 (INDIA)

STATEMENT ABOUT OWNERSHIP AND OTHER PARTICULARS ABOUT SAMSKRITA PRATIBHA

FORM IV

(AS REQUIRED BY RULE 8 OF PRESS REGISTRAR'S ACT)

Place of Publication	..	7, Sri Krishnapuram Street, Madras-14
Periodicity of Publication	..	Half-yearly
Printer's name and address	..	M.L.J. Press Private Ltd., 55-56, Mundakanni Amman Koil St., Madras-4
Publisher's Name	..	Dr. V. Raghavan
Nationality	..	Indian
Address	..	7, Srikrishnapuram Street, Madras-14
Editor's Name	..	Dr. V. Raghavan
Nationality	..	Indian
Address	..	7, Srikrishnapuram Street, Madras-14
Owner's Name	..	Sahitya Akademi,
Address	..	Rabindra Bhavan, Ferozeshah Road New Delhi

I, V. Raghavan, hereby declare that the particulars given above are true to the best of my knowledge and belief.

10-12-1968

V. RAGHAVAN,
Signature of Publisher

साहित्य-अकादेमी-परिषदा प्रकाशिताः संस्कृतग्रन्थाः

कालिदासग्रन्थाः—

बहुमातृकापरिशोधनपूर्वं नूतनतया सम्पादिताः सोपोद्घाताः सटिप्पणाः

१. मेघदूतम्—सु. कु. दे.—विशिष्टं संपुटीकरणम्—
$ 1-50, 10 Sh. 6 d. Rs. 5. 00;
साधारणम्—Rs. 2-50.

२. विक्रमोर्वशीयम्—ह. दा. वेलणकरः—वि.सं. $ 3-00, 21 Sh. Rs. 8-00; सा. Rs 6.

३. कुमारसम्भवः—सूर्यकान्तः—वि.सं. $ 5-00, 37 Sh., Rs. 12-50; सा. Rs. 10. 00.

मुद्र्यमाणानि अथवा सम्पाद्यमानानि

४. अभिज्ञानशाकुन्तलम्—डा. गौरीनाथशास्त्री

५. मालविकाग्निमित्रम्—के. ए. एस्. अय्यर्

६. रघुवंशः—वे. राघवः

७. ऋतुसंहारः—पि. एम्. लाड् —वे. राघवः

कोशावलिः—

१. पुराणेतिहाससंग्रहः—सु. कु. दे—रा. च. हल्ला—वि. सं. $ 4-00, 25 Sh., Rs. 10-00 ; सा. Rs. 7-50.

२. बौद्धसंग्रहः—नलिनाक्षदत्तः—वि. सं. $ 4-00, 25 Sh., Rs. 10-00; सा. Rs. 7-50.

३. अभिलेखसंग्रहः—ब. च. छाब्रा
वि. सं. Rs. 8-50, सा. Rs. 7-00.

४. वेदशास्त्रसंग्रहः—वि. ब. शास्त्री. Rs. 15-00.

अन्यत् प्रकाशनम्

५. अशोकावदानम्—सु. कु. मुखोपाध्यायः
वि. सं. $ 8-00, 36 Sh., Rs. 18.

मुद्र्यमाणा अथवा सम्पाद्यमानाः

६. काव्यनाटकसंग्रहः—१ भागः—वा. श. अग्रवालः

७. ,, २ ,, —वे. राघवः

८. जैनसंग्रहः—ही. ला. जैनः

९. सुभाषितसंग्रहः—के. ए. एस्. अय्यर्—वे. राघवः

'संस्कृतप्रतिभा'

वदन्ती विविधां वाचमेका भारतसाहिती ।
द्राविड्यामथ वङ्गथां वा भाल्येको भारतो गुणः ॥

समानं मूलमेतस्याः सम्प्रदायाः समास्तथा ।
वासनाः प्रेरका भावा बाह्या आभ्यन्तराः समाः ॥

एकैव भारती संविद् अध्यात्मगुणवासिता ।
ऐकात्म्यं नयति ह्येता विचित्रप्रसरा गिरः ॥

मधुच्छन्दा रवीन्द्रश्च बुद्धो गान्धिश्च यज्जगौ ।
तस्य भाषा मनाग् भिन्ना परिभाषा न भिद्यते ॥

देशतः कालतः प्राप्तचित्रप्रसरशालिनः ।
साहित्यस्यास्य दृश्येते बीजमैक्यं च संस्कृते ॥

अर्थतः शब्दतश्चापि सर्वं भारतवाङ्मयम् ।
ओतप्रोततया व्याप्य संस्कृतब्रह्म राजते ॥

मनुं व्यासं च वाल्मीकिं कालिदासं च शङ्करम् ।
कवींश्च शास्त्रकारांश्च व्याख्यातॄन् मतदेशिकान् ॥

उत्पाद्य नैव विरता संस्कृतप्रतिभाखनिः ।
अद्यापि नवरत्नानां प्रसवित्री प्रकाशते ॥

धर्मो ब्रह्म रसो नाम शिवं सत्यं च सुन्दरम् ।
या त्रिधा तत्त्वमूचे तां संस्कृतप्रतिभां नुमः ॥

सम्पादकः

वे. राघवः